RGVEDA DARSANA

A SET OF THIRTEEN VOLUMES

VOLUME NINE

Rgartha Sara

(Part Two)

Vidyalankara

Prof S. K. Ramachandra Rao

Prof S. K. Ramachandra Rao Memorial Trust®

Bangalore 560 011

RgVeda Darsana, (A set of Thirteen volumes) Volume Nine, Rgartha Sara, Part Two, by Prof S. K. Ramachandra Rao, published by Dr. S. R. Sudarshan for Surama Prakashana, the publication wing of the Prof. S. K. Ramachandra Rao Memorial Trust®, 305, 6th Cross, 1st Block, Jayanagar, Bangalore 560011.

Phone: 080-26563957 E mail: profskr.trust@gmail.com

www.profskr.com

© Prof S. K. Ramachandra Rao Memorial Trust®

First Edition: 2003

Second Edition: 2015

ISBN 978-93-84069-15-5 (SET)

Introduction

This is the second part of Dinakara Bhatta's *Rg-artha Sara,* the first part of which was brought out as the eight (eleventh in the first edition) volume of Rg Veda Darsana series. This part continues from the mantras numbered 100 by Dinakara and concludes the selection (201 mantras). It contains what the compiler considers the essential import (Artha Sara) of the Rg Vedic corpus. Alongside Dinakara's gloss, the main commentary of Sayana, on which this gloss depends, is also given. Relevant notes have been added.

S. K. Ramachandra Rao

CONTENTS

List of Mantras Selected Here (Part II)

(The numbers in the references indicate the Maṇḍala, the Sūkta and the mantra. The names of the seers are also given. Within brackets are the deities invoked.)

99.	(Not found in the manuscript)	
100.	(Not found in the manuscript)	
101.	4,31,11	Vāmadeva (Indra)
102.	4,50,7	Vāmadeva (Bṛhaspati)
103.	4,50,8	Vāmadeva (Bṛhaspati)
104.	4,50,9	Vāmadeva (Bṛhaspati)
105.	5,25,5	Asūvaya-Ātreya (Agni)
106.	5,28,3	Viśvavārā-Ātreyī (Agni)
107.	6,75,1	Pāyur-Bharadvāja (Varma)
108.	8,68,19	Priyamedha-Āngirasa (Ṛkshāśvamedha-dāna-praśamsā)
109.	10,36,11	Luśa-Dhānāka (Viśvedeva)
110.	10,36,12	Luśa-Dhānāka (Viśvedeva)
111.	10,36,13	Luśa-Dhānāka (Viśvedeva)
112.	10,36,14	Luśa-Dhānāka (Viśvedeva)
113.	10,47,1	Saptagre-Āngirasa (Vaikuṇṭha)
114.	10,41,1	Devāh (Agni-Sauchīka)
115.	10,51,2	Agni-Sauchīka (Devāh)
116.	10,51,3	Devāh (Agni-Sauchīka)
117.	10,51,4	Agni-Sauchīka (Devāh)

118.	10,51,5	Devāh (Agni-Sauchīka)
119.	10,51,6	Agni-Sauchīka (Devāh)
120.	10,51,7	Devāh (Agni-Sauchīka)
121.	10,51,8	Agni-Sauchīka (Devāh)
122.	10,51,9	Devāh (Agni-Sauchīka)
123.	10,54,5	Bṛhaduktha-Vāmadevya (Indra)
124.	10,60,12	Bandhu, Śrutabandhu, Viprabandhu-Gaupāyanāh (Hasta)
125.	10,62,1	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
126.	10,62,2	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
127.	10,62,3	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
128.	10,62,4	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
129.	10,62,5	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
130.	10,62,6	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
131.	10,62,7	Nābhānediśhṭha-Mānava (Viśvedevā or Angirasa)
132.	10,62,8	Nābhānediśhṭha-Mānava (Dānastuti of Sāvarṇi)
133.	10,62,9	Nābhānediśhṭha-Mānava (Dānastuti of Sāvarṇi)
134.	10,62,10	Nābhānediśhṭha-Mānava (Dānastuti of Sāvarṇi)
135.	10,62,11	Nābhānediśhṭha-Mānava (Dānastuti of Sāvarṇi)
136.	10,71,6	Bṛhaspati (Jñāna)
137.	10,71,7	Bṛhaspati (Jñāna)
138.	10,85,42	Sūryā-Sāvitrī (Sūryā)
139.	10,90,1	Nārāyaṇa (Purusha)
140.	10,90,2	Nārāyaṇa (Purusha)

141.	10,90,3	Nārāyaṇa (Purusha)
142.	10,90,4	Nārāyaṇa (Purusha)
143.	10,90,5	Nārāyaṇa (Purusha)
144.	10,90,6	Nārāyaṇa (Purusha)
145.	10,90,7	Nārāyaṇa (Purusha)
146.	10,90,8	Nārāyaṇa (Purusha)
147.	10,90,9	Nārāyaṇa (Purusha)
148.	10,90,10	Nārāyaṇa (Purusha)
149.	10,90,11	Nārāyaṇa (Purusha)
150.	10,90,12	Nārāyaṇa (Purusha)
151.	10,90,13	Nārāyaṇa (Purusha)
152.	10,90,14	Nārāyaṇa (Purusha)
153.	10,90,15	Nārāyaṇa (Purusha)
154.	10,90,16	Nārāyaṇa (Purusha)
155.	10,95,1	Purūravā-Aila (Urvaśī)
156.	10,95,2	Urvaśī (Purūravā-Aila)
157.	10,95,3	Purūravā-Aila (Urvaśī)
158.	10,95,6	Purūravā-Aila (Urvaśī)
159.	10,95,7	Urvaśī (Purūravā-Aila)
160.	10,95,8	Purūravā-Aila (Urvaśī)
161.	10,95,9	Purūravā-Aila (Urvaśī)
162.	10,95,10	Purūravā-Aila (Urvaśī)
163.	10,95,11	Urvaśī (Purūravā-Aila)
164.	10,95,12	Purūravā-Aila (Urvaśī)

165.	10,95,13	Urvaśī (Purūravā-Aila)
166.	10,95,14	Purūravā-Aila (Urvaśī)
167.	10,95,15	Urvaśī (Purūravā-Aila)
168.	10,95,16	Urvaśī (Purūravā-Aila)
169.	10,95,17	Purūravā-Aila (Urvaśī)
170.	10,95,18	Urvaśī (Purūravā-Aila)
171.	10,107,1	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
172.	10,107,2	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
173.	10,107,3	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
174.	10,107,4	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
175.	10,107,5	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
176.	10,107,6	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
177.	10,107,7	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
178.	10,107,8	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
179.	10,107,9	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)

180.	10,107,10	Divya-Āngirasa or Dakshiṇā-Prājāpatyā (Dakshiṇā-Prājāpatyā)
181.	10,107,11	Divya-Āngirasa or Dakshiṇā-Prājāpatyā
182.	10,117,1	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
183.	10,117,2	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
184.	10,117,3	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
185.	10,117,4	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
186.	10,117,5	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
187.	10,117,6	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
188.	10,117,7	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
189.	10,117,8	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
190.	10,117,9	Bhikshu-Āngirasa (Dhanānnadāna-praśamsā)
191.	10,116,8	Agniyuta-sthaura (Indra)
192.	10,161,1	Yakshma-nāśana-Prājāpatya (Indra and Agni)
193.	10,161,2	Yakshma-nāśana-Prājāpatya (Indra)
194.	10,161,3	Yakshma-nāśana-Prājāpatya (Indra)
195.	10,161,4	Yakshma-nāśana-Prājāpatya (Indra and Agni)
196.	10,161,5	Yakshma-nāśana-Prājāpatya (Indra)
197.	10,173,1	Dhruva-Āngirasa (Rāja-stutih)
198.	10,173,2	Dhruva-Āngirasa (Rāja-stutih)
199.	10,173,3	Dhruva-Āngirasa (Rāja-stutih)
200.	10,173,4	Dhruva-Āngirasa (Rāja-stutih)
201.	10,173,5	Dhruva-Āngirasa (Rāja-stutih)

Note : In Page No. 27 Please read as (१०.५१.१) instead of (१०.४१.१)
In Page No. 35 Please read as (१०.५१.५) instead of (१.५१.५)

ॐ श्रीदेवयनमः। ॐ श्रीदेवयनमः। ॐ श्रीदेवयनमः। ॐ श्रीदेवयनमः।

।दोवः श्रीं। ।दोवः श्रीं। ।दोवः श्रीं। ।दोवः श्रीं। ।दोवः श्रीं। ।दोवः श्रीं।

(101)

ऋषिः वामदेवः ।
छन्दः गायत्री ।
देवता इन्द्रः ॥

(संहितापाठः)

अ॒स्माँ इ॒हा वृ॑णीष्व स॒ख्याय॑ स्व॒स्तये॑ ।
म॒हो रा॒ये । दि॒वित्म॑ते ॥१०१॥
(४.३१.११)

(पदपाठः)

अ॒स्मान् । इ॒ह । वृ॒णी॒ष्व॒ । स॒ख्याय॑ । स्व॒स्तये॑ ॥
म॒हः । रा॒ये । दि॒वित्म॑ते ॥

(अन्वयः)

(हे इन्द्र)। इह सख्याय स्वस्तये महः दिवित्मते राये अस्मान् वृणीष्व ॥

The seer of this mantra is Vāmadeva; the metrical form is Gāyatri; and the deity addressed is Indra.

(Sāyaṇa)

हे इन्द्र। त्वम्। इह अस्मिन्यज्ञे। अस्मान् यजमानान्। सख्याय सखिभावाय। स्वस्तये अविनाशाय। च। महो महते। दिवित्मते दीप्तिमते। राये घनाय। च। वृणिष्व संभजस्व॥

(Dinakara)

हे इन्द्र त्वम् इह अस्मिन् यज्ञे अस्मान् सख्याय सखिभावाय स्वस्तये अविनाशाय च महः महते दिवित्मते दीप्तिमते राये धनाय च वृणीष्व भजस्व॥१०१॥

O Indra, make us the chosen ones by you (vṛṇīshva), here in this life (iha), for friendship with you (sakhyāya) and for the obtainment of happiness (svastaye); and also for granting us great and bright riches (maho divitmate rāye), viz. knowledge of the highest reality.

(102)

ऋषिः वामदेवः ।
छन्दः गायत्री ।
देवता बृहस्पतिः ॥

(संहितापाठः)

स इद् राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥१०२॥
(४.५०.७)

(पदपाठः)

सः । इत् । राजा । प्रतिऽजन्यानि । विश्वा । शुष्मेण । तस्थौ । अभि । वीर्येण ॥
बृहस्पतिम् । यः । सुऽभृतम् । बिभर्ति । वल्गुऽयति । वन्दते । पूर्वऽभाजम् ॥

(अन्वयः)

यः बृहस्पतिं पूर्वभाजं सुभृतं बिभर्ति वल्गूयति वन्दते स इत् राजा विश्वा प्रतिजन्यानि शुष्मेण वीर्येण अभितस्थौ ॥

The seer of this mantra is Vāmadeva; the metrical form is Trishṭup; and the deity invoked is Bṛhaspati.

(Sāyaṇa)

सः इत् स एव। राजा। मूर्धाभिषिक्तोऽन्यो वा राजमानः। प्रतिजन्यानि। जन्यं युद्धं प्रति बलानीत्यर्थः। प्रत्यर्थिजनपदानि वा। तानि। विश्वा सर्वाणि। शुष्मेण बलेन। वीर्येण शरीर-सामर्थ्येन वा। अभि अभिगम्य आक्रम्य। तस्थै तिष्ठति।

स इत्युक्तं क इत्याह। यः बृहस्पतिं बृहतां महतां पालयितारं देवम् उक्तलक्षणम्। पुरोहितं वा। सुभृतं सुष्ठु हविः स्तोत्रादिना अन्नाच्छादनादिना वा। बिभर्ति भरति। वल्गूयति स्तौति। वन्दते नमस्करोति। च। पूर्वभाजं इतरेभ्यः प्रथमसंभक्तारं कृत्वा। एवं यः करोति स एव तस्थौ इति॥

According to *Aitareya-brāhmaṇa* 8,26, this mantra as well as the following is eulogy of the presiding priest (Purohita-praśamsā). *Taittirīya-samhitā* (6,4,10) identifies Bṛhaspati as the priest of the gods (bṛhaspatir devānām purohitah).

(Dinakara)

स इत् स एव राजा विश्वा सर्वाणि प्रतिजन्यानि प्रतिपक्षबलानि शुष्मेण वीर्येण अभि तस्थौ अभितिष्ठति अभिभवतीत्यर्थः। (लकारव्यत्ययः।) यः राजा बृहस्पतिं तत्तुल्यं पुरोहितं पूर्वभाजं प्रथमतो राजहितकारिणं सुभृतं दानमानसत्कारैः सम्यगवस्थितिर्यथा स्यात्तथा बिभर्ति पोषयति वल्गूयति अर्चयति वन्दते नमस्करोति च॥१०२॥

The shining prince (rājā) who upholds and honours (subhṛtam bibharti) Bṛhaspati, and praises him (valgūyate) and propitiates him (vandate) by offering all the adoration first of all to him (pūrvabhājam), will surely emerge victorious (abhi tasthau), overcoming by his strength and valour (śushmeṇa vīryeṇa) all adversary conditions (viśvā pratijanyāni).



(103)

ऋषिः वामदेवः ।
छन्दः त्रिष्टुप् ।
देवता बृहस्पतिः ॥

(संहितापाठः)

**स इत् क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेवा नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति ॥**

(४.५०.८)

(पदपाठः)

**सः । इत् । क्षेति । सुऽधितः । ओकसि । स्वे । तस्मै । इळा । पिन्वते । विश्वऽदानीम् ॥
तस्मै । विशः । स्वयम् । एव । नमन्ते । यस्मिन् । ब्रह्मा । राजनि । पूर्वः । एति ॥**

(अन्वयः)

यस्मिन् राजनि ब्रह्मा पूर्वः एति स इत् सुधितः स्वे ओकसि क्षेति । तस्मै इळा विश्वदानीं पिन्वते । तस्मै विशः स्वयमेव नमन्ते ॥

The seer of the mantra is Vāmadeva; the metrical form is Trishṭup; and the deity invoked is Bṛhaspati.

(Sāyaṇa)

स इत् स एव। क्षेति निवसति। सुधितः सुष्ठु तृप्तः सन्। स्वे स्वकीय एव। ओकसि सवने। स एव। समृद्धो निर्बाधः सन्। सुखेनास्ते। तस्मा। इळा भूमिः। विश्वदानीं सर्वकालम्। पिन्वते वर्धते फलैः।

तस्मै। विशः प्रजाः। स्वयमेव नमन्ते। प्रणता भवन्ति। दण्डनमन्तरेण स्वयमेव दत्तकरा भवन्ति। यस्मिन् राजनि। ब्रह्मा। पूर्वः प्रथमः पूज्यः सन्। एति गच्छति। वर्तत इत्यर्थः॥

(Dinakara)

स एव स्वे ओकसि स्वे गृहे सुधितः सुप्रीतः सन् क्षेति निवसति ऐश्वर्यं वा प्राप्नोति। इळा पृथ्वी तस्मै विश्वदानीं सर्वदा पिन्वते वर्धते। विशः प्रजाः तस्मै स्वयमेव आ नमन्ते दत्तकरा भवन्ति। यस्मिन् राजनि ब्रह्मा ब्रह्माणः पूर्वः संमानितः सन् एति आगच्छति॥१०३॥

That prince in whom the spirit of the mantra (brahmā) arrives as foremost in importance (pūrva eti) will dwell happily and contented (sudhita ksheti) in his own abode (viz. in himself, sve okasi). The earth (iḷā) is all the time (viśvadānīm) bounteous and fruitful (pinvate) for him (tasmai), and the people (viśah) honour him (ānamante) of their own accord (svayam eva).



(104)

ऋषिः वामदेवः ।
छन्दः त्रिष्टुप् ।
देवता बृहस्पतिः ॥

(संहितापाठः)

अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।
अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः ॥
(४.५०.९)

(पदपाठः)

अप्रतिऽइतः । जयति । सम् । धनानि । प्रतिऽजन्यानि । उत । या । सऽजन्या ॥
अवस्यवे । यः । वरिवः । कृणोति । ब्रह्मणे । राजा । तम् । अवन्ति । देवाः ॥

(अन्वयः)

यः राजा आवस्यवे ब्रह्मणे वरिवः कृणोति अप्रतीतः प्रतिजन्यानि उत या सजन्या धनानि सं जयति । तं देवाः अवन्ति ॥

The seer of the mantra is Vāmadeva; the metrical form is Trishṭup; and the deity invoked is Bṛhaspati.

(Sāyaṇa)

स एव। अप्रतीतो अन्यैरप्रतिगतः सन्। यानि धनानि। प्रतिजन्यानि प्रतिस्पर्धिजनसम्बन्धीनि। उत अपि च। सजन्या जनसम्बन्धीनि धनानि। सं जयति। यो राजा। अवस्यवे अवसीयसे। धनरहिताय रक्षणमिच्छते ब्रह्मणे ब्राह्मणाय वा। प्रीणनमिच्छते। बृहस्पतये। वरिवः धनम्। कृणोति करोति। ददाति। स उक्तप्रकारेण महान् भवति। तमेव देवाः। अवन्ति रक्षन्ति॥

(Dinakara)

सः एव राजा अप्रतीतः प्रतिकूलैः शुत्रभिरप्राप्तः सन् धनानि सं जयति। कीदृशानि धनानि, प्रतिजन्यानि प्रतिजनेषु वैरिषु भवानि तथा सजन्या सजनेषु मित्रेषु भवानि। उत् समुच्चयार्थे। यद्वा धनानि धनोपेतानि परराष्ट्राणि सं जयति। तत्र प्रतिजन्यानि शत्रून् तथा या सजन्या शत्रुसहिता सेना तामपि जयति। यः राजा अवस्यवे दरिद्राय ब्रह्मणे ब्राह्मणाय वरिवः द्रव्यं कृणोति ददाति तं राजानं देवाः अवन्ति रक्षन्ति॥१०४॥

अयं चार्थोऽष्टमपञ्चिकायां पञ्चमाध्यायतृतीयस्वण्डेन "तदप्येतदृपिणोक्तमित्यादिना" (ऐ.ब्रा.८.२६) दर्शितः॥

इति दिनकरकृतौ ऋगर्थसारे तृतीयाष्टकान्तर्गतऋग्व्याख्या॥

That shining and princely being who provides fulfilment (varivah kṛṇoti) to the the mantra (brahmaṇe) which seeks to reside in him, remains altogether unhurt in his life (apratītah) and wins over (sam jayati) the wealth (dhanāni, viz. the wisdom) arising from others (pratijanyāni) as well as from himself (sajanyā). Him the luminous spirits guard (tam avanti devāh).



(105)

ऋषिः असूयव आत्रेयाः ।
छन्दः अनुष्टुप् ।
देवता अग्निः ॥

(संहितापाठः)

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् ।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥१०५॥
(५.२५.५)

(पदपाठः)

अग्निः । तुविश्रवःतमम् । तुविऽब्रह्माणम् । उत्ऽतमम् ॥
अतूर्तम् । श्रवयत्ऽपतिम् । पुत्रम् । ददाति । दाशुषे ॥

(अन्वयः)

अग्निः दाशुषे तुविश्रवस्तमं तुविब्रह्माणं उत्तमं अतूर्तं श्रावयत्पतिं पुत्रं ददाति ॥

The seer of the mantra is Asūyava, descendent of Atri; the metrical form is Anushṭup; and the deity invoked is Agni.

(Sāyaṇa)

अग्निः। तुविश्रवस्तमं अतिशयेन बह्वन्नम्। तुविब्रह्माणं बहुस्तोत्रम्। उत्तमं उत्कृष्टम्। अतूर्तं शत्रुभिरहिंसितम्। श्रावयत्पतिं श्रावयति विश्रुतान् करोति। पतीन् पालयितॄन्। पितॄन् इति स्वकर्मणा पितॄणां प्रख्यापक इति श्रावयत्पतिः। तथाविधं पुत्रम्। दाशुषे हवींषि दत्तवते यजमानाय। ददाति ददतु॥

(Dinakara)

अग्निः तुविश्रवस्तमम्। तुविशब्दो भूरिवाची तुवि श्रवः शास्त्रश्रवणं कीर्तिः वा अन्नं वा यस्य स तुविश्रवाः। अतिशयेन सः। तादृशम्। तुविब्रह्माणं बहुस्तोत्रम्। उत्तमम् उत्कृष्टम् अतूर्तं शत्रुभिरपराजितं श्रावयत्पतिम्। श्रावयन्ति स्वकर्मणा विधृतान् पितॄन् कुर्वन्ति ते श्रावयन्तः तेषां पतिं श्रेष्ठं पुत्रं दाशुषे दानशीलाय (यजमानाय) ददाति ददातु॥१०५॥

May Agni provide (dadāti) for him who is generous (dāśushe), offspring who is most rich in learning (tuviśravastamam), and rich in composing sacred chants (tuvibrahmāṇam), who is endowed with superior qualities (uttamam), who is unhurt by any adverse condition (atūrtam) and who brings celebrity to his forefathers (śrāvayatpatim).



(106)

ऋषिः विश्ववारा आत्रेयी ।
छन्दः त्रिष्टुप् ।
देवता अग्निः ॥

(संहितापाठः)

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥१०६॥
(५.२८.३)

(पदपाठः)

अग्ने । शर्ध । महते । सौभगाय । तव । द्युम्नानि । उत्ऽतमानि । सन्तु ॥
सम् । जाःपत्यम् । सुऽयमम् । आ । कृणुष्व । शत्रुऽयताम् । अभि । तिष्ठ । महांसि ॥

(अन्वयः)

अग्ने । महते सौभगाय शर्ध । तव द्युम्नानि उत्तमानि सन्तु । जास्पत्यं सुयमं सं आकृणुष्व । शत्रूयतां महांसि अभि तिष्ठ ॥

The seer of the mantra is Viśvavārā, daughter of Ātreya; the metrical form is Trishṭup; and the deity invoked is Agni.

(Sāyaṇa)

हे अग्ने। त्वं। महते प्रभूताय। सौभगाय अस्माकं शोभनधनत्वाय। शर्ध शत्रून् सहस्व। तथा। तव सम्बन्धीनि द्युम्नानि धनानि तेजांसि वा। उत्तमानि उत्कृष्टानि। सन्तु भवन्तु। किंच। हे अग्ने। सं जास्पत्यं। जा जाया च पतिश्च जायापती। तयोः कर्म जास्पत्यम्। तत्। सुयमं सुष्ठु नियमनोपेतम्। अन्योन्य

संश्लिष्टमित्यर्थः। समा कृणुष्व सम्यक् कुरुष्व। अपि च। शत्रूयतां शत्रुमात्मन इच्छताम्। सपत्नानां। महांसि तेजांसि। अभि तिष्ठ आक्रमस्व॥

This Mantra is recited as a yājyāmantra in the ritual known as Svishṭikṛddhoma (*Āśvalāyana-śrauta-sūtra,* 2,12)

(Dinakara)

हे अग्ने त्वं महते प्रभूताय सौभगाय अस्माकं शोभनधनत्वाय शर्ध शत्रून् सहस्व। तव संबन्धीनि द्युम्नानि धनानि तेजांसि वा उत्तमानि सन्तु। जास्पत्यम्। जाया च पतिश्च जायापती तयोः कर्म जास्पत्यम् तत् सुयमं सुष्ठु नियमोपेतम् अन्योन्यसंश्लिष्टमित्यर्थः सम् आ कृणुष्व सम्यक् कुरुष्व। किं च शत्रूयतां शत्रून् आत्मनः इच्छतां शत्रूयतां सपत्नानां सहांसि तेजांसि अभि तिष्ठ आक्रमस्व॥१०६॥

O Agni, eliminate the contrary conditions (śardha) so that we may come to possess great and wholesome welfare (mahate saubhagāya); may the lustre that is yours (tava dyumnāni) be most uplifting for us (uttamāni santu). Let man and woman be well-disciplined and in perfect accord (jāspatyam suyamam ā kṛṇushva), and may the might (mahāmsi) of the evil forces (śatrūyatām) be broken by you (abhi tishṭha).

There are only two mantras selected from the fifth maṇḍala. Dinakara adds after this:

विस्तृतिभीत्याऽन्यऋग्व्याख्या न लिखिता॥ इति दिनकरकृतौ ऋगर्थसारे चतुर्थाष्टकान्तर्गतऋग्व्याख्या॥



(107)

ऋषिः पायुर्भारद्वाजः ।
छन्दः त्रिष्टुप् ।
देवता वर्म ॥

(संहितापाठः)

जीमूतस्येव भवति प्रतीकं यद् वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥१०७॥
(६.७५.१)

(पदपाठः)

जीमूतस्यऽइव । भवति । प्रतीकम् । यत् । वर्मी । याति । सऽमदाम् । उपऽस्थे ॥
अनाविद्धया । तन्वा । जय । त्वम् । सः । त्वा । वर्मणः । महिमा । पिपर्तु ।

(अन्वयः)

समदां उपस्थे यत् वर्मी याति प्रतीकं जीमूतस्येव भवति । त्वं अनाविद्धया तन्वा जय ।
वर्मणः सः महिमा त्वा पिपर्तु ॥

The seer of the mantra is Pāyu, son of Bharadvāja; the metrical form is Trishṭup; and the deity addressed is the armour (varma). *Āśvalāyana-gṛhya-sūtra* (3,5) mentions that this and the following thirteen verses in the hymn are to be recited by the priest while sending the king to the battle-field, well-armoured and equipped with various weapons.

(Sāyaṇa)

समदां संग्रामाणाम्। उपस्थ उपस्थाने। सति। यद् यदायं राजा। वर्मी कवची। याति। तदा लोहमयेन वर्मणा सन्नद्धस्य राज्ञः। प्रतीकं रूपम्। जीमूतस्येव मेघस्येव। भवति। मेघस्य यादृशं रूपं तादृशमस्य भवतीत्यर्थः। हे राजन्। त्वं अनाविद्धया शत्रुभिरबाधितया। तन्वा शरीरेण। शत्रून् जय। वर्मणः स तादृशो महिमा। त्वा त्वाम्। पिपर्तु पालयतु॥

(Dinakara)

समदा संग्रामाणाम् उपस्थे उपस्थेन सति यत् यदा अयं राजा वर्मी कवची याति तदा लोहमयेन वर्मणा सन्नद्धस्य राज्ञः प्रतीकं रूपं जीमूतस्येव मेघस्येव भवति। मेघस्य यादृशं कृष्णं रूपं तादृशमस्य भवतीत्यर्थः। हे राजन् अनाविद्धया शत्रुभिरबाधितया तन्वा शरीरेण शत्रून् त्वं जय। स तादृशो वर्मणः महिमा त्वा त्वां पितर्तु पालयतु (स त्वेति, "ऊष्मा परिलुप्यते त्रयाणां (स्वरवर्जम्)" (ऋ.प्रा. २.११) इत्युष्मलोपः) ॥१०७॥

Dinakara adds after this:

पञ्चमाष्टकान्तर्गतऋचां विस्तरभीत्या व्याख्या न लिखिता॥

इति दिनकरकृतौ ऋगर्थसारे पञ्चमाष्टकान्तर्गतऋग्व्याख्या॥

When (yad) the warrior sets out for the battle-field (samadām upasthe yāti), well-armoured (varmī), his form (pratīkam) would resemble a dark, rain-bearing cloud (jīmūtasyeva). Then, O warrior (tvam), you will be victorious (jaya) with your invincible body (anāviddhayā tanvā). May that might (sah mahimā) of the armour (varmaṇah) protect you (tvā pipartu).

(Note : The warrior here refers to the aspirant of spiritual gains)

(108)

ऋषिः प्रियमेधः ।
छन्दः गायत्री ।
देवता ऋक्षाश्वमेधदानप्रशंसा ॥

(संहितापाठः)

न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः ।
अवद्यमधि दीधरत् ॥१०८॥
(८.६८.१९)

(पदपाठः)

न । युष्मे इति । वाजऽबन्धवः । निनित्सुः । चन । मर्त्यः ॥
अवद्यम् । अधि । दीधरत् ॥

(अन्वयः)

वाजबन्धवः निनित्सुः मर्त्यः चन युष्मे अवद्यं न अधि दीधरत् ॥

The seer of the mantra is Priyamedha, son of Āngiras; the metrical form is Gāyatrī; and the deity is Dāna-praśamsā of two kings Ṛksha and Aśvamedha.

(Sāyaṇa)

हे वाजबन्धवः अन्नबन्धवः अन्नप्रदाः। एवं पुत्राणां पितृपुत्ररूपाणां षण्णां वा सम्बोधनम्। हे राजानः। युष्मे युष्मासु। निनित्सुश्चन निन्दकोऽपि। मर्त्यः मनुष्यः। अवद्यं निन्दाम्। नादि दीधरत् न अन्वधारयत्। नारोपयति युष्मासु। अतोऽनिन्द्या यूयमिति दातॄणां स्तुतिः॥

(Dinakara)

हे वाजबन्धवः अन्नदातारः युष्मे युष्मासु निनित्सुः निन्दां कर्तुमिच्छुः। च-न-शब्दौ अप्यर्थे। अवद्यं पापं न अधि दीधरत् न धारयति। निन्दाप्रसङ्गेनाप्यन्नदातुः नामग्रहणात् पुण्यमेव भवतीति भावः॥१०८॥

इति दिनकरकृतौ ऋगर्थसारे षष्ठाष्टकान्तर्गतऋग्व्याख्या॥

O generous ones (Vājabandhavah), your generosity is such that even (chana) the incurably critical person (ninitsuh martyah) will not speak uncharitably (avadyam na adhi dīdharat) about you (yushme).

(109)

ऋषिः लुशो धानाकः ।
छन्दः जगती ।
देवता विश्वेदेवाः ॥

(संहितापाठः)

महद्द्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणाम् ।
यथा वसु वीरजातं नशामहै तद् देवानामवो अद्या वृणीमहे ॥१०९॥
(१०.३६.११)

(पदपाठः)

महत् । अद्य । महताम् । आ । वृणीमहे । अवः । देवानाम् । बृहताम् । अनर्वणाम् ॥
यथा । वसु । वीरऽजातम् । नशामहै । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥

(अन्वयः)

अद्य महतां बृहतां अनर्वणां देवानां महत् अवः यथा वसु वीरजातं नशामहै आ वृणीमहे । देवानां तत् अवः अद्य वृणीमहे ॥

The seer of the mantra is Luśa, son of Dhanāka; the metrical form is Jagatī; and the deities invoked are Viśve-devāh (All-gods).

(Sāyaṇa)

अद्य अस्मिन् अहनि। महतां श्रेष्ठानाम्। बृहतां वृद्धानाम्। अनर्वणां अप्रतिगतानाम्। देवानां इन्द्रादीनाम्। सम्बन्धि। महत् अधिकम्। अवः रक्षणम्। आ वृणीमहे प्रार्थयामहे। किञ्च। वयम्। यथा वसु धनम्। वीरजातं अपत्यजातम्। च। नशामहै प्राप्नुयाम। तथा ते देवाः कुर्वन्तु इति शेषः॥

(Dinakara)

अद्य अस्मिन्नहनि महतां श्रेष्ठानां बृहतां वृद्धानाम् अनर्वणाम् अप्रतिगतानाम् इन्द्रादीनां सम्बन्धि महत् अधिकम् अवः रक्षणं (आ वृणीमहे) प्रार्थयामहे। किं च वयं यथा वसु धनं वीरजातम् अपत्यजातं च नशामहे प्राप्नुयाम। तथा देवाः कुर्वन्त्विति शेषः॥१०९॥

We earnestly solicit (ā vṛṇīmahe) today (adya) the especial protection (mahat avah) of the great, mighty and invincible gods (mahatām bṛhatām anarvaṇām devānām) for our obtaining (naśāmahai) riches (vasu, knowledge of God) and valiant progeny (vīrajātam, viz. firm faith in askesis). Now we seek for (adya vṛṇīmahe) that incomparable (tat) protection (avah) of the gods (devānām).

The deva here means the wise people who shine and make everything shine for us. Their blessing is sought for.

(110)

ऋषिः लुशो धानाकः ।
छन्दः जगती ।
देवता विश्वेदेवाः ॥

(संहितापाठः)

महो अग्नेः संमिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद् देवानामवो अद्या वृणीमहे ॥११०॥
(१०.३६.१२)

(पदपाठः)

महः । अग्नेः । सम्ऽइधानस्य । शर्मणि । अनागाः । मित्रे । वरुणे । स्वस्तये ॥
श्रेष्ठे । स्याम । सवितुः । सवीमनि । तत् । देवानाम् । अवः अद्य । वृणीमहे ॥

(अन्वयः)

समिधानस्य महः अग्नेः शर्मणि स्याम । अनागाः (स्याम) । मित्रे वरुणे सवितुः सवीमनि स्वस्तये । अद्य देवानां तत् अवः वृणीमहे ॥

The seer of the mantra is Luśa, son of Dhanāka; the metrical form is Jagatī; and the deities invoked are Viśve-devāh.

(Sāyaṇa)

समिधानस्य समिध्यमानस्य। महो महतः। अग्नेः। शर्मणि सुखे। वयं स्याम भवेम। किञ्च वयम्। अनागाः अनागाः। वचनव्यत्ययः। स्याम। अपि च। मित्रे वरुणे मित्रावरुणयोः। षष्ठ्यर्थे सप्तमी। सवितुश्च। सवीमनि प्रसवे। स्वस्तये सर्वप्रकारा-विनाशाय। स्याम। सिद्धमन्यत्॥

(Dinakara)

समिधानस्य समिध्यमानस्य महः महतः अग्नेः शर्मणि सुखे वयं स्याम भवेम। किं च वयं अनागाः अनागसः (वचनव्यत्ययः) स्याम। किं च मित्रे वरुणे मित्रावरुणयोः (षष्ट्यर्थे सप्तमी) स्वस्तये (स्याम)। (श्रेष्ठे सवितुः च सवीमनि प्रसवे स्वस्तये सर्वप्रकाराविनाशाय स्याम॥११०॥

May we rest in the bliss (śarmaṇi syāma) of the mighty Agni (mahah agneh) that we kindle in our hearts (samidhānasya), and may we be free from evil (anāgāh) that takes us away from Agni. May we find our welfare (svastaye) in Mitra, and Varuṇa (Maitrāvaruṇa) and in the impulsions of Savitṛ (savituh savīmani). We now solicit (adya vṛṇīmahe) the unique protection (tat avah) of the gods (devānām).



(111)

ऋषिः लुशो धानाकः ।
छन्दः त्रिष्टुप् ।
देवता विश्वेदेवाः ॥

(संहितापाठः)

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।
ते सौभगं वीरवद् गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥१११॥
(१०.३६.१३)

(पदपाठः)

ये । सवितुः । सत्यऽसवस्य । विश्वे । मित्रस्य । व्रते । वरुणस्य । देवाः ।
ते । सौभगम् । वीरऽवत् । गोऽमत् । अप्नः । दधातन । द्रविणम् । चित्रम् ।
अस्मे इति ॥

(अन्वयः)

The seer of the mantra is Luśa, son of Dhanāka; the metrical form is Trishṭup; and the deities invoked are Viśvedevāh.

(Sāyaṇa)

ये विश्वेदेवाः। सत्यसवस्य सत्यप्रसवस्य। सवितुः मित्रस्य वरुणस्य मित्रावरुणयोश्च। व्रते प्रसवाख्ये कर्मणि। भवन्ति। ते। यूयम्। सौभगं सौभाग्यम्। वीरवत्पुत्राद्युपेतम्। गोमद् गोयुक्तम्। चित्रं पूजनीयम्। द्रविणं धनम्। चाप्नः कर्म। च। अस्मे मह्यम्। दधातन प्रयच्छत॥

(Dinakara)

ये विश्वे देवाः सत्यसवस्य सत्यप्रसवस्य सवितुः मित्रस्य (वरुणस्य) मित्रावरुणयोश्च व्रते प्रसवाख्ये कर्मणि भवन्ति ते यूयं सौभगं सौभाग्यं च, वीरवत् पुत्राद्युपेतं गोमत् योयुक्तम् अप्नः कर्म च, अस्मे अस्मासु चित्रं द्रविणं च, दधातन प्रयच्छत ॥१११॥

O ye All-gods, ye are involved in the manifest ordainment (vrate) of the god Savitṛ who brings forth the real (satyasavasya savituh) and also in the activities of Mitrā-varuṇa.

(112)

ऋषिः लुशो धानाकः ।
छन्दः त्रिष्टुप् ।
देवता विश्वेदेवाः ॥

(संहितापाठः)

सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥११२॥
(१०.३६.१४)

(पदपाठः)

सविता । पश्चातात् । सविता । पुरस्तात् । सविता । उत्तरात्तात् । सविता । अधरात्तात् ॥ सविता । नः । सुवतु । सर्वऽतातिम् । सविता । नः । रासताम् । दीर्घम् । आयुः ॥

(अन्वयः)

सविता पश्चत्तात् सविता पुरस्तात् सविता उत्तरात्तात् सविता अधरात्तात् नः सर्वतातिं सुवतु । सविता नः दीर्घं आयुः रासताम् ॥

The seer of the mantra is Luśa, son of Dhanāka; the metrical form is Trishṭup; and the deities invoked are Viśvedevāh.

(Sāyaṇa)

पश्चात्तात् पश्चिमतः। स्थितः। सविता। पुरस्तात् पूर्वतः स्थितः। सविता। उत्तरात्तात् उत्तरतः। स्थितश्च। सविता। नः अस्माकम्। सर्वतातिं सर्वं अभिलषितं धनादिकम्। सुवतु प्रेरयतु। किञ्च। सविता एव। नः अस्मभ्यम्। दीर्घं बहुकालीनम्। आयुः रासतां ददातु। बहुधा सवितृ पदग्रहणमत्यन्तमादरार्थं॥

(Dinakara)

सविता पश्चात्तात् पश्चिमतः स्थितः। पुरस्तात् पूर्वतः स्थितः। उत्तरात्तात् उत्तरतः स्थितः। अधरात्तात् अधरतः स्थितः। सविता नः अस्माकं सर्वतातिं सर्वमभिलषितं सुवतु प्रेरयतु। किं च सविता नः अस्मभ्यं दीर्घम् आयुः रासतां ददातु। पुनः पुनः सवितृपदावृत्तिरादरार्था॥११३॥

इति दिनकरकृतौ ऋगर्थसारे सप्तमाष्टकान्तर्गतानाम् ऋचां व्याख्या॥

May Savitṛ provide us (nah suvatu) with all that makes us complete (sarvatātim), being alround us, in the western direction (paśchāttāt), in the eastern direction (purastāt), in the northem direction (uttarāttāt) and in the southern direction (adharāttāt). May Savitr bestow on us (nah rāsatām) long life (dīrgham āyuh).



(113)

ऋषिः सप्तगुः ।
छन्दः त्रिष्टुप् ।
देवता इन्द्रो वैकुण्ठः ॥

(संहितापाठः)

जगृभ्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दा ॥११३॥
(१०.४७.१)

(पदपाठः)

जगृभ्म । ते । दक्षिणम् । इन्द्र । हस्तम् । वसुऽयवः वसुऽपते । वसूनाम् ॥
विद्म । हि । त्वा । गोऽपतिम् । शूर । गोनाम् । अस्मभ्यम् । चित्रम् ।
वृषणम् । रयिम् । दाः ॥

(अन्वयः)

वसूनां वसुपते, ते दक्षिणं हस्तं वसूवयः जगृभ्म । शूर, त्वा गोनां गोपतिं विद्म ।
अस्मभ्यं चित्रं वृषणं रयिं दाः ॥

The seer of this mantra is Saptagu, of the lineage of Angirasa; the metrical form is Trishṭup; and the deity invoked is Indra, son of Vikuṇṭhā (an asura woman).

(Sāyaṇa)

(विकुण्ठा नामासुरस्त्री। सा चेन्द्रसदृशं पुत्रं कामयमाना कृच्छ्रचान्द्रायणादिकं तपस्तेपे। मत्सदृशोऽन्यः कश्चिन्मा जनिष्टेति बुद्ध्वेन्द्र एव तस्याः पुत्रोऽजायत। तादृशो वैकुण्ठ इन्द्रो देवता॥)

(Dinakara)

वसूनां वसुपते बहूनां धनानां स्वामिन् इन्द्र। ते तव। दक्षिणं हस्तं। वसूयवो वसुकामा। वयम्। जगृभ्म गृह्णीमः। यथा बहुप्रदस्यार्थिनो मह्यं अदत्त्वा न गन्तव्यं इति हस्तं गृह्णन्ति तद्वत्। हे शूर, विक्रान्त इन्द्र। त्वा त्वाम्। गोनां गोपतिम्। अत्र वृत्त्यवृत्तिभ्यां स्वमित्वं बहुत्वं च प्रतिपाद्यते। बह्वीनां गवां गोपतिम्। विद्म जानीमः। अतः अस्मभ्यं। चित्रं चायनीयम्। वृषणं वर्षकम्। रयिं धनम्। दाः देहि॥

''जागृभ्माष्टौ सप्तगुर्वैकुण्ठम् (इन्द्रं) तुष्टाव'' (सर्वानुक्रमणी)। वसूनां वसुपते बहुधनस्वामिन् (उदपेषं पिनष्टीतिवत्पुनर्वसुपदग्रहणम्) हे इन्द्र ते दक्षिणं हस्तं वसूयवः वसुकामाः वयं जगृभ्म गृह्णीमः। हे शूर वयं त्वां गोनां गोपतिं बहुगोस्वामिनं विद्म जानीमः। अतः अस्मभ्यं चित्रं चायनीयं वृषणं वर्षकं रयिं धनं दाः देहि॥११३॥

O Indra, protector of the best of all riches viz. the light of the real, (vasūnām vasupate), we grasp (jagṛbhma) your right hand (dakshiṇam), desiring the riches (vasūvayah). O valiant one (śūra), we know (vidma) that you are the protector of the rays of light (gonām gopatim). Bestow on us (dāh) the wealth (rayim) which is full of splendour (chitram) and showering nourishment (vṛshaṇam).



(114)

ऋषिः देवाः ।
छन्दः त्रिष्टुप् ।
देवता अग्निः सौचीकः ॥

(संहितापाठः)

महत् तदुल्बं स्थविरं तदासीद् येनाविष्टितः प्रविवेशिथापः ।
विश्वा अपश्यद् बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ॥११४॥
(१०.४१.१)

(पदपाठः)

महत् । तत् । उल्बम् । स्थविरम् । तत् । आसीत् । येन । आऽविष्टितः ।
प्रऽविवेशिथ । अपः ॥ विश्वाः । अपश्यत् । बहुधा । ते । अग्ने ।
जातऽवेदः । तन्वः । देवः । एकः ॥

(अन्वयः)

(हे) अग्ने, येन आविष्टितः अपः प्रविवेशिथ तत् उल्बं महत् स्थविरं आसीत् । (हे) जातवेदः, ते शिवाः तन्वः एकः देवः अपश्यत् ॥

The seers of the mantra are devas (the luminous spirits who searched for Agni in the waters); the metrical form is Trishṭup; and the deity addressed is Agni Sañchīka.

(Sāyaṇa)

तदुल्बं वक्ष्यमाणं प्रावरणम्। महत् स्थविरं अत्यन्तं स्थूलम्। च। तदासीत् येनोल्बेनाविष्टितः सन्। हे अग्ने। प्रविवेशिथापः उदकानि प्रविष्टवानसि। हे अग्ने जातवेदः जातप्रज्ञानः। विश्वाः सर्वाः। तनूः अङ्गानि। बहुधा बहुप्रकारम्। एकः देवः। अपश्यत् दृष्टवान्॥

(अग्नेस्त्रयो ज्यायाँसो भ्रातर आसन्। ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त। सोऽग्निरबिभेद् इत्थं वाव स्य आर्तिमारिष्यतीति। स निलायत। सोऽपः प्राविशत्। तं देवताः प्रैषमैच्छन्॥

(Taittirīya-samhitā 2,6,6)

(Dinakara)

"महत्तन्नवात्र युजोऽग्निवाक्यम्। विश्व इत्युत्तरं च षट्कमयुजो देवानाम्" (सर्वानुक्रमणी १०.५९-५२)। महत्तत्र्याख्या त्रुटिता। अयं शोधः सप्तमाष्टकस्थः (?)

देवानां हविर्वहनेन दैत्यैर्हतेष्वग्रजेपु अग्निः अपः प्राविशत्। स च मत्स्यैर्वरुणाय प्रदर्शितः। ततो देवाः अग्निम् अब्रुवन्। (तथा च) "अग्नेस्त्रयो ज्यायांसो भ्रातरः आसन्" (तै.सं. २.६.६.१.) इत्यादि तैत्तिरीयब्राह्मणे।

उल्बशब्देन गर्भप्रावरणमुच्यते। तेन अज्ञानं लक्ष्यते। हे अग्ने तत् उत्तरचरणे वक्ष्यमाणमुल्बं महत् स्थूलं स्थविरं स्थिरं च आसीत् येन उल्बेन (आविष्टितः) वेष्टितः त्वम् (आपः प्रविवेशिथ) जलानि प्रविष्टवान् असि। वैरिगृहे प्रविष्ट इति भावः। हे जातवेदः जातप्रज्ञ अग्ने एकः देव ते सर्वाः तन्वः बहुधा बहुप्रकारम् अपश्त् दृष्टवान्। किमर्थं गुप्तोऽसीति भावः॥११४॥

O Agni, the covering (ulbam) with which you concealed yourself (āveshṭitah) entering into the waters (apah praviveśitha) is both great (mahat) and firm (sthaviram). (It refers to ignorance, ajñāna). O knower of all things born (jātavedāh). The one god (deva ekah, the light inherent in all the gods), however, has seen through (apaśyat) all the multitude of forms that you have assumed (viśvā tanvah) in those many forms themselves (bahudhā).

(115)

ऋषिः अग्निः सौचीकः ।
छन्दः त्रिष्टुप् ।
देवता देवाः ॥

(संहितापाठः)

को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।
काह मित्रावरुणा क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ॥११५॥
(१०.५१.२)

(पदपाठः)

कः । मा । ददर्श । कतमः । सः । देवः । यः । मे । तन्वः । बहुधा ।
परिऽअपश्यत् ॥ क्व । अह । मित्रावरुणा । क्षियन्ति । अग्नेः । विश्वाः ।
सम्ऽइधः । देवऽयानीः ॥

(अन्वयः)

कः मा ददर्श? यः मे तन्वः बहुधा पर्यपश्यत् सः देवः कतमः। (हे) मित्रावरुणा, अग्नेः समिधः विश्वाः देवयानीः क्व क्षियन्ति ?

The seer of this mantra is Agni Sauchīka (who speaks to the devas in response to their utterance in the previous mantra); the metrical form is Trishṭup; and the deities addressed are the devas (who were the seers of the previous mantra).

(Sāyaṇa)

इदमग्नेर्वाक्यम्। एको देवोऽपश्यदित्युक्ते पृच्छति। कः। म। माम्। ददर्श दृष्टवान्। स देवः कतमः। यः। मे मम। तन्वः तनूर्बहुधा बहुप्रकारम् स्थिताः। पर्यपश्यत् परिदृष्टवान्। (हे) मित्रावरुणा मित्रावरुणौ। अग्नेः मम। विश्वाः सर्वाः। समिधो दीप्ताः। देवयानीः देवयानसाधनभूताः। तन्वः। दृष्टा इत्युक्तम्। यदि दृष्टाः चेत् तर्हि क्व क्षियन्ति क्व निवसन्ति। इत्येवं देवानां पुरतो वर्तमानौ मित्रावरुणौ आह अग्निः॥

(Dinakara)

हे मित्रावरुणौ मां कः देवः अपश्यत्। सः देवः कतमः यः मे तन्वः बहुधा बहुप्रकारं दृष्टवान्। दृष्टाश्चेद्वदतु। मम अग्नेः विश्वाः सर्वाः समिधः दीप्ताः देवयानीः देवयानसाधनभूताः क्व क्षियन्ति ऐश्वर्येण वर्त्तन्ते। देवानां पुरस्तात् मित्रावरुणौ स्थिताविति तत्सम्बोधनम्॥११५॥

Agni asks the devas, in particular the twin-devas, Mitra and Varuṇa: who indeed among you all (kaḥ) beheld me (mā dadarśa)? which one among you (katamah) has seen my manifold forms alround (me tanvah bahudhā pari apaśyat)? O Mitra and Varuṇa, tell me where indeed (kva āha) do the well illumined (samidhah) vehicles of all the gods (devayānīh) that belong to Agni (agneh) dwell (kshiyaṅti)?

(116)

ऋषिः देवाः ।

छन्दः त्रिष्टुप् ।

देवता अग्निः सौचीकः ॥

(संहितापाठः)

ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु ।
तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ॥११६॥
(१०.५१.३)

(पदपाठः)

ऐच्छाम । त्वा । बहुधा । जातऽवेदः । प्रऽविष्टम् । अग्ने । अप्ऽसु ।
ओषधीषु ॥ तम् । त्वा । यमः । अचिकेत् । चित्रभानो इति चित्रऽभानो ।
दशऽअन्तरुष्यात् । अतिऽरोचमानम् ॥

(अन्वयः)

जातवेदः अग्ने, अप्सु ओषधीषु बहुधा प्रविष्टं त्वा ऐच्छाम । चित्रभानो, दशान्तरुष्यात् अतिरोचमानं तं त्वा यमः अचिकेत् ॥

The seers of the mantra are the devas, who answer Agni; the metrical form is Trishṭup;. and the deity addressed is Agni.

(Sāyaṇa)

एवमग्निना पृष्टा देवाः अग्निं ब्रुवन्ति।

हे जातवेदः जातप्रज्ञ अग्ने। त्वा त्वां अन्वैच्छाम। कीदृशं त्वाम्। अप्सु उदकेषु। ओषधीषु च। बहुधा प्रविष्टम्। अन्विष्य च। तम् तादृशम् प्रविष्टम्। त्वा त्वाम्। यमो देवः। अचिकेत् ज्ञातवान्। हे चित्रभानो

चायनीयरश्मे। कुत्र स्थितं ज्ञातवान् इति तदुच्यते। दशान्तरुष्यात्। अन्तरुष्यं गूढं आवासस्थानं। तच्च स्थानं दशसंख्योपेतम्। तादृशं स्थानं अतिरोचमानं अतीत्य प्रकाशमानम्। अग्नेर्हि गूढानि दश स्थानानि भवन्ति पृथिव्यादयस्त्रयो लोका अग्निवाय्वादित्यास्त्रयो देवाः आप ओषधयो वनस्पतयः प्राणिशरीरमिति दश स्थानानि॥

(Dinakara)

हे जातवेदः वयम् अप्सु ओषधीषु च प्रविष्टं त्वाम् अनु ऐच्छाम अन्वेषितवन्तः। तादृशं त्वा यमः देवः अचिकेत् ज्ञातवान् हे चित्रभानो। क्व माम् ददर्शेत्यस्योत्तरमुक्तम्। क्व क्षियन्तीत्यस्योत्तरं विशेषेणाह। दश दशसंख्याकात् अन्तः गोप्यात् उष्यात् स्थानात् अतिरोचमानम् अतिप्रकाशमानम्। पृथिव्यन्तरिक्षस्वर्गास्त्रयो लोकाः अग्निवाय्वादित्यास्त्रयो देवाः आप ओषधयो वनस्पतयः प्राणशरीरमिति दश (अग्नेः गूढानि) स्थानानीति॥११६॥

The gods tell Agni:

O Agni who knows all things born (jātavedah), we eagerly looked for you all over, desiring you (tvā aichchhāma), for you had entered manifoldly (bahudhā pravishṭam) in all the waters (apsu) and in all the plants (oshadhīshu). O Agni whose rays of light are splendid and fascinating (chitra bhāno), it is one who is self-restrained (yama) that will understand you well (achiket), who shines brilliantly in all the ten quarters within (daśāntarushyāt atirochamānam).

(117)

ऋषिः अग्निः सौचीकः ।
छन्दः त्रिष्टुप् ।
देवता देवाः ॥

(संहितापाठः)

होत्रादहं वरुण बिभ्यदायं नेदेव मां युनजन्नत्र देवाः ।
तस्यं मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥११७॥
(१०.५१.४)

(पदपाठः)

होत्रात् । अहम् । वरुण । बिभ्यत् । आयम् । न । इत् । एव । मा । युनजन् । अत्र । देवाः ॥ तस्य । मे । तन्वः । बहुधा । निऽविष्टाः । एतम् । अर्थम् । न । चिकेत । अहम् । अग्निः ॥

(अन्वयः)

वरुण, अहं होत्रात् बिभ्यत् अयं । मां एव अत्र देवाः न युनजत् इत् । तस्य मे तन्वः बहुधा निविष्टाः । एतमर्थं अग्निः अहं न चिकेत ॥

The seer of this mantra is Agni Sauchīka, who speaks to the devas; the metrical form is Trishṭup; and the deities addressed are the devas.

(Sāyaṇa)

अनया देवगणा मां ज्ञातवन्त इति निश्चित्य गूहनस्य प्रयोजनमाह -

हे वरुण। देव। अहं। होत्रात् होतव्यात्। हविर्वहनात् इत्यर्थः। तस्मात् बिभ्यत्। आयं आगतवानस्मि। अतो मा माम्। एवं पूर्वप्रकारेण। अत्र अस्मिन् हविर्वहनप्रयोजने। न उद्युनजन् मैव योजयन्त देवाः। तस्य

तादृशस्य। बिभ्यतस्य। मे। तन्वः। बहुधा। निविष्टा अप्सु। एतदर्थं एतद् हविर्वहनकार्यं। अग्निः अहं। न चिकेत न बुध्ये न अङ्गीकरोमि॥

(Dinakara)

गुप्तत्वे कारणमाह। वरुणेत्युपलक्षणम्। अहं देवाः अहं होत्रात् हविर्वहनाख्यात् कर्मणः बिभ्यत् भयं प्राप्नुवान् आयम् आगतवानस्मि। अतः मा (माम्) अत्र हविर्वहने न (इत्) युनजन् नैव योजयत। तस्य बिभ्यतः मे तन्वः बहुधा ओषध्यादिषु निविष्टाः। एतं हविर्वहनाख्यामर्थम्। (अहम् अग्निः) न चिकेत नाङ्गीकरोमि॥११७॥

O luminous Varuṇa (deva Varuṇa), scared of the toil involved in the sacrifice (hotrāt bibhyat), I have come here and hid myself (āyam). The gods (devāh) will surely not associate me (na yunajat it) with this task (atra) any more. My forms (me tanvah), which are multitudinous (bahudhā) are concealed (nivishṭāh), scared as I am (tasya). It is therefore (etam artham) I, Agni, can never be known (na chiketa).

(118)

ऋषिः देवाः ।
छन्दः त्रिष्टुप् ।
देवता अग्निः सौचीकः ॥

(संहितापाठः)

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने ।
सुगान् पथः कृणुहि देवयानान् वह हव्यानि सुमनस्यमानः ॥११८॥
(१.५१.५)

(पदपाठः)

आ । इहि । मनुः । देवऽयुः । यज्ञऽकामः । अरंऽकृत्य । तमसि । क्षेषि । अग्ने ॥
सुऽगान् । पथः । कृणुहि । देवऽयानान् । वह । हव्यानि । सुऽमनस्यमानः ॥

(अन्वयः)

अग्ने, एहि । मनुः देवयुः यज्ञकामश्च । अरंकृत्य तमसि क्षेषि । देवयानान् पथः सुगान् कृणुहि । सुमनस्यमानः हव्यानि वह ॥

The seers of this mantra are the devas; the metrical form is Trishṭup; and the deity addressed is Agni Sauchīka.

(Sāyaṇa)

अग्निना एवमुक्ता देवाः पुनरग्निं आह्वयन्ति।

हे अग्ने। एहि आगच्छ। मनुः मनुष्यः यष्टा। मननीयः मनू राजा वा। देवयुः देवान् यष्टुमिच्छन् यज्ञकामश्च भवति। अत एहि। किं कुर्वन् यज्ञकामः भवतीति चेत् उच्यते। अरंकृत्य केवलं तेजःपुञ्जमेव

अलंकुर्वन्। यद्वा इदं उत्तरत्र सम्बध्यते। त्वं अलंकृत्यात्मानं अलंकुर्वन्। तमसि अन्यैः ज्ञातुमशक्ये अन्धकारे। क्षेषि निवससि। हे अग्ने आगत्य च। देवयानान् देवान् प्रति यैर्मनुष्या गच्छन्ति तान्। पथः मार्गान्। सुगान्। कृणुहि कुरु।

संमत्या नो यज्ञनिष्पत्तेर्देवयानाः सुपथा भवन्ति। वह हव्यान्यस्मदीयानि। सुमनस्यमानः सौमनस्यमाचरन्। त्वम्॥

(Dinakara)

हे अग्ने एहि आगच्छ। मनुः मनुष्य देवयुः देवान् यष्टुमिच्छन् यज्ञकामश्च भवति (अत एहि)। त्वम् अरंकृत्य तेजः पुञ्जमात्मानं च अलंकुर्वन् तमसि अन्धकारे (क्षेषि) निवससि। अज्ञानेनावारणात् त्वं जीवैर्ज्ञातुमशक्य इति भावः। हे अग्ने त्वं देवयानान् देवहविर्वहनसाधनान् पथः मार्गान् सुगान् सुखेन गन्तुं शक्यान् कृणुहि कुरु। अस्मदीयानि हव्यानि सुमनस्यमानः सन्तुष्टः सन् वह॥११८॥

Come (ehi), O Agni; the man (manuh) seeks to make offerings to the gods (devayuh) and desires to worship and honour the gods (yajñakāmah). But you abide in darkess (tamasi ksheshi), unknown to mortals, being a mere mass of light (aram kṛtya). Come out, O Agni, and render (kṛṇuhi) the paths in which the gods travel (devayānān pathah) easy for us to traverse (sugān). Carry our offerings (vaha havyāni) to the gods, with a pleasant and benevolent feeling (sumanasyamānah).

(119)

ऋषिः अग्निः सौचीकः ।

छन्दः त्रिष्टुप् ।

देवता देवाः ।।

(संहितापाठः)

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वा वरीवुः ।
तस्माद् भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्याया ।।११९।।
(१०.५१.६)

(पदपाठः)

अग्नेः । पूर्वे । भ्रातरः । अर्थम् । एतम् । रथीऽइव । अध्वानम् । अनु । आ । अवरीवुरिति ।। तस्मात् । भिया । वरुण । दूरम् । आयम् । गौरः । न । क्षेप्नोः । अविजे । ज्यायाः ।।

(अन्वयः)

रथी अध्वानं इव अग्नेः पूर्वे भ्रातरः एतं अर्थं अन्वावरीवुः । वरुण, गौरः क्षेप्नोः ज्यायाः न अविजे तस्माद् भिया दूरं आयम् ।।

The seer of the mantra is Agni Sauchīka; the metrical form is Trishṭup; and the deities address are the devas.

(Sāyaṇa)

अनया अग्निः स्वपलायननिमित्तमाह-

हे देवा। अग्नेः मम। पूर्वे पूर्वमुत्पन्नाः। भ्रातरः भूपतिर्भुवनपतिर्भूतानांपतिरिति त्रयः अग्रजाः। एतमर्थः हविर्वहनाख्यमर्थम्। अन्वावरीवुः अनुक्रमेण वृतवन्तः।

आवरणे दृष्टान्तः। रथीव अध्वानम्। अध्वानं यथा रथी वृणुते तद्वत्। ते भ्रातरः तथा कुर्वन्तो हताः। तस्मान्मरणाद् भिया भीत्या। हे वरुण दूरं देशमायम्। किञ्च। क्षेप्नोरिषु क्षेप्नुः धनुषो। ज्यायाः सकाशाद् गौरो न मृग इव। स यथा बिभेति चलति वा। तद्वत्। अविजे आकम्पे॥

(Dinakara)

हे देवाः मम (पूर्वे भ्रातरः) भूपतिर्भुवनपतिर्भूतानांपतिरिति त्रयो ज्येष्ठभ्रातरः एतं हविर्वहनाख्यम् अर्थम् अन्वा वरीवुः अनुक्रमेण आवृतवन्तः। रथीव अध्वानम्। रथी अध्वानं यथा वृणोति तद्वत् ते भ्रातरस्तथा कुर्वन्तः हताः। हे वरुण अहं तस्मात् मरणात् भिया दूरं दूरदेशम् आयम् आगतः। यथा गौरः मृगः क्षेप्नोः इषुक्षेप्तुः धनुषः ज्यायाः सकाशात् भिया अविजे (अकम्पे) चलति। न इवार्थे यद्वा ज्यातो अविजे बिभेति (ओविजे भयचलनयोः)॥११९॥

The brothers of Agni earlier to him (agneh bhrātarah purve) did this very same work (etam artham), one after another and got tired out (anvāvarīvuh) even as the driver of the chariot (rathī) after a long drive on the roads (adhvānam iva). Driven from the same fear (tasmād bhiyā), O Varuṇa, have I got away far from it (dūram āyam), like unto (na) the prey (gaurah) that trembles and runs away (avije) from the mounted bow (jyāyāh) of a hunter (kshepnoh).

(Sāyaṇa names the three older brothers of Agni: (1) Bhūpati, lord of the earth; (2) Bhuvana-pati, lord of the worlds; and (3) Bhūtānām-pati, lord of the living beings.)

(120)

ऋषिः देवाः ।
छन्दः त्रिष्टुप् ।
देवता अग्निः सौचीकः ॥

(संहितापाठः)

कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥१२०॥
(१०.५१.७)

(पदपाठः)

कुर्मः । ते । आयुः । अजरम् । यत् । अग्ने । यथा । युक्तः । जातऽवेदः । न । रिष्याः ॥ अथ । वहासि । सुऽमनस्यमानः । भागम् । देवेभ्यः । हविषः । सुऽजात ॥

(अन्वयः)

(हे) अग्ने, यत् आयुः अजरं ते कुर्मः । जातवेदः, युक्तः यथा न रिष्याः । अथ सुजात, सुमनस्यमानः हविषः देवभ्यः वहासि ॥

The seers of the mantra are the devās, who persuade Agni; the metrical form is Trishṭup, and the deity addressed is Agni Sauchīka.

(Sāyaṇa)

इदं देवानां वाक्यम्।

हे अग्ने। यदायुः आयुष्यम्। अजरं जरारहितमास्ति। तत् ते कुर्मः। तथा तेनायुषा। युक्तः। त्वं हे जातवेदः जातप्रज्ञ। यथा न रिष्या न म्रियसे तथा कुर्मः। अथ। वहासि वह। सुमनस्यमानः सौमनस्यं कुर्वन्।

वोढव्यं वहन्। तदेव दर्शयति। हविषो यजमान-प्रत्तस्य भागम्। केभ्यः देवेभ्यः। हे सुजात। शोभनजन्म अग्ने॥

(Dinakara)

हे अग्ने अजरं जरारहितं यत् आयुः तत् ते कुर्मः। यथा तेनायुषा युक्तस्त्वं न रिष्याः न म्रियसे तथा कुर्मः। हे सुजात अथ त्वं सुमनस्यमानः सौमनस्यं कुर्वन् हविषः (भागं) यजमानदत्तं हविर्भागं देवेभ्यः वहासि वह॥१२०॥

O Agni, knower of all things born (jātaveda) and well-born one (Sujāta), do thou carry (vahāsi) the offerings (havisha) to the shining ones (devebhyah)! We will undertake (kurmah) to render your life (yat te āyuh) exempt from decay (ajaram), so that you will come to know sort of harm (yathā na rishyāh), endowed with that advantage (yuktah).

(121)

ऋषिः अग्निः सौचीकः ।

छन्दः त्रिष्टुप् ।

देवता देवाः ॥

(संहितापाठः)

प्रयाजान् मे अनुयाजाँश्च केवलानूर्जस्वन्तं हविषो दत्त भागम् ।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥१२१॥
(१०.५१.८)

(पदपाठः)

प्रऽयाजान् । मे । अनुऽयाजान् । च । केवलान् । ऊर्जस्वन्तम् । हविषः । दत्त । भागम् ॥ घृतम् । च । अपाम् । पुरुषम् । च । ओषधीनाम् । अग्नेः । च । दीर्घम् । आयुः । अस्तु । देवाः ॥

(अन्वयः)

(हे) देवाः, मे प्रयाजान् अनुयाजान् केवलान् दत्त । हविषः ऊर्जस्वन्तं भागं (दत्त)। अपां घृतं ओषधीनां पुरुषं । अग्नेः दीर्घं आयुः अस्तु ॥

The seer of the mantra is Agni Sauchīka; the metrical form is Trishṭup; and the deities addressed are the devas.

(Sāyaṇa)

अनेन अग्निः हविर्वहने दातव्यानुक्त्वा दत्तेति प्रतिजानाति।

हे देवाः। मे मह्यम्। प्रयाजान् प्रधानस्य प्रमुखे युष्टव्यान् एतन्नामकान् हविर्भागान्। तथा। अनुयाजान् अनु प्रधानात्पश्चात् यष्टव्यान् एतन्नामकान्। केवलान् असाधारणान्। दत्त प्रयच्छत। तथा। ऊर्जस्वन्तं

प्रत्यभिधारणात् सर्वस्यापि चरुपुरोडाशादेः। भागं स्विष्टकृदाख्यं भागम्। दत्त। अथवा। ऊर्जस्वन्तं हविषो भागं प्रयाजानुयाजाख्यं दत्तेति योज्यम्। किञ्च। अपां सारभूतं ताभ्य उत्पन्नं वा। घृतं आज्यभागादिसाधनं। ओषधीनां ओषधीभ्य उत्पन्नं। पुरुषं च भागं दत्त। किञ्च। अग्नेः मम। दीर्घमायुश्चास्तु। वषट्कार-कृतवधभयं मा भूदित्यर्थः॥

(Dinakara)

हे देवाः मे मह्यं प्रयाजान् अनुयाजांश्च। तत्सम्बन्धि हविरित्यर्थः। केवलान् असाधारणान् दत्त प्रयच्छत। तथा ऊर्जस्वन्तं सारवन्तं हविषः पुरोडाशादेः भागं स्विष्टकृदाख्यं दत्त। अथ अपां सारभूतं घृतम् ओषधीनां (पुरुषं) पुरोडाशं च दत्त प्रयच्छत। यद्वा अपामोषधीनां च पुरुषम् अब्रोषधिजन्यं पुरोडाशं (दत्त)। किं च अग्नेः मम दीर्घम् आयुः अस्तु॥१२१॥

Provide for me (me datta), O gods (devāh), exclusively (kevalān) the pre-ritual (prayājān) and post-ritual (anuyājān) offerings. May I enjoy the most substantial portion (ūrjasvantam bhāgam) of the offerings (havishah) of the earth. May I also experience the utter clarity of consciousness (ghṛtam) in the mind (āpam, literally waters), and the principle of consciousness (purusham) in the plants (oshhadhīnām). May Agni have long life (agneh dīrgham āyuh astu).

NOTES : The principal ritual (where pradhānāhuti is offered) is addressed to a devatā (Indra and so on); and the offering here is for the devatā invoked. But all the devatās are repressented by Agni, the only visible devatā. The preliminary ritual involves an offering made prior to the principal one; and this is called 'prayāja'. And likewise, an offering is made after the principal ritual is over; and this is called 'anuyāja'. Both of these are in the nature of upa-homas. The Devatā for them is Agni, according to the Brāhmaṇa-texts. Hence, Yāska (*Nirukta,* 8,22):

आग्नेया वै प्रयाजा आग्नेया अनुयाजा इति च ब्राह्मणम्॥

There is also a view that the deity for these two upa-homas is the life-spirit (prāṇa-devatā); and another view that it is the self (ātmā-devatā) that is the deity of the two upa-homas (prayāja and anuyāja). Whatever devatā is intended (uddishṭa) for the main ritual, Agni enters into the devatā as its prāṇa, and completes him as its very self.

प्राणदेवता इत्यपरम्। प्राणा वै प्रयाजाः प्राणा वा अनुयाजा।
आत्मदेवता इत्यपरम्। आत्मा वै प्रयाजा आत्मा वा अनुयाजा इति च ब्राह्मणम्॥

(122)

ऋषिः देवाः ।
छन्दः त्रिष्टुप् ।
देवता अग्निः सौचीकः ॥

(संहितापाठः)

तव॑ प्र॒याजा अ॑नु॒या॒जाश्च॒ केव॑ल॒ ऊर्ज॑स्वन्तो ह॒विषः॑ सन्तु भा॒गाः ।
तवा॑ग्ने य॒ज्ञो॒३॒॑यम॑स्तु॒ सर्व॒स्तुभ्यं॑ नमन्तां प्र॒दिश॒श्चत॑स्रः ॥१२२॥
(१०.५१.९)

(पदपाठः)

तव॑ । प्र॒ऽया॒जाः । अ॒नु॒ऽया॒जाः । च॒ । केव॑ले । ऊर्ज॑स्वन्तः । ह॒विषः॑ । स॒न्तु॒ । भा॒गाः ॥
तव॑ । अ॒ग्ने॒ । य॒ज्ञः । आ॒यम् । अ॒स्तु॒ । सर्वः॑ । तुभ्य॑म् । न॒म॒न्ता॒म् । प्र॒ऽदिशः॑ । चत॑स्रः ॥

(अन्वयः)

(हे) अग्ने, प्रयाजाः अनुयाजाश्च केवले तव सन्तु । हविषः ऊर्जस्वन्तः भागाः (तव सन्तु)। अयं सर्वः यज्ञः तव अस्तु । चतस्रः प्रदिशः तुभ्यं नमन्ताम् ॥

The seers of the mantra are the devās; the metrical form is Trishṭup is and the deity addressed is Agni Sauchīka.

(Sāyaṇa)

एवमग्निना याच्यमाना देवाः प्रति ब्रुवते -

हे अग्ने। तव प्रयाजा अनुयाजाश्च। केवलेऽसाधारणाः। ऊर्जस्वन्तः। बलवन्तः। हविषः भागाः सन्तु। हे अग्ने। अयं सर्वो यज्ञः च तव अस्तु। तथा। प्रदिशः प्रकृष्टा मुख्याश्चतस्रो दिशाः तुभ्यं नमन्ताम्। अत एहि हविर्वहेति शेषः॥

(Dinakara)

हे अग्ने प्रयाजाः अनुयाजाश्च केवले असाधारणाः तव सन्तु। ऊर्जस्वन्तः हविषः भागाश्च तव सन्तु। अयं सर्वो यज्ञश्च तवास्तु। प्र प्रकृष्टाः मुख्याश्चतस्रो दिशः तुभ्यं नमन्ताम् ॥१२२॥

The devas conceded to the demands made by Agni. They said:

The pre-ritual and post-ritual offerings (prayājāh, anuyājāścha) are indeed meant only for you (kevale tava). The most substantial portion of the offerings (ūrjasvanto bhāgah havishah) is for you. Indeed, all of this sacrifice (ayam sarvah yajñah) is dedicated to you alone (tava astu). May all the four quarters of the earth (chatasrah pradiśah) bow down to you (tubhyam namantām).

(123)

ऋषिः बृहदुक्थो वामदेव्यः ।
छन्दः त्रिष्टुप् ।
देवता इन्द्रः ॥

(संहितापाठः)

**त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि ।
काममिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिन्द्रासि दाता ॥१२३॥
(१०.५४.५)**

(पदपाठः)

**त्वम् । विश्वा । दधिषे । केवलानि । यानि । आविः । या । च गुहा । वसूनि ॥
कामम् । इत् । मे । मघऽवन् । मा । वि । तारीः । त्वम् । आऽज्ञाता । त्वम् ।
इन्द्र । असि । दाता ॥**

(अन्वयः)

मघवन् इन्द्र, यानि आविः या च गुहा केवलानि विश्वा वसूनि दधिषे । मे कामं मा वि तारीः । त्वं आज्ञाता । त्वं दाता असि ॥

The seer of the mantra is Bṛhaduktha, son of Vāmadeva; the metrical form is Trishṭup; and the deity addressed is Indra.

(Sāyaṇa)

हे इन्द्र। त्वम्। विश्वा सर्वाणि। केवलानि अन्येषां असाधरणानि। वसूनि धनानि। दधिषे धारयसि। विश्वानीत्युक्तं कथं विश्वत्वमित्यत आह। यानि आविः आविर्भूतानि। सर्वैः प्रसिद्धानि। वसूनि वासयोग्यानि

धनानि। सन्ति। या च। गुहा गुहायां निगूढे प्रदेशे वर्तमानानि सन्ति। तानि विश्वानि दधिष इति। यस्मादेवं तस्मान्मे मम। कामं कांक्षितम्। हे मघवन् धनवन् इन्द्र। मा वि तारीः मा हिंसीः। (इदिति पादपूरणः)। वर्धयेति शेषः।

हे इन्द्र। त्वम्। आज्ञाता असि। प्रापयितासि अभिलषितं धनम्। तथा। हे इन्द्र। त्वं दाता असि॥

(Dinakara)

हे इन्द्र त्वं विश्वा सर्वाणि केवलानि अन्येषामसाधरणानि वसूनि दधिषे धारयसि। कीदृशानि, यानि आविः आविर्भूतानि बहिः स्थितानीत्यर्थः, यानि च गुहा गोप्यानि गूढप्रदेशे स्थापितानि। हे मघवन् धनवन् यतोऽन्यधनेन त्वं धनवान् तस्मात् त्वं मे कामं मा वि तारी। (इत्) मा हिंसीः। तव व्ययो नास्तीति भावः। हे इन्द्र त्वम् आज्ञाता सन् दाता असि प्रापयसि, तथा स्वयं च दाता असि॥१२३॥

O Indra, the mighty and prosperous one (maghavan), you (tvam) are the possessor of all excellent treasure (viśvā vasūni dadhishe), which are characteristically and exclusively yours (kevalāni), and which include those that are obvious and manifest (yāni āvih) as well as those that are hidden and mysterious (yā cha guhā). Do not, therefore, deprive me of my desire (me kāmam mā vi tārīh). Indeed you are aware of all my desires (ājñāta asi) and (tathā) you are the generous given (tvam dātā asi).

(124)

ऋषिः (ऋषयः) बन्धुः, श्रुतबन्धुः, विप्रबन्धुः गौपायनाः ।
छन्दः अनुष्टुप् ।
देवता हस्तः ॥

(संहितापाठः)

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥१२४॥
(१०.६०,१२)

(पदपाठः)

अयम् । मे हस्तः । भगऽवान् । अयम् । मे । भगवत्ऽतरः ॥
अयम् । मे । विश्वऽभेषजः । अयम् । शिवऽअभिमर्शनः ॥

(अन्वयः)

मे अयं हस्तः भगवान् । मे अयं भगवत्तरः । अयं मे (हस्तः) विश्वभेषजः । अयं (मम हस्तः) शिवाभिमर्शनः ॥

The seers of the mantra are said to be the three brothers, who were children of Gopāyana: Bandhu, Śruta-bandhu and Vipra-bandhu. The metrical form is Anushṭup; and the deity addressed is the hand (hasta) of each of the sages. The occasion for the mantra is given as the revival of the brother of the three seers, named Subandhu, who was dead. Agni brought back the spirit of Subandhu from the realms of Yama, for the delight of those who were near relatives (10,60,10).

(Sāyaṇa)

अनया बन्ध्वादयो लब्धजीवं सुबन्धुं पाणिभिरस्पृशन्। अयं मे हस्तः। भगवान्। यस्मात् सजीवं सुबन्धुं स्पृशति तस्मात्। तथायं मे हस्तो भगवत्तरः अतिशयेन भगवान्। तथायं मे हस्तो विश्वभेषजः जीवचिकित्सा साधनसर्वौषधवान्। तत्स्थानीयो वा। अयं। शिवभिमर्शनः मङ्गलस्पर्शनः। यतो जीवन्तं स्पृशति अतः इत्यर्थः।।

Dinakara's comments on this mantra are missing.

अस्या ऋचोऽर्थस्य त्रुटिरस्ति।।

This hand of mine (ayam me ḥastah) is blessed (bhagavan). Indeed, it is more so (bhagavat-tarah). For it is (ayam) a cure for all ailments (viśva-bheshajah), and confers blessings (śivābhimarśanah).



ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः जगती ।
देवता विश्वेदेवा अङ्गिरसो वा ॥

(संहितापाठः)

ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ।
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥१२५॥
(१०.६२.१)

(पदपाठः)

ये । यज्ञेन । दक्षिणया । सम्ऽअक्ताः । इन्द्रस्य । सख्यम् । अमृतऽत्वम् । आनश ॥
तेभ्यः । भद्रम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥

(अन्वयः)

यज्ञेन दक्षिणाय समक्ताः ये इन्द्रस्य सख्यं अमृतत्वं आनश । तेभ्यः वः भद्रं अस्तु सुमेधसः हे अङ्गिरसः मानवं प्रतिगृभ्णीत ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the metrical form is Jagatī; and the deity addressed in Viśve-devāh or Aṅgīrasa.

(Sāyaṇa)

यज्ञेन यजनीयेन। हविषा। दक्षिणायर्त्विग्भ्यो देयया। समक्ताः सङ्गताः। ये अहीनैकाह-सत्राणि कुर्वन्तो यूयम्। इन्द्रस्य। सख्यं सखिकर्म। अत एव। अमृतत्वं अमरणधर्मम्। देवत्वम्। आनश आनशिध्वे प्राप्ताःस्थ॥ ... हे अङ्गिरसः। तेभ्यो। वो युष्मभ्यम्। भद्रं कल्याणम्। कर्म अस्तु॥ हे सुमेधसः सुप्रज्ञा। हे अङ्गिरसः।

ते यूयम्। इदानीं आगतम्। मानवम् मनोः पुत्रम्। माम्। प्रति गृभ्णीत प्रतिगृह्णीत। मयि प्रतिगृहीते सति यज्ञं साधु करिष्यामि इति तदर्थं प्रतिगृह्णीत॥

(Dinakara)

नाभानेदिष्टः पित्रा मनुनाभ्यनुज्ञातः सत्रमासीनानङ्गिरसोऽभ्येत्याह। हे (सुमेधसः) अङ्गिरसः मां प्रति गृभ्णीत (भवन्तः) स्वीकुर्वन्तु। यज्ञेन यजनीयेन हविषा दक्षिणया च ऋत्विग्भ्यो देयया समक्ताः संगताः ये अहीनैकाहसत्राणि कुर्वन्तः यूयम् इन्द्रस्य सख्यं सखिकर्म (तथा) अमृतत्वम् अमरणधर्मत्वं देवत्वम् आनश प्राप्ताः स्थ, तेभ्यः वः युष्मभ्यं भद्रम् अस्तु। ते यूयं मानवं मनोः पुत्रं मां प्रति गृभ्णीत प्रतिगृह्णीत॥१२५॥

(There is a legend in *Anukramaṇi* and *Aitareya-brāhmaṇa* (5,14), which provides the background for this mantra. Manu had a son named Nābhānedishṭha, who had gone away from home to guru-kula. His elder brothers divided the paternal property amongst themselves, leaving nothing to Nābhānedishṭha. When Nābhānedishṭha returned and asked for his share in the father's property, his father suggested that he should go to the sacrificial session (sattra) being performed by the Angirasa priests; and that he would be rewarded sumptuously. The Angirasa priests were in a quandary about the selection of proper mantras. Nābhānedishṭha advised them in the matter, and the sacrifice was completed. The present mantra is addressed to the Angirasa priests.)

You, who are getting ready (samaktāh) with the sacrificial procedure (yajñēna) with which offerings are properly made (dakshiṇāya), have already secured (ānaśa) the friendship with Indra (indrasya sakhyam) and also immortality (amṛtatvam). May all blessings (bhadram) come to you (tebhyah vah astu). O brilliant (sumedhasah) Angīrasa priests, accept (pratigṛbhṇīta) me who am the son of Manu (mānavam).

NOTE : Aṅgirasa means, according to Yāska (3,17), those born out of burnt fuel or burning coal (aṅgāreshu), or those born in places which are blackened by the burnt fuel (aṅgārā aṅkanāh). These are sages who assume diverse forms and perform grave deeds, or have wisdom that is profound. They are regarded as offsprings of Agni (ibid, 11,17):

बहुरूपा ऋषयस्ते गम्भीरकर्माणो वा गम्भीरप्रज्ञा वा।
तेऽङ्गिरसः पुत्रास्ते अग्नेरधिजज्ञिर इत्यग्निजन्म॥

It is to be noted that the two words Angiras and Agni are cognate (from ang) and emphasize brilliant light (angati, angāra). If Agni means the first sacred burning power of such light (1,31,1 'prathamo Angīrāh'), Angiras means the glowing flames of Agni. It is in this sense that the Angiras sages are born out of Agni.

(126)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः जगती ।
देवता विश्वेदेवा अङ्गिरसो वा ॥

(संहितापाठः)

य उदाजन पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे वलम् ।
दीर्घायुत्वमंङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥१२६॥
(१०.६२.२)

(पदपाठः)

ये । उत्ऽआजन् । पितरः । गोऽमयम् । वसु । ऋतेन । अभिन्दन् । परिवत्सरे वलम् ।
दीर्घायुऽत्वम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥

(अन्वयः)

अङ्गिरसः, पितरः ये (यूयं) गोमयं वसु उदाजन् ऋतेन परिवत्सरे वलं अभिन्दन् वः दीर्घायुत्वं अस्तु । सुमेधसः (यूयं) मानवं प्रतिगृभ्णीत ॥

The seer of the mantra is Nābhānedishṭha, son of Manu. The poetic form is Jagatī and the deity addressed is Angiras or Viśvedeva.

(Sāyaṇa)

ये अङ्गिरसः। पितरोऽस्माकं पूर्वजत्वेन पितृभूता। ये यूयम्। गोमयं गवात्मकम्। पणिभिरपहृतम्। वसु धनम्। उदाजन् तैरधिष्ठितात् पर्वतात् उदगमयन्। किञ्च। ऋतेन सत्यभूतेन। यज्ञेन। परिवत्सरे पर्यागते वत्सरे सम्पूर्णे। सत्रान्ते इत्यर्थः। तत्र वलं वलनामानं गवां अपहर्तारं असुरम्। अभिन्दन् व्यनाशयन्। तेभ्यः वः युष्मभ्यम्। दीर्घायुत्वं प्रभूतजीवनम्। अस्तु। शेषं पूर्ववत्॥

(Dinakara)

हे अङ्गिरसः पितरः अस्माकं पूर्वजत्वेन पितृभूताः। (ये) यूयं गोमयं गवात्मकं पणिभिरपहृतं वसु उदाजन् उदगमयन् आनीतवन्त इत्यर्थः। (ये च) यूयं परिवत्सरे वत्सरसाध्यसत्रान्ते ऋतेन सत्यभूतेन यज्ञेन वलनामानं चोरमसुरम् अभिन्दन् अनाशयन्। तेभ्यो वः दीर्घायुत्वम् अस्तु॥१२६॥

O Angirasa priests, you are our elders, like unto our progenitors (pitarah) and you have driven forth for us the cattle-wealth (gomayam vasu udājan) (recovered our cattle stolen by the paṇis) and broken the might of the demon Vala (valam abhindan) through a year-long devotion to the cosmic order (ṛtena parivatsare). May the fruitfulness of life be bestowed on you (yushmabhyam dīrghāyutvam astu). O the brilliant ones (sumedhasah), accept me, the son of Manu (mānavam prati gṛbhṇīta).

(127)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः जगती ।
देवता विश्वेदेवा अङ्गिरसो वा ॥

(संहितापाठः)

य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन् पृथिवीं मातरं वि ।
सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥१२७॥
(१०.६२.३)

(पदपाठः)

ये । ऋतेन । सूर्यम् । आ । अरोहयन् । दिवि । अप्रथयन् । पृथिवीम् । मातरम् । वि ॥ सुप्रजाःऽत्वम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुमेधसः ॥

(अन्वयः)

अङ्गिरसः, ये (यूयं) ऋतेन दिवि सूर्यं आरोहयन्, मातरं पृथिवीं वि अप्रथयन् वः सुप्रजास्त्वं अस्तु । सुमेधसः, मानवं (मां) प्रति गृभ्णीत ॥

The seer of the hymn is Nābhānedishṭha, son of Manu; the poetic form is Jagatī, and the deity addressed is Viśvedevas or Angiras.

(Sāyaṇa)

हे अङ्गिरसः। ये भवन्तः। ऋतेन सत्यभूतेन यज्ञेन। दिवि द्युलोके। सूर्यं सुष्ठु सर्वस्य प्रेरकं आदित्यम्। आरोहयन् आस्थापयन्। किञ्च। मातरं सर्वेषां निर्मात्रीं। पृथिवीम्। व्यप्रथयन् प्रसिद्धां अकुर्वन् सत्रादि कर्मकरणेन। तेभ्यो युष्मभ्यम्। सुप्रजास्त्वं सुपुत्रत्वम्। अस्तु॥

(Dinakara)

हे अङ्गिरसः ये भवन्तः ऋतेन यज्ञेन सूर्यं दिवि आरोहयन्, (मातरं) सर्वनिर्मात्रीं पृथिवीं च वि अप्रथयन् प्रसिद्धामकुर्वन् (सत्रादिकर्मकरणेन), (तेभ्यः वः युष्मभ्यं) सुप्रजास्त्वं सुपुत्रत्वम् (अस्तु)॥१२७॥

O ye Angiras priests, it is indeed you who have, by your unflinching devotion to cosmic order (ṛtena), settled the sun (sūryam) aloft in the sky (divi ārohayan), and made the mother earth (pṛthivīm mātaram) vast and celebrated (vi aprathayan). O brilliant ones, may you be blessed with prosperous progeny (suprajāstvam vo astu).

(128)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः जगती ।
देवता विश्वेदेवा अङ्गिरसो वा ॥

(संहितापाठः)

अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ।
सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥१२८॥
(१०.६२.४)

(पदपाठः)

अयम् । नाभा । वदति । वल्गु । वः । गृहे । देवऽपुत्राः। ऋषयः । तत् । शृणोतन ॥
सुऽब्रह्मण्यम् । अङ्गिरसः । वः अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥

(अन्वयः)

देवपुत्राः ऋषयः अङ्गिरसः, अयं नाभा वः गृहे वल्गु वदति । तत् शृणोतन । अङ्गिरसः । वः सुब्रह्मण्यं अस्तु । सुमेधसः, मानवं प्रतिगृभ्णीत ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Jagatī, and the deity addressed is Viśvedevas or Angiras.

(Sāyaṇa)

हे देवपुत्रा देवानां पुत्रा, अग्नेः पुत्रा। ऋषयो अतीन्द्रियार्थस्य द्रष्टारः। हे अङ्गिरसः। अयं नाभा नाभानेदिष्ठः। पुरोवर्ती जनः। वः युष्माकम्। गृहे गृहभूते यज्ञे। वल्गु कल्याणम्। वचः। वदति। तद्वाक्यं। यूयम्। शृणोतन महतादरेण शृणुत। तेभ्यो युष्मभ्यम्। सुब्रह्मण्यं शोभनं ब्रह्मवर्चसमस्तु। इदानीमागतं मानवं मां प्रति गृभ्णीत प्रतिगृह्णीत॥

(Dinakara)

हे देवपुत्राः ऋषयः अतीन्द्रियद्रष्टारः अङ्गिरसः, अयं नाभा नाभानेदिष्ठः (बहूनां व्यञ्जनस्य चेति बृहद्देवतायामुक्तत्वाद्वर्णानां लोपः) वः गृहे (गृहभूते यज्ञे) वल्गु कल्याणं (वचः) वदति। तत् (वाक्यम्) आस्तिक्येन शृणोतन शृणुत। मदाशिषि विश्वासो विधेय इति भावः। (तेभ्यः वः युष्मभ्यं) सुब्रह्मण्यं शोभनं ब्रह्मवर्चसम् (अस्तु)॥१२८॥

O Angirasa priests, who are seers (ṛshyah) and offsprings of the gods, (devaputrā), this Nābhānedishṭha (ayam nābhā) articulates (vadati) this happy speech (valgu) in your own home (gṛhe, the place where you are performing your adorations). Listen to it (tat śruṇotana). May the resplendent light of the Brahman (subrahmaṇyam) be yours (vah astu). O brilliant ones (sumedhasah), accept me the son of Manu (mānavam prati gṛbhṇīta).

(129)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः अनुष्टुप् ।
देवता विश्वेदेवा अङ्गिरसो वा ॥

(संहितापाठः)

विरूपास इदृषयस्त इद् गम्भीरवेपसः ।
ते अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे ॥१२९॥
(१०.६२.५)

(पदपाठः)

विऽरूपासः । इत् । ऋषयः । ते । इत् । गम्भीरवेपसः ॥
ते । अङ्गिरसः । सूनवः । ते । अग्नेः । परि । जज्ञिरे ॥

(अन्वयः)

ऋषयः विरूपास इत् । त इत् गम्भीरवेपसः । ते अङ्गिरसः अग्नेः सूनवः परि जज्ञिरे ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Anushṭup; and the deity addressed is Aṅgīrasa or Viśvedeva.

(Sāyaṇa)

(परोक्षतयर्क्षिराह) ऋषयः कर्मणां द्रष्टारः। एत ऋषयो विरूपास इत्। अन्योन्यं वर्णतो रूपतश्च नानारूपा भवन्ति। त इत् त एव। अमी अङ्गिरसो। गम्भीरवेपसः। वेप इति कर्मनाम। गम्भीरकर्माणो भवन्ति। त इमे अङ्गिरसः। सूनवः पुत्राः खलु। तदेवाह। त इमेऽङ्गिरसोऽग्नेः परि जज्ञिरे। सर्वतो जाताः प्रादुर्भूताः। येऽङ्गारा आसंस्तेऽभवन् (ऐतरेय ब्राह्मणे, ३,३४)॥

(Dinakara)

परोक्षतया ऋषिराह। प्रमाणतो रूपतश्च विरूपासः नानारूपा ऋषयः इत् अङ्गिरस एव गम्भीरवेपसः गम्भीरकर्माणो भवन्ति। ते इमे अङ्गिरसः सूनवः पुत्राः। ते च अग्नेः परि जज्ञिरे अग्नेः सकाशात् उत्पन्नाः ॥१२९॥

These sages are of course of different forms (virūpāsah). But their deeds are uniformly profound (gambhīra-vepasah). Are they not Angirasa, the offsprings of Agni around? (agneh sūnavah, pari jajñire).

(130)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः अनुष्टुप् ।
देवता विश्वेदेवा अङ्गिरसो वा ॥

(संहितापाठः)

ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि ।
नवग्वो नु दशग्वो अङ्गिरस्तमः सचा देवेषु मंहते ॥१३०॥
(१०.६२.६)

(पदपाठः)

ये । अग्नेः । परि । जज्ञिरे । विरूपासः । दिवः । परि ॥
नवऽग्वः । नु । दशऽग्वः । अङ्गिरःऽतमः । सचा देवेषु । मंहते ॥

(अन्वयः)

विरूपासः ये अङ्गिरसः दिवःपरि अग्नेः परि जज्ञिरे नवग्वः दशग्वः (ते) अङ्गिरस्तमः । देवेषु सचा मंहते ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Anushṭup; and the deity addressed is Aṅgīrasa or Viśvedevā.

(Sāyaṇa)

विरूपासो विविधरूपाः। ये अङ्गिरसः। दिवस्परि द्युलोकात्। अग्नेः परि। जज्ञिरे परिता जाताः। यद्वा। दिवस्परि परिः पञ्चम्यर्थद्योतकः। स्वतेजसा दीप्यमानात् अग्नेः जाताः। तेषां मध्ये। नवग्वो दशग्वश्च अङ्गिरस्तमः अङ्गिरसां वरिष्ठः। सत्रमासीनानां अङ्गिरसां मध्ये केचन नवसु मास्सु कर्म कृत्वोदतिष्ठन्। केचन

दशसु मास्सु। इत्येवं अङ्गिरसामयनमुक्तम्। तेषामग्निः नवग्वश्च दशग्वश्चोक्तः। तादृशो देवेषु सचा सहावस्थितः सोऽग्निः। मंहते मह्यं धनं प्रयच्छति। (मंहतिर्दानकर्मा)॥

(Dinakara)

(विरूपासः विविधरूपाः) ये अङ्गिरसः दिवः परि द्युलोकात् (अग्नेः परि जज्ञिरे) जातास्तेषां मध्ये नवग्वः अग्निः दशग्वश्च कश्चित् अङ्गिरस्तमः अङ्गिरस्तमः अङ्गिरसां वरिष्ठः देवेषु सचा सहावस्थितः मंहते (धनं प्रयच्छति) ॥१३०॥

The Āngira sages were issued forth from Agni (agneh pari jajñire) above the upper realms (divaspari), and they assume diverse forms (virūpāh). Some of them, the Navagvas and the Daśagvas, are regard as the best among them (aṅgirastamah). The Agni who abides with these luminous ones (deveshu sachā) provides them with eminence and celebrity (mamhate).

NOTE : The expressions 'navagva' and 'daśagva' employed in several passages of Rgveda (1,62,4; 3,39,5; 4,51,4; 9,10,84; 10,14,6; 10,62,6 etc.) suggest specific groups of Angiras sages, who were mystics essentially. They appear to have been closely associated with Atharvans, Bhṛgus and Somyas. Sāyaṇa's explanation that the words referred to the sattra sacrificial sessions involving Agni that were completed in nine or ten months (viz. three or two months earlier than the normally required period) makes little sense in the context.

(131)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः सतोबृहती ।
देवता विश्वेदेवाः ॥

(संहितापाठः)

इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम् ।
सहस्रं मे ददतो अष्टकर्ण्य१ः श्रवो देवेष्वक्रत ॥१३१॥
(१०.६२.७)

(पदपाठः)

इन्द्रेण । युजा । निः । सृजन्त । वाघतः । व्रजम् । गोऽमन्तम् । अश्विनम् ॥
सहस्रम् । मे । ददतः । अष्टऽकर्ण्यः । श्रवः । देवेषु । अक्रत ॥

(अन्वयः)

वाघतः इन्द्रेण युजा गोमन्तं अश्विनं व्रजं निःसृजन्त । मे सहस्रं अष्टकर्ण्यः ददतः देवेषु श्रवः अक्रत ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Satobṛhatī; and the deity invoked are Viśvedevas.

(Sāyaṇa)

वाघतः कर्मणां वोढारो विश्वेदेवाः अङ्गिरसो वा। इन्द्रेण युजा सहायेन। निःसृजन्त निरगमयन्। किम्। गोमन्तं गोयुक्तम्। अश्विनं अश्ववन्तम्। पणिभिरवरुद्धं व्रजम्। ते। मे मां प्रति। सहस्रं सहस्रसंख्याकं धनम्।

सत्रपरिवेषणम्। अष्टकर्ण्यः अष्ट इति अशू व्याप्तौ निष्ठायां रूपम्। विस्तृतकर्णाः। उपलक्षणमेतत्। व्याप्तसर्वावयवा गाश्च। ददतो मह्यं प्रयच्छन्तः। देवेषु इन्द्रादिषु। श्रवो हविर्लक्षणमन्नं कीर्तिं वा। अक्रत अकृषत।। (एवं नाभानेदिष्टेन अङ्गिरसः स्तुताः तस्मै धनं प्रादुः। तदुक्तं शौनकेन-

ऋषयोऽङ्गिरसस्तुष्टा यद्दुर्मानवाय तु।
तत्पुण्याय च कर्मणि ये यज्ञेनेत्यकीर्तयत्।।

(Dinakara)

वाघतः कर्मणां वोढारः अङ्गिरसः इन्द्रेण युजा सहायेन निः सृजन्त निरगमयन्। (किम्) गोमन्त गोयुक्तम् अश्विनम् अश्वयुक्तं पणिभिरवरुद्धं व्रजम्। (ते च) सहस्रं तत्संख्याकं धनम् अष्टकर्ण्यः विस्तृतकर्णाः (अशू व्याप्तौ) गाः मे मह्यं ददतः प्रयच्छन्तः देवेषु श्रवः कीर्तिम् अक्रत अकृषत।।१३१।।

The Āngira sages, most efficient in their action (karmaṇām voḍhārah), recovered (nih sṛjanta) the stolen (or hidden) hordes of horses and cattle (vrajam gomantam aśvinam), taking help from Indra (indreṇa yujā). This they did with the intention of bestowing on me (me dadatah) a large number of excellent and well-nourished cows (sahasram ashṭakarṇyah). By this act, they achieved celebrity (śravah akrata) among all the luminous ones (deveshu).

NOTES : The 'cow'(goh) symbolizes in the Vedic context light, rays of the sun (cf. 3,1,2; 3,5,11; 3,6,11; 3,7,11; 4,1,16; 4,5,3; and 10,12,3) and the 'horse' (aśva) means the life-force, energy involving speed and strength (from 'aśū', force, pervasion, impulsion (cf. 1,36,8; 2,1,16; 2,2,13; 3,27,14; 5,18,3; 7,7,1; 6,16,43; 8,74,10; 8,74,15; 8,103,7; 10,3,7; 10,7,2; 10,70,2 etc.)

‘Ashṭa-karṇyah’ is taken by Sāyaṇa to mean ‘cows with extented or prominent ears’ (अष्ट इति अशू व्याप्तौ निष्ठायां रूपम्। विस्तृतकर्णाः). But the word may also mean ‘marked or branded ears’ (from ‘aksh’), the latter sense suggesting specification and possession (like the English word ‘ear-marked’). As indicated earlier, ‘cows’ mean light-rays, and the branded or marked cows (ashṭakarṇyah) symbolize the light of the fire-flames (angiras), which are prominent and perfect.

(132)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः अनुष्टुप् ।
देवता सावर्णेर्दानस्तुतिः ॥

(संहितापाठः)

प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु ।
यः सहस्रं शताश्वं सद्यो दानाय मंहते ॥१३२॥
(१०.६२.८)

(पदपाठः)

प्र । नूनम् । जायताम् । अयम् । मनुः । तोक्मऽइव । रोहतु ॥
यः । सहस्रम् । शतऽअश्वम् । सद्यः । दानाय । मंहते ॥

(अन्वयः)

अयं मनुः नूनं प्रजायताम् । तोक्मेव रोहतु । यः शताश्वं सहस्रं सद्यः दानाय मंहते ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Anushṭup; and the deity eulogized here is the generosity of manu (Sāvarṇi).

(Sāyaṇa)

अयं सावर्णिर्मनुः। नूनं क्षिप्रम्। प्र जायतां प्रजातो भवतु धनादिभिः पुत्राधिभिश्च। रोहतु प्रादुर्भवतु। तत्र दृष्टान्तः। तोक्मेव। यथा जलक्लिन्नं बीजं प्रादुर्भवति एवम्। कर्मफलसंयुक्तः स मनुः पुत्रादिभिः रोहतु। योऽयं मनुः। शताश्व बह्वश्वसंयुक्तम्। सहस्रं गवाम्। सद्यः तदानीमेव। दानाय। मंहते अस्मा ऋषये दातुं प्रेरयति॥

(Dinakara)

अयं सावर्णिः मनुः नूनं क्षिप्रं प्र जायतां प्रकृष्टो भवतु। धनादिभिः पुत्रादिभिश्च रोहतु प्रादुर्भवतु, तोक्मेव जलक्लिन्नबीजमिव। यः (मनुः) शताश्वं बह्वश्वयुक्तं गवां सहस्रं सद्यः अर्थिमिलनकाल एव दानाय मंहते प्रेरयति॥१३२॥

May this Manu (ayam manuh) appear before us (jāyatām) soon (nūnam), and may he prosper (rohatu) like unto fine and well-nourished seed (tokmeva). For he inspires (mamhate) the gifts (dānāya) of hundreds and thousands of horses (sahasram śatāśvam) immediately after they are sought (sadyo).

NOTE : Sāyaṇa identifies Manu here with Sāvarṇi-Manu after *Bṛhaddevatā.* The devatā of this and the following three mantras is the eulogy of the generosity of this Sāvarṇi-Manu towards this sage, Nābhānedishṭha, who was the son of Manu (here 'manava').

उत्तराभिश्चतसृभिरस्मै मानवायर्षये सावर्णिना
यद्दत्तं तत्प्रशस्यते। तदाप्युक्तं शौनकेन -
'सावर्णिना च यद्दत्तं मानवाय महद्वसु।
तदुक्तं सूक्तशेषेण प्र नूनं जायतामिति॥'

It is to be noted that the next mantra (10, 62, 9) mentions the name Sāvarṇi as that of the donor.

(133)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः अनुष्टुप् ।
देवता सावर्णेर्दानस्तुतिः ॥

(संहितापाठः)

न तमंश्नोति कश्चन दिवइंव सान्वारभंम् ।
सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे ॥१३३॥
(१०.६२.९)

(पदपाठः)

न । तम् । अश्नोति । कः । चन । दिवःऽइंव । सानुं । आऽरभंम् ॥
सावर्ण्यस्यं । दक्षिणा । वि । सिन्धुःऽइव । पप्रथे ॥

(अन्वयः)

दिव इव सानु तं आरभं कश्चन न अश्नोति । सावर्ण्यस्य दक्षिणा सिन्धुरिव वि पप्रथे ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Anushṭup; and the deity is Sāvarṇi's generosity.

(Sāyaṇa)

तं सावर्णि मनुम्। कश्चन कश्चिदपि। आरभं आरब्धुम्। स्वकर्मणा। नाश्नोति न व्याप्नोति। यथा मनुः प्रयच्छति तथान्यो दातुं न शक्नोतीत्यर्थः। कथं स्थितम्। दिव इव द्युलोकस्य। सानु समुच्छ्रितं तेजसा। कैश्चिदप्यप्रधृष्यं आदित्यमिव स्थितम्। तस्य सावर्ण्यस्य मनोरियं गवादिदक्षिणा सिन्धुरिव स्यन्दमाना नदीव पृथिव्यां पप्रथे॥

(Dinakara)

तं सावर्णिं मनुं कश्चन कश्चिदपि आरभम् आरब्धुं स्वकर्मणा न अश्नोति न व्याप्नोति यथा नुः प्रयच्छति तथान्यो दातुं न शक्नोतीत्यर्थः। (कथंस्थितम्), दिव इव द्युलोकस्य सानु शिखरसदृशम् आदित्यमिव वा अप्रधृष्यम्। अस्य (सावर्ण्यस्य) दक्षिणा सिन्धुरिव नदीव पप्रथे विस्तीर्णा बभूव॥१३३॥

Sāvarṇi is settled on the peak (sānu) of celibrity, like the sun in the sky (diva iva); no one can reach him (tam kaśchana ārabham na aśnoti). Sāvarṇi's (gifts) (dakshiṇā also ability, mental prowess, energy) spread far and wide (vi paprathe) like a mighty river (sindhuriva).

(134)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः गायत्री ।
देवता सावर्णेर्दानस्तुतिः ॥

(संहितापाठः)

उत दासा परिविषे स्मद्दिष्टी गोपरीणसा ।
यदुस्तुर्वश्च मामहे ॥१३४॥
(१०.६२.१०)

(पदपाठः)

उत । दासा । परिऽविषे । स्मद्दिष्टी इति स्मत्ऽदिष्टी । गोऽपरीणसा ॥
यदुः । तुर्वः । च । ममहे ॥

(अन्वयः)

उत स्मद्दिष्टी गोपरीणसा दासा यदुः तुर्वश्च परिविषे ममहे ॥

The seer of the mantra is Nābhānedishṭa, son of Manu; the poetic form is Gāyatrī; and the deity is eulogy of Sāvarṇi's generosity.

(Sāyaṇa)

उत अपि च। स्मद्दिष्टी कल्याणादेशिनौ। गोपरीणसा गोपरीणसौ। गोभिः परिवृतौ बहुगवादि युक्तौ। दासा दासवत्प्रेष्यवत् स्थितौ। तेनाधिष्ठितौ। यदुश्च तुर्वश्च। एतन्नामकौ राजर्षी। परिविषे अस्य। सावर्णेर्मनोः। भोजनाय ममहे पशून् प्रयच्छतः॥

(Dinakara)

उताऽपि च गोपरीणसा गोभिः परिवृतौ स्मद्दिष्टी कल्याणादेशिनौ दासा दासवत् (स्थितौ) यदुः तुर्वः च एतन्नामकौ राजर्षी मनोः परिविषे परिवेषणाय (भोजनाय) ममहे पूजयतः (पशून् प्रयच्छतः) ॥१३४॥

And (uta), Yadu and Turva, the two vassals of Sāvarṇi (dāsā), who had abundant cattle-wealth (goparīṇasau) and who were of favourable inclination (smaddishtī), provided for the generosity of Sāvarṇi (parivishe) through contributions of cattle and materials (mamahe).

(135)

ऋषिः नाभानेदिष्ठो मानवः ।
छन्दः त्रिष्टुप् ।
देवता सावर्णदनस्तुतिः ॥

(संहितापाठः)

**सहस्रदा ग्रामणीर्मा रिषन् मनुः सूर्येणास्य यतमानैतु दक्षिणा ।
सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम् ॥१३५॥
(१०.६२.११)**

(पदपाठः)

सहस्रऽदाः । ग्रामऽनीः । मा । रिषत् । मनुः । सूर्येण । अस्य । यतमाना । एतु । दक्षिणा ॥ सावर्णेः । देवाः । प्र । तिरन्तु । आयुः । यस्मिन् । अश्रान्ताः । असनाम । वाजम् ॥

(अन्वयः)

सहस्रदाः ग्रामणीः मनुः मा रिषत् । अस्य यतमाना दक्षिणा सूर्येण एतु । यस्मिन् वाजं अश्रान्ताः असनाम सावर्णेः देवाः आयुः प्र तिरन्तु ॥

The seer of the mantra is Nābhānedishṭha, son of Manu; the poetic form is Trishṭup; and the deity is eulogy of Sāvarṇi's generosity.

(Sāyaṇa)

सहस्रदा गवादीनां सहस्रस्य दाता। ग्रामणीः ग्रामाणां नेता। कर्ता जनपदानाम्। अयं मनुः। मा रिषत् न कैश्चिदपि रिष्टो हिंसितो भवतु। यद्वा कर्मनेतॄन् अस्मान् मा हिनस्तु। किंतु धनादिदानेन पूजयतु। अस्य।

यतमाना गच्छन्ती। दक्षिणा। सूर्येण सह एतु संगच्छताम्। त्रिषु लोकेषु प्रसिद्धा भवतु इत्यर्थः। तस्य अस्य सावर्णेः सवर्णपुत्रस्य मनोः। देवा इन्द्रादयः। आयुः जीवनम्। प्र तिरन्तु प्रवर्धयन्तु। अश्रान्ताः कर्मण्यनलसाः सर्वं कर्म कुर्वन्तो वयम्। यस्मिन्मनो। वाजं गोलक्षणमन्नम्। असनाम संभजेमहि। नाभानेदिष्ठोऽहमलभ इत्याशास्ते॥

(Dinakara)

सहस्रदाः गवादिसहस्रदाता ग्रामणीः (ग्रामाणां) नेता अयं मनुः मा रिषत् कैश्चिदपि हिंसितः मा भवतु। यद्वा सावर्णिरस्मान् मा हिनस्तु। किन्तु धनादिदानेन पूजयतु। अस्य दक्षिणा यतमाना गच्छन्ती सूर्येण सह एतु संगच्छताम्। त्रिष्वपि लोकेषु प्रसिद्धा भवत्वित्यर्थः। (तस्य सावर्णेः) सवर्णपुत्रस्य मनोः देवाः आयुः प्र तिरन्तु वर्धयन्तु। यस्मिन् मनौ वयम् अश्रान्ताः श्रमरहिताः वाजम् अन्नम् असनाम संभजेमहि ॥१३५॥

Manu is the generous donor of a thousand things (sahasradā) and the chieftain of the towns (grāmaṇih). May he not be hurt in any way by any one (mā rishat). May his might (dakshiṇā) with which his efforts are attended (yatamānā) reach upto the sun (sūryeṇa etu). May the gods extend the life-span (āyuh pratirantu) of this Sāvarṇi, from whom we obtain plenitude (yasmin vājam asanāma) without tiring ourselves (aśrāntāh).

(136)

ऋषिः बृहस्पतिः ।
छन्दः त्रिष्टुप् ।
देवता ज्ञानम् ।।

(संहितापाठः)

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ।।१३६।।
(१०.७१.६)

(पदपाठः)

यः । तित्याज । सचिऽविदम् । सखायम् । न । तस्य । वाचि । अपि ।
भागः । अस्ति ।। यत् । ईम् । शृणोति । अलकम् । शृणोति । न हि ।
प्रऽवेद । सुऽकृतस्य । पन्थाम् ।।

(अन्वयः)

सचिविदं सखायं यः तित्याज तस्य वाचि भागः न अस्ति । ईं यत् शृणोति अलीकं शृणोति । हि सुकृतस्य पन्थां न प्रवेद ।।

The seer of the mantra is Bṛhaspati; the poetic form is Trishṭup and the deity eulogized is knowledge (jñāna).

(Sāyaṇa)

सचिविदं सचिशब्दः सखिवाचि। सखिविदम्। योऽध्येता स वेदस्य सखा। सम्प्रदायोच्छेदनिवारकत्वेन वेदं प्रति उपकारित्वात्। तादृशमुपकारिणं अध्येतारं वेत्तीति सचिवित्। तमभिज्ञं सखायं अध्येतॄणां पुरुषाणां

सार्थबोधनेन उपकारित्वात् सखिभूतं वेदं। यः पुमान्। तित्याज परार्थविनियोगेन परित्यजति। तस्य पुरुषस्य वाचि सर्वस्यां लौकिक्यां शास्त्रीयायां वाच्यपि। भागो भजनीयः कश्चिदर्थः। नास्ति। ईं अयं पुरुषः। यद्वेदव्यतिरिक्तं शृणोति। तदलकं अलीकं व्यर्थमेव शृणोति। हि यस्मात् कारणात्। सुकृतस्य। पन्थां पन्थानम्। न प्रवेद श्रद्धाराहित्यादनुष्ठानमार्गं न जानाति। तस्मात् तदीयं श्रवणमपि निष्फलं इत्यर्थः॥

(Dinakara)

यः पुरुषः सचिविदं सखिविदं सखायं तित्याज त्यजति तस्य वाच्यपि (भागो न अस्ति) नामापि न ग्राह्यम्। ईम् पुरुषः यत् तादृशस्य वाक्यं शृणोति तत् अलकम् अलीकम् व्यर्थमेव शृणोति। हि यस्मात् सुकृतस्य पुण्यस्य पन्थां मार्गं न प्रवेद (न जानाति) ॥१३६॥

One (yah) who abandons (tityāja) the friends (sakhyām, those who have knowledge of reality), ignoring their value (sachividam), forfeits value in what he says (na tasya vāchyapi bhāgo asti). Whatever he has studied is in vain (yad īm sṛṇoti, alakam sṛṇoti), for he knows not for certain (na hi praveda) the royal road of the good and superior folk (sukṛtasya panthām).

NOTES : The entire hymn (sūkta) is meant to extol the immortal light of Brahman, which is attained by yoga (contemplation): *Brhaddevatā* (7,109) has:

यज्ज्योतिरमृतं ब्रह्म यद्योगात्समुपाश्नुते।
तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः॥

We find in this hymn a stress on the word 'friendship' (sakhya). One of the mantras (2) says that friends will understand friendship when their expressions (physical vocal, transactional) are strained in the sieve of mindfulness:

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।

Our friends are our own minds which are open to the spiritual knwoledge. The knowledge that dives deep is called here friendship. And the friend is one whom no one can ignore or attack, for his knowledge is firm and profound. One who is not a friend like this will go about in his own imaginative projections and his transactions have neither flower nor fruit(5).

उतं त्वं सख्ये स्थिरपीतमाहुर्नैवं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाऽअफलामपुष्पाम् ।।

In this context, the expression ‘sachividam’ signifies the understanding of the significance of friendship, rendering our own minds our friends. Sāyaṇa points out that one who studies the Veda becomes a friend of the Veda (योऽध्येता स वेदस्य सखा।). He also explains that friends are distinguished by the sameness of knowledge (समानं ख्यानं ज्ञानं येषामिति सखायः).

The word (alakam) has the same sense as ‘aphalām apushpām’ in the previous mantra, cited above.



(137)

ऋषिः बृहस्पतिः ।
छन्दः त्रिष्टुप् ।
देवता ज्ञानम् ॥

(संहितापाठः)

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदाइव स्नात्वा उ त्वे ददृश्रे ॥१३७॥
(१०.७१.७)

(पदपाठः)

अक्षण्ऽवन्तः । कर्णऽवन्तः । सखायः । मनःऽजवेषु । असमाः । बभूवुः ॥
आदघ्नासः । उपऽकक्षासः । ऊं इति । त्वे । ह्रदाःऽइव । स्नात्वाः । ऊं इति ।
त्वे । ददृश्रे ॥

(अन्वयः)

अक्षण्वन्तः कर्णवन्तः सखायः । मनोजवेषु असमा बभूवुः । आदघ्नासः त्वे उपकक्षासः । त्वे स्नात्वाः ह्रदा इव ददृश्रे ॥

The seer of the mantra is Bṛhaspati; the poetic form is Trishṭup; and the deity eulogized is knowledge (jñāna).

(Sāyaṇa)

अक्षण्वन्तो अक्षिमन्तः। कर्णवन्तः कर्णौ निकृत्तद्वारः। गर्भावस्थायामेव केनापि निर्मितबिलः इत्यर्थः।... तादृशाः सखायः। समानं ख्यानं ज्ञानं येषामिति सखायः। तेषु वाक्योषु बाह्येषु इन्द्रियेषु समानज्ञान इत्यर्थ।

ते। मनोजवेषु मनसा गम्यन्ते ज्ञायन्त इति मनोजवाः प्रज्ञाद्याः। तेषु असमा अतुल्या बभूवुः। भवन्ति। तेषु मध्ये केचित् आदघ्नासः। आस्यशब्दस्य पृषोदरादित्वादाकारादेशः। आस्यदघ्ना आस्यप्रमाणोदका ह्रदा इवेति मध्यम प्रज्ञानाह। अथ त्व एके। उपकक्षासः कक्षसमीपप्रमाणोदका ह्रदा इव। अल्पोदका इत्यर्थः। अनेनाल्पप्रज्ञानाह। तथा त्व एके स्नात्वाः। स्नानार्हा अक्षोभ्योदका ह्रदा इव। ददृश्रे दृश्यन्ते। अनेन महाप्रज्ञानाह।

सर्वे सखायः अक्षण्वन्तः अक्षिमन्तः कर्णवन्तश्च। परन्तु मनोजवेषु मनोव्यापारेषु असमाः अतुल्याः बभूवुः। (तेषु) कश्चिदेव मनःशुद्धो भवतीत्यर्थः। तेषु मध्ये उ (अथ) त्वे केचित् आदघ्नासः आस्यप्रमाणोदकाः (ह्रदाः इव)। केचित् उपकक्षास कक्षसमीपप्रमाणोदकाः। उ त्वे (अथ) केचित् स्नात्वा स्नानार्हाः ह्रदाः इव ददृश्रे दृश्यन्ते॥१३७॥

All friends (sakhāyah, viz. our minds open to spiritual knowledge) are alike in their possession of eyes and ears (akshaṇvantah karṇavantah) but they are unequal (asamā babhūvuh) in their mental prowess (manojaveshu). It is like a stretch of water in which one can bathe. Some reach upto the neck (ādaghnāsah), some reach as far as the loins only (upakakshāsah), but some are deep enough (hradā iva) to dip oneself and bathe properly (snātvā).

(138)

ऋषिः सूर्या सावित्री ।
छन्दः अनुष्टुप् ।
देवता सूर्या ॥

(संहितापाठः)

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥१३८॥
(१०.८५.४२)

(पदपाठः)

इह । एव । स्तम् । मा । वि । यौष्टम् । विश्वम् । आयुः । वि । अश्नुतम् ॥
क्रीळन्तौ । पुत्रैः । नप्तृऽभिः । मोदमानौ । स्वे । गृहे ॥

(अन्वयः)

इहैव स्तम् । मा वियौष्टम् । स्वे गृहे पुत्रैः नप्तृभिः क्रीळन्तौ मोदमानौ विश्वं आयुः व्यश्नुतम् ॥

The seer of the mantra is Sūryā, daughter of Savitṛ (and wife of Vivasvat); the poetic form is Anushṭup; and the deity is Sūryā herself.

(Sāyaṇa)

इहैव स्तं। इहैव अस्मिंल्लोके। स्तं भवतम्। मा वि यौष्टम् मा पृथग्भूतम्। विश्वं आयुः। व्यश्नुतं प्राप्नुतम्। किञ्च। पुत्रैः नप्तृभिः पौत्रैः सह। स्वे गृहे मोदमानौ। भवतमिति शेषः॥

(Dinakara)

His comments are missing; asyārthah truṭitah.

May we dwell on this earth together (iha eva stam); may we not be separated (mā vi yaushṭam) at all. Let us spend all our lives (viśvam ayuh vyaśnutam), playing with our children and grandchildren (krīḷantau putraih naptṛbhih) and enjoying ourselves (modamānau) in our own home (sve gṛhe).



(139)

अथ पुरुषसूक्तस्य षोडशर्चस्य यथामति व्याख्या। सहस्रशीर्षेति षोडशर्च सूक्तम्। श्रीनारायणो नामादिपुरुष ऋषिः। अन्त्या त्रिष्टुप्। शिष्टमानुष्टुभम्। अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः ''पुरुषान्न परं किंचिदिति'' श्रुतेः (क.उ.३.११) स एव प्रसिद्धः पुरुषो देवता। तथा चानुक्रान्तम् – '' सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तु'' इति। गतो विनियोगश्च॥ तत्र क्रमात् षोडशर्चव्याख्या॥

ऋषिः नारायणः ।
छन्दः अ॒नु॒ष्टु॒प् ।
दे॒वता पु॒रु॒षः ॥

(संहितापाठः)

स॒हस्र॑शीर्षा पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद् दशाङ्गु॒लम् ॥१३९॥
(१०.९०.१)

(पदपाठः)

स॒हस्र॑ऽशीर्षा पुरु॑षः स॒ह॒स्र॒ऽअ॒क्षः। स॒हस्र॑ऽपा॒त् ॥
सः । भूमि॑म् । वि॒श्वतः॑ । वृ॒त्वा । अति॑ । अ॒ति॒ष्ठ॒त् । द॒श॒ऽअ॒ङ्गु॒लम् ॥

(अन्वयः)

पुरुषः सहस्रशीर्षा सहस्राक्षः सहस्रपात् । सः भूमि विश्वतः वृत्वा दशाङ्गुलं अत्यतिष्ठत् ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity eulogized is Purusha.

(Sāyaṇa)

सर्वप्राणि समष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा। सहस्रशब्दोपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः। यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येव इति सहस्रशीर्षत्वम्। एवं सहस्राक्षित्वं सहस्रपादत्वं च। स पुरुषः भूमिं ब्रह्माण्डगोलकरूपां। विश्वतः सर्वतः। वृत्वा परिवेष्ट्य। दशाङ्गलं दशाङ्गुलपरिमितं देशम्। अत्यतिष्ठत् अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। ब्रह्माण्डाद् बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः॥

(Dinakara)

सर्वप्रणिसमूहरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा। सहस्रशव्दस्योपलक्षणत्वात् अनन्तैः शिरोभिर्युक्त इत्यर्थः। यानि ब्रह्माण्डस्थसर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येवेति सहस्रशीर्षत्वम्। सहस्राक्षः सहस्रपात्। एवं सहस्राक्षित्वं सहस्रपादत्वं च व्यष्टिसमष्टित्वेन। स पुरुषः भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतः वृत्वा परिवेष्ट्य दशाङ्गुलम् दशाङ्गुलपरिमितं देशम् अत्यतिष्टत् अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्य स्थित इत्यर्थः॥१३९॥

Purusha has thousands (innumerable, infinite) of heads, eyes and feet (sahasraśīrshā, sahasrākshah, sahasrapāt). He (sah) comprehends alround (viśvatah vṛtvā) this universe (bhūmim), and in fact overreaches it (atyatishṭhat, exceeds it) by a measure of ten finger breadths (daśāṅgulam).

NOTES : Here commences the celebrated hymn, Purusha-sūkta (also called Pūrva-Nārāyaṇa), which consists of sixteen mantras. It is repeated with slight changes in Taittirīya-āraṇyaka (3-12 and 13) of *Kṛshṇa-yajurveda*, Vajasaneyi-samhitā (31-1 and 16) of *Śukla-yajurveda*, and *Atharva-veda* (19,6). Further, partial explanations of the contents of this hymn occur in some Brāhmaṇa-texts (like Śatapatha and Taittirīya) and Upanishads (like Bṛhadāraṇyaka and Śvetāśvatara).

Purusha, the devatā of the sūkta, is identical with the supreme reality called variously Prajāpati, Viśvakarmā, Hiraṇya-garbha and so on, expressions which emphasize the aspect of the creative principle. The hymn, in fact, belongs to the ādhyātmikya variety, for Purusha the creator (the devatā) is also identical with Nārāyaṇa the seer (the ṛshi). We have a passage in *Śatapatha-brāhmaṇa* (13,6,1,1), which justifies this supposition:

पुरुषो ह नारायणोऽकामयत अतितिष्ठेयꣳसर्वाणि भूतानि ।
अहमेवेदꣳ सर्वꣳ स्यां इति ।

The idea of yajña that figures prominently in the hymn is explained in this text as symbolic of the creative activity of Purusha-Nārāyaṇa :

स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत् । तं आहरत् तेन अयजत । तेन इष्ट्वा अत्यतिष्ठत्
सर्वाणि भूतानि । इदꣳ सर्वं अभवत् । अतितिष्ठति सर्वाणि भूतानि । इदꣳसर्वं भवति
य एवं विद्वान् पुरुषमेधेन यजते यो वै तदेवं वेद ॥

It is interesting that elsewhere in the same text (12,3,4,1) we find that Purusha-Nārāyaṇa is mentioned as the son of Prajāpati, who insists on his son performing the yajña –

पुरुषꣳह नारायणं प्रजापतिरुवाच । यजस्व यजस्वेति ।

This yajña is described in the Ṛgvedic hymn as five-fold (Pañcha-rātra) in the sense that creation was five-fold: (1) creation of birds, beasts and domestic animals; (2) the mantras, ṛk, yajus and sāma; (3) the groups of

people, brāhmaṇa, kshatriya, vaiśya and śūdra; (4) the creation of moon, sun and all gods; and (5) projection of the three realms (earth, midregion and sky). This is the significance of the description of sacrifice (yajña), sacrificial object (paśu), the sacrificer (purusha) and all this (sarvam yad idam) as five-fold (pānkta) (*Bṛhadaranyaka-upanishad,* 1,4,13).

The expression 'purusha' usually is explained as the principle that abides unseen in everything that is manifest; as the principle that dwells in the body (puh) of every living being, and as all-pervading (filling all the worlds). Hence *Śatapatha-brāhmaṇa* (13,6,2,1):

इमे वै लोकाः पूरयमेव पुरुषो योऽयं पुरते सोऽस्यां पुरि शेते तस्मात्पुरुषः ॥

Purusha also means the one real principle that manifests and shines (ushati prakāśayati), or has burnt all evils (dahati) before the creation of the universe (pūrvatush, pūrvam aushat).

यत्पूर्वोऽस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मात्पुरुष ओषति ॥

So we read in *Bṛhadāraṇyaka-upanishad* (1,4,1). *Kaṭha-upanishad* (6,17) identifies Purusha with the inner self abiding in the heart of every being

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः ॥

He is altogether distinct from the body, and untouched by the evils that arise from the body and the world outside. He is pure, bright, luminous and immortal (śukram amṛtam). The yajña, in fact, signifies the attempt

to separate conceptually the Purusha from the body and the world, even as the pith-rod is removed from the reed:

तं स्वाच्छरीरात्प्रवृहन्मुञ्जादिवेषीकां धैर्येण ।

Purusha is also the principle in the solar orb (*Br.up.* 5,5,2)

स आदित्यो य एष एतस्मिन्मण्डले पुरुषः ।

and 'bhūh' (earth) is his head, 'bhuvah' (midregion) his arms (or torso), and 'svar' the feet (ibid, 5,5,2), and so is represented by Agni, Vishṇu, and sūtra respectively.

Further, Prajāpati the creator while resting in water that was everywhere and was everything, had the urge to create (*Taittiriya-āraṇyaka* 1,23, 1 and 2) –

आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि
कामः समवर्तत । इदꣳसृजेयमिति ॥

waters became the womb from which the entire universe was issued forth ('āpo ha yad bṛhatir viśvam ayan garbham dadhanā', RV 10,121,7). And Nārāyaṇa represents the one that moves on waters (which are called Nārā as it was activated by Nara, viz. Prajāpati) (*Manu.* 1,10).

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥

Nārāyaṇa means the 'ayana' (source, substratum, course) of Nārā (viz. waters, āpa). Before the world was created, waters alone were there, and the supreme spirit (Brahman, parama-purusha) was hidden in the waters. The process of creation was the unfoldment of the will (kāma) of the supreme spirit, which not only created but entered into everything that was created. When he enters into and abides in all things of creation, he is called Purusha. As creator, he is Prajāpati, and as what dwells in each created thing, he is Purusha. The identification of Purusha with Nārāyaṇa and the differentiation of Purusha as the devatā from Nārāyaṇa as the ṛshi must be viewed against this background.

When Nārāyaṇa looks into his own real nature as Purusha he becomes the seer; but when the seer beholds his own nature as Purusha and identifies himself with Purusha, the ṛshi becomes the devatā. The nature of the hymn becomes ādhyātmikya.

The word 'sahasra' signifies' all ('sarvam vai sahasram', *Śatapatha-brāhmaṇa,* 8,7,4,11).

The word 'daśāṅgula' (ten finger-breadths) has the meaning of pervasion all over, beyond the universe also (Sāyaṇa) -

दशाङ्गुलमित्युपलक्षणम् । ब्रह्माण्डाद् बहिरपि सर्वतो व्याप्य अवस्थितः इत्यर्थः ॥

It is also taken to signify the 'heart' (hṛdaya), which is ten finger-breadths above the navel ('nābheh sakāśāt daśāngulam atikramya hṛdi sthitah', Mahīdhara). This is the light within (antar jyoti). Bhaṭṭa-Bhāskara takes heart

to mean the space within ('atra sāmarthyāt hṛdayākāśa-parigrahah', *Taittiriya-āraṇyaka-bhāshya*, 2,12,1. Heart is where the Purusha can be contemplated upon, while Purusha himself is beyond all measure. So we read in *'Satapatha-brāhmaṇa* (1,2,30) –

प्रोदेशमात्रहृदयप्रतिष्ठेन वा अयं मनसा अनुस्मर्यते । न च
इह परमेश्वरगतं किञ्चित्परिमाणमस्ति यद् हृदयसंबन्धाद् व्यज्यते ॥

(prādeśa-mātra is the measure of ten or twelve finger-breadths)

Also, अतिमात्रस्यापि परमेश्वरस्य प्रदेशमात्रत्वं अभिव्यक्तिनिमित्तम् ॥

Śaṁkara in his *Sūtra-bhāshya* (1,2,29ff) indicates that according to the Jābālas, the daśāngula (or prādeśa-mātra) is the space between the top of the head and the chin, the space where the supreme spirit can become manifest. And, more particularly, the space between the eyebrows and the nose (where they meet) is where the sky meets the beyond

आमनन्ति चैनं परमेश्वरं अस्मिन् मूर्धचुबुकान्तराले जाबालाः । पुनराममनन्ति कतमच्चास्य
स्थानं भवतीति । भ्रुवोः घ्राणस्य च यः सन्धिः स एष द्युलोकस्य परस्य् च सन्धिर्भवतीति ॥

This is the sense in which the expression 'ati atishṭhat' is employed.

It is also to be noted that Purusha is synonymous with the subtle sky within the heart (hardākāśa, dahara)

(140)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

पुरुष एवेदं सर्वं यद् भूतं यच्च च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥१४०॥
(१०.९०.२)

(पदपाठः)

पुरुषः । एव । इदम् । सर्वम् । यत् । भूतम् । यत् । च । भव्यम् ॥
उत । अमृतऽत्वस्य । ईशानः । यत् । अन्नेन । अतिऽरोहति ॥

(अन्वयः)

इदं सर्वं पुरुष एव । यत् भूतं यच्च भव्यं (पुरुष एव) । उत अमृतत्वस्य च ईशानः । यत् अन्नेत अतिरोहति (पुरुष एव)। (or यत् अन्नेन अ तिरोहति)

The seer of the mantra is Nārāyaṇa, the poetic form is Anushṭup, and the deity invoked is Purusha.

(Sāyaṇa)

यदिदं वर्तमानं जगत्सर्वं पुरुष एव। यच्च। भूतं अतीतम् जगत् । यच्च भव्यं भविष्यत् जगत्। तदपि पुरुष एव। यथास्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट् पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोः द्रष्टव्यमित्यभिप्रायः। उत अपि। च। अमृतत्वस्य देवत्वस्य। अयं ईशानः स्वामी। यत् यस्मात्कारणात्। अन्नेन

प्राणिनां भोग्येन अन्नेन निमित्तभूतेन। अतिरोहति स्वकीयां कारणावस्थां अतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति। तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारात् न इदं तस्य वस्तुत्वं इत्यर्थः॥

(Dinakara)

यत् इदं वर्तमानं जगत् (तत्) सर्वं पुरुष एव। यत् च भूतं जगत् यत् (च) भव्यं भविष्यज्जगत्तदपि पुरुष एव। यथा अस्मिन् (कल्पे) वर्तमानाः प्राणिदेहाः सर्वे पुरुषस्याऽवयवाः तथा अतीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः। उतापि च अमृतत्वस्य देवत्वस्यायम् ईशानः स्वामी। यत् यस्मात् कारणात् अन्नेन भोग्येनान्नेन निमित्तेन अतिरोहति स्वकीयां कारणावस्थाम् अतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः॥१४०॥

Purusha is indeed all this (idam eva sarvam), whatever is seen in the present, whatever (yat) has already gone by and disappeared (bhūtam) and whatever (yat) is yet to come (bhavyam). Besides (uta), this Purusha is the one that governs the state of deathlessness within all creatures (amrṭatvasya īśānah). It is therefore (yat, yatah) that Purusha transcends (atirohati) his own pure and inscrutable condition by providing the creatures with a body which is made of food (annena) (sustained by food). This deathless state is not obscured or eliminated by the body.

NOTES : 1. 'Amrṭatva' is the state of being deathless. In *Śatapatha-brāhmaṇa* (10, 5, 2, 16) the question is raised whether death is one or many. It is one when the body becomes bereft of life, but it is many when appearance of thoughts and acts and their disappearance are considered.

एको मृत्युर्बहवा इत्येकश्च बहवश्चेति ह ब्रूयात्। यदहासवमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः॥

There is one death which is final for the body, but in the interval from birth to this death, there are many births and deaths. Each dawn is a birth, and each night is death; each act has an origination (birth) and a cessation (death). The expression 'amṛtatva' refers to the part of human existence and constitution which is deathless. It is what is known as Purusha or 'ātmā', who governs the past, the present and the future. We read in *Kaṭha-upanishad* (4,12,13) –

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य ततो न विजुगुप्सते॥

He is the ever-present light –

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः।
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः॥

Bṛhadāraṇyaka-upanishad (4,4,22) locates this deathless principle in the heart space, the sky within the body

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते
सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः॥

2. 'Anna' is the source of all creatures (अन्नाद्वै प्रजाः प्रजायन्ते); and it distinguishes the living beings (अन्नꣳहि भूतानां ज्येष्ठम् ।). Life and mind, reality and all the worlds originate from 'anna' (अन्नात्प्राणो मनः सत्यं लोकाः।). In effect, the word refers to the material aspect of existence (what *Bṛhadāraṇyaka* (4,3) called 'mūrta', as distinguished from 'amūrta' which is 'ātman'). The material world (the body) does not obliterate, or extinguish, the Purusha (the ātman) (अन्नेन अ तिरोहति)

(141)

ऋषिः नारायणः ।

छन्दः अनुष्टुप् ।

देवता पुरुषः ॥

(संहितापाठः)

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥१४१॥
(१०.९०.३)

(पदपाठः)

एतावान् । अस्य । महिमा । अतः । ज्यायान् । च । पुरुषः ।
पादः । अस्य । विश्वा । भूतानि । त्रिऽपात् । अस्य । अमृतम् । दिवि ॥

(अन्वयः)

एतावान् अस्य महिमा । च, पुरुषः अतः ज्यायान् । विश्वा भूतानि अस्य पादः । अस्य त्रिपात् दिवि अमृतम् ॥

The seer of the mantra is Nārāyaṇa, the poetic form is Anushṭup, and the deity eulogized is Purusha.

(Sāyaṇa)

अतीतानागतवर्तमानरूपं जगद् यावदस्ति। एतावान् अपि। अस्य पुरुषस्य। महिमा स्वकीयसामर्थ्यविशेषः। न तु तस्य वास्तवस्वरूपम् वास्तवस्तु पुरुषः। अतो महिम्नोऽपि। ज्यायान् अतिशयेन अधिकः। एतच्च उभयं स्पष्टीक्रियते। अस्य पुरुषस्य। विश्वा सर्वाणि। भूतानि कालत्रयवर्तीनि प्राणिजातानि।

पादः चतुर्थोऽशः। अस्य पुरुषस्य। अवशिष्टं त्रिपात् स्वरूपम्। अमृतं विनाशरहितम् सत्। दिवि द्योतनात्मके स्वप्रकाशस्वरूपे। व्यवतिष्ठत इति शेषः॥

(Dinakara)

अतीतानागतवर्तमानरूपं जगत् यावदस्ति एतावान् एतावत्सकलभोगार्थं जगदवस्थास्वीकारात् सर्वोऽपि अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः। न तु तस्य वास्तवं स्वरूपम्। वास्तवपुरुषस्तु अतः महिम्नोऽपि ज्यायान् अतिशयेनाभ्यधिकः। एतदुभयं स्पष्टीक्रियते। अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्त्तीनि प्राणिजातानि पादः चतुर्थोऽशः। अस्य पुरुषस्य अवशिष्टं त्रिपात् स्वरूपम् अमृतं नाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशरूपे व्यवतिष्ठत इति शेषः। यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. उप. २.१) इति आम्नातस्य परब्रह्मणः इयत्तायाः अभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मरूपापेक्षया अल्पमिति विवक्षितत्वात् पादत्वोपन्यासः ॥१४१॥

Such is his presence and glory (asya mahimā). But Purusha is really greater (jyāyān) than all this (atah), whatever all this, all manifest existence (viśvā-bhūtāni) is but a quarter (one fourth) of his presence and glory (asya pādah), the three-quarters (tripāt) of which (asya) are deathless (amṛtam) and settled in the sky above (divi).

NOTES : 1. The Purusha is in his own nature formless (amūrta) and in essence divine (luminous, divya). He fills the universe that has come into being and is present outside it too

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।

(*Muṇḍaka* 2,1,5)

His presence as phenomena and in phenomena is 'apara' (transactional), while his real nature is 'parā' (transcendental). This is his 'mahimā' (glory or greatness), which is expressed in the words अत्यतिष्ठद्दशाङ्गुलम् and अमृतत्वस्येशानः॥

2. The expressions ‘pada’ and ‘trīpat’ do not mean just ‘quarter’ and ‘three-quarters’; they indicate that a very minute part of his power is visible to us (as the universe), while a large part of his power is hidden in the heavens, beyond our reach (avyakta). The word ‘divi’ (in the heaven or sky) does not mean only the realm above the mid-region (antariksha), but signifies the realm beyond the three realms, what is suggested by तद्विष्णोः परमं पदम् ॥

(142)

ऋषिः नारायणः ।

छन्दः अनुष्टुप् ।

देवता पुरुषः ॥

(संहितापाठः)

त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥१४२॥
(१०.९०.४)

(पदपाठः)

त्रिऽपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरिति ॥
ततः । विष्वङ् । वि । अक्रामत् । साशनानशने इति । अभि ॥

(अन्वयः)

त्रिपात् पुरुषः ऊर्ध्वमुदैत् । अस्य पादः इह पुनः अभवत् । ततः साशनानशने अभि विष्वङ् व्यक्रामत् ॥

The seer of the mantra is Nārāyaṇa, the poetic form is Anushṭup and the deity described is Purusha.

(Sāyaṇa)

योऽयं त्रिपात् पुरुषः संसाररहितो ब्रह्मस्वरूपं सोऽयम्। ऊर्ध्व उदैत् अस्मादज्ञानकार्यात् संसाराद् बहिर्भूतः। अत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान्। तस्याऽस्य पादो लेशः सोऽयमिह मायायां पुनरभवत्। सृष्टिसंहाराभ्यां पुनः पुनरागच्छति। अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं (गीतायां १०,४२)।

ततो मायायां आगत्य अनन्तरम्। विष्वङ् देवमनुष्यतिर्यगादिरूपेण विविधःसन्। व्यक्रामत् व्याप्तवान्। किं कृत्वा। साशनानशने अभिलक्ष्य। साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम्। अनशनं तद्रहितमचेतनम्। गिरिनद्यादिकम् तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवान् इत्यर्थः।।

(Dinakara)

योऽयं त्रिपात् पुरुषः संसारस्पर्शरहितस्वरूपः सोऽयम् ऊर्ध्वः उत् ऐत् अस्मादज्ञानकार्यात् संसाराद् बहिर्भूतः अत्रत्यैर्गुणदोषैरनुपस्पृष्टः उत्कर्षेण स्थितवान्। तस्य सोऽयं पादः लेशः। सोऽयम् इह मायायां पुनः अभवत् सृष्टिसंहाराभ्यां पुनः पुनरागच्छति। अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ.गी.१०.४२) इति। ततः मायायामागत्यानन्तरं विष्वङ् देवमनुष्यतिर्यगादिरूपेण विविधः सन् व्यक्रामत् व्याप्तवान्। किं कृत्वा साशनानशने अभि अभिलक्ष्य। साशनं भोजनादिव्यवहारोपेतं सचेतनं प्राणिजातम्, अनशनम् अशनेन रहितम् अचेतनं गिरिनद्यादिकम्। तदुभयं यथा स्तात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः।।१४२।।

The three-quarters of the Purusha (tripāt purushah) went up (urdhvam udait) beyond the reach of the quarter, (asya pādah), which here (iha, in this universe of our normal existence) comes into being repeatedly (punah abhavat). Then (tatah), having entered into this universe (the quarter), the Purusha assumed diverse forms and spread all over (vishvam vyakrāmat) becoming both living and non-living existence (sāśanānaśane abhi).

NOTES : 1. The three-quarters (trīpāt) signify the belly (udara), the heart (hṛdaya), and the space within the centre of the being (dahara). Transcending these levels, the Purusha reaches the topmost level of individual existence (sahasrāra)

त्रिपादित्यनेन उदरहृदयदहराणां तत ऊर्ध्वं उपरिभागे सहस्रारे पुरुष उदैत्।।

The three quarters may also mean the three states of existence: wakefulness, dream and deep sleep. Beyond them is the 'turīra' state in which the Purusha abides

यद्वा त्रिपाच्छब्देन जाग्रत्स्वप्नसुषुप्तीनां ग्रहणं तत ऊर्ध्वं उपरिभागे तुरीयायां उदैत् स्वोपलब्धिं प्राप्त इत्यर्थः ॥

The three quarters may suggest the three scriptures (Ṛg., Yajus and the Sāman); the Purusha is beyong the Vedic lore.

Sāyaṇa takes the expression 'tripāt' to mean the three guṇas which constitute the universe . The Purusha transcends the guṇas (guṇātīta).

The *Nirukta,* however, would make the earth (bhū), the mid-region (antariksha) and the sky (dyauh) 'trīpāt'.

2. The expression 'ūrdhvam udait' signifies that the Purusha is beyond our ken. He is hidden in the heart-cave of all beings, the ever-present one. We read in the *Kaṭha-upanishad* (2,12) –

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।

(143)

ऋषिः नारायणः ।

छन्दः अनुष्टुप् ।

देवता पुरुषः ॥

(संहितापाठः)

तस्मा॑द् वि॒राळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद् भूमि॒मथो॑ पु॒रः ॥
(१०.९०.५)

(पदपाठः)

तस्मा॑त् । वि॒ऽराट् । अ॒जा॒य॒त॒ । वि॒ऽराजः॑ । अधि॑ । पुरु॑षः ॥
सः । जा॒तः । अति॑ । अ॒रि॒च्य॒त॒ । प॒श्चात् । भूमि॑म् । अथो॒ इति॑ । पु॒रः ॥

(अन्वयः)

तस्मात् विराट् अजायत । विराजः अधि पुरुषः । सः जातः अत्यरिच्यत । पश्चात् भूमिं अथो पुरः ॥

(Sāyaṇa)

विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते। तस्मात् पुरुषात्। विराट ब्रह्माण्डदेहः। अजायत उत्पन्नः। विविधानि राजन्ते वस्तून्यत्र इति विराट्। विराजः अधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी कश्चित्पुमान् अजायत। सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत्। ... स जातः विराट्पुरुषः। अत्यरिच्यत अतिरिक्तोऽभवत्। विराड् व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत्। पश्चात्

देवादिजीवभावदूर्ध्वम्। भूमिं समर्जेति शेषः। अथो भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि समर्ज॥१४३॥

From this quarter (tasmāt), the cosmic spirit (virāṭ) arose (ajāyata), and from this spirit (virājah) the Purusha became manifest as the ever-present principle (adhi pūrushah), while at the same time (sa jātah, while manifesting himself) he transcended this transactional form (atyarichyata). It was then (paśchāt) that the earth came into being (bhūmi) and on the earth the bodies of the living beings (purah).

NOTES : 1. Bhaṭṭa-Bhāskara (Bhāshya on *Taittirīya-āraṇyaka,* 3,12) interprets this mantra as describing creation. The source is Nārāyaṇa who is Praṇava, unmanifest. He is mahāpurusha, the great being, who gives birth to virāṭ (or Prajāpati, the creator). Virāt represents cosmic mind (manas), and is present in all creatures as mind. And employing this cosmic mind, Purusha emerged, who is of the nature of Daśahotra.

इदानीं सृष्टिरुच्यते। तस्मात् प्रणवाख्यात् नारायणात्। अव्यक्तादिति केचित्। तस्मात्प्रकृतान्महापुरुषात् विराडजायत प्रजापतिः। ततो विराजो अधि विराजमेव अधिकरणीकृत्य पुरुषोऽजायत दशहोत्राख्यः। प्रजापतिः पुरुषसमष्ट्यात्मना अजायत। यथोक्तम्। स मानसीन आत्मा जनानाम्॥

Prajāpati (the creator or protector of creatures) is the principle of Mind (मन इव हि प्रजापतिः। *Taittirīya-samhitā,* 2,4,11,5). And Mind is of the nature of will, the will-to-create (samkalpa); and it (in other words, Prajāpati); becomes ten-fold according to the different avenues of the life-principle (viz. the *ten* sense-organs, indriyas or prāṇas).

सृष्टिकामः प्रजापतिरेव प्राणादिवृत्तिभेदेनोच्यते॥

The secondary Purusha, consequent upon the Virāt, is thus of the nature of mind; it is light and dwells in the heart of all beings (*Bṛh. up.* 5, 16, 1)

मनोमयोऽयं पुरुषः भाः सत्यः। तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा। स एष सर्वस्येशानः सर्वस्याधिपतिः। सर्वमिदं प्रशास्ति यदिदं किञ्च॥

2. Prajāpati is 'daśa-hotra'. His yajña is of the nature of will, and an act of the mind (mano vai yajñasya brahmā, *Br-up.* 3,1,6). And he transcended by creation of beings his own nature (atyarichyata). Bhaṭṭa-Bhāskara:

स वैराजः पुरुषः जातः प्रादुर्भावानन्तरं अत्यरिच्यत स्वयमेव आत्मानमत्यरेचयत्। अनेकधाभावलक्षणं स्वरूपातिरेकं अभजत। भूतेन्द्रियादीन्यसृजत। उक्तं च-असतोऽधि मनोऽसृज्यत। मनः प्रजापतिमसृजत। प्रजापतिः प्रजा असृजत इति॥

The number ten signifies the ten prāṇas(five sensory organs and five motor organs).



(144)

ऋषिः नारायणः ।

छन्दः अनुष्टुप् ।

देवता पुरुषः ॥

(संहितापाठः)

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१४४॥
(१०.९०.६)

(पदपाठः)

यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ॥
वसन्तः । अस्य । आसीत् । आज्यम् । ग्रीष्मः । इध्मः । शरत् । हविः ॥

(अन्वयः)

यत् देवाः पुरुषेण हविषा यज्ञं अतन्वत अस्य वसन्तः आज्यं आसीत् । ग्रीष्मः इध्मः । शरत् हविः (आसीत्)॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity described is Purusha.

(Sāyaṇa)

यत् यदा पूर्वोक्तक्रमेण देवशरीरेषूत्पन्नेषु सत्सु देवाः उत्तरसृष्टिसिध्द्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासम्भवात् पुरुषमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञम् अतन्वत

अन्वतिष्ठन् तदानीम् अस्य यज्ञस्य वसन्तः (वसन्तर्तुरेव आज्यम् आसीत्) तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः। एवं ग्रीष्मः (इध्मः) आसीत्। तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः। तथा शरत् (हविः) आसीत् तामेव हविष्ट्वेन संकल्पितवन्त इत्यर्थ। पूर्वं पुरुषस्य हविः पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम्॥१४४॥

(Dinakara)

यत् यदा पूर्वोक्तक्रमेण देवशरीरेषूत्पन्नेषु सत्सु देवाः उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासम्भवात् पुरुषमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञम् अतन्वत अन्वतिष्ठन् तदानीम् अस्य यज्ञस्य वसन्तः (वसन्तर्तुरेव आज्यम् आसीत्) तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः। एवं ग्रीष्मः (इध्मः) आसीत्। तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः। तथा शरत् (हविः) आसीत् तामेव हविष्ट्वेन संकल्पितवन्त इत्यर्थः। पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम्॥१४४॥

When the creation was completed (yat, yadā), the gods (devas) performed a sacrifice (yajñam atanvata), with Purusha himself as oblation (purusheṇa havishā). The Purusha who is of the nature of the year, (samvatsara) had the spring season (vasanta) as clarified butter (ājya), summer (grīshma) as fuel (idhma), and autumn (śarad) as oblation (havih).

NOTES : 1. The gods are the offsprings of Purusha (or Prajāpati), according to *Śatapatha-brāhmaṇa* (11,1,6,19-20), who envisioned the yajñas, meant to fulfil all desires, and performed them for the sake of their parent, Prajāpati. We read in this text (10,1,6,17).

स परमेष्ठी प्रजापतिं पितरमब्रवीत् – 'कामप्रं वा अहं यज्ञमदर्शम् । तेन त्वा याजयामि' इति । तथेति । तमयाजयत्सः । इष्ट्वा कामयत – 'अहमेवेद९ँसर्व९ँस्यां' इति । स प्राणोऽभवत् । प्राणो वा इद९ँसर्वम् । अयं वै प्राणो योऽयं पवते स प्रजापतिः । तस्य दृष्टिः ॥

Parameshṭhi was one of the offsprings of Prajāpati; others were Indra, Agni, Soma and Prājāpatya (ता वा एताः पञ्चदेवताः कामप्रेण यज्ञेनायजन्त) and they all of them performed the yajña which secures all desires of beings. Parameshṭhi told his parent: 'I have envisioned the sacrifice which can fulfil all desires. I shall perform that sacrifice for you.' Prajāpati consented, and Parameshṭhi performed the sacrifice. When the sacrifice was over, he wished to become all this. Accordingly, he became the vital principle (prāṇa). All this is indeed the vital principle. The vital principle that throbs in the universe is none other than Prajāpati. And the vision of this reality is also Prajāpati's power (tasya dṛshṭih, 'darśanam'). The other offsprings also followed suit and became all-pervasive.

The devas thus represent the five forms of the vital principle (prāṇa), which are engaged in the service of Prajāpati (viz. the ātman or Purusha).

2. Prajāpati is identified with each of these devas, more especially with Agni (*Śatapatha-brāhmaṇa,* 8,7,1,8):

प्रजापतिरेषोऽग्निः ।

And Agni (Vaiśvānara) is identified with the 'year' (samvatsara), (संवत्सर एषोऽग्निः 1,8,7,1,6) which together with Agni produced all beings (8,2,2,8):

संवत्सरो वा अग्निर्वैश्वानरः । संवत्सरेण वै सयुग्भूत्वा प्राजनयत् ।

And the 'year' which is productive of all beings is also their foundation (8,4,1,22)

संवत्सरो हि सर्वेषां भूतानां प्रतिष्ठा ।

It is this productive and foundational 'year' that is really yajña (sacrifice); and all the seasons are the priests engaged in it (11,2,7,22):

(संवत्सरो यज्ञः। ऋतव ऋत्विजः(cf 8,7,1,1) ॥ तदेतत्सर्वं यदृतव्याः संवत्सरो। वा ऋतव्याः संवत्सर इदं सर्वम्)

3. The 'year' or samvatsara is also described as the sacrificer, and the seasons help him to perform the sacrifice (11,2,3,32):

संवत्सरो यजमानः । तमृतवो याजयन्ति ॥

The seasons (ṛtu) are regarded as the limbs of the sun (2,2,3,9):

आदित्यस्त्वेन सर्वर्तवः ।

A season is the duration marked by two months; and there are six seasons in the traditional reckoning. But the hymn here mentions but three of them: Spring (vasanta), Summer (grīshma) and Autumn (śarat). Spring is distinguished by abundance of milk, and represents clarified butter (ājya) which is regarded as Spring's wife. Summer has an abundance of faggots, dry fuel and sticks used for producing fire; it has therefore been made to stand for the sacrificial fuel (idhma). Autumn is the season when grains are harvested; grains constitute the sacrificial oblations in the form of cakes (or puroḍāsha) (havih, havishyam; havishṭvena hūyate).

4. It is important to note that the Purusha (who is in fact Prajāpati) emerged out of the 'year' (*Śatapatha-brāhmaṇa*, 11,1,6,7):

ततः संवत्सरे पुरुषः समभवत् । स प्रजापतिः ।

And the devas were produced by him by his very face (स आस्येनैव देवानसृजत ।), that is to say, by his breath (prāṇa). The devas (luminous ones, rays of light) were so called because they entered into the realm of light (ते देवा दिवमभिपद्यासृज्यन्त तद्देवानां देवत्वम् ।). It is by this luminosity that the creator was facilitated in his creative activity (तस्मै स सृजनाय दिवेवास ।)

5. Ājya (clarified butter), is brilliance (tejas); one who offers it becomes brilliant. It is very dear to the gods. This is the close connection between yajña and ājya (*Śatapatha-brahmaṇa* 13, 12, 1, 2):

आज्येन जुहोति । तेजो वा आज्यम् । तेजसैवास्मिंस्तत्तेजो दधात्याज्येन जुहोति । एतद्वै देवानां प्रियं धाम यदाज्यं प्रियेणैवैनान् धाम्ना समर्धयति ॥

Ājya is also the generative seed (retas) of the creation of the universe (ibid., 6,3,3,21 एतद्रेतोभूतꣳसिञ्चति ।)

(145)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न् पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ ये ॥१४५॥
(१०.९०.७)

(पदपाठः)

तम् । य॒ज्ञम् । ब॒र्हिषि॑ । प्र । औ॒क्ष॒न् । पुरु॑षम् । जा॒तम् । अ॒ग्र॒तः ॥
तेन॑ । दे॒वाः । अ॒य॒ज॒न्त॒ । सा॒ध्याः । ऋष॑यः । च॒ । ये ॥

(अन्वयः)

अग्रतः जातं यज्ञं तं पुरुषं बर्हिषि प्रौक्षन् । तेन देवाः साध्याः ऋषयः ये अयजन्त ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity referred to is Purusha.

(Sāyaṇa)

यज्ञं यज्ञसाधनभूतम्। तं पुरुषम्। पशुत्वभावनया यूपे बद्धम्। बर्हिषि मानसे यज्ञे। प्रौक्षन् प्रोक्षितवन्तः। कीदृशमित्याह। अग्रतः सर्वसृष्टेः पूर्वम्। पुरुषं जातं पुरुषत्वेनोत्पन्नम्। एतच्च प्रागेवोक्तम्-तस्माद्विराळजायत विराजो अधि पूरुषः। इति। तेन पुरुषरूपेण पशुना देवाः अयजन्त। मानसयागं निष्पादितवन्तः इत्यर्थः।

के ते देवा इत्यत्राह। साध्याः सृष्टिसाधनयोग्याः। प्रजापतिप्रभृतयः। तदनुकूला ऋषयो मन्त्रदृष्टारश्च ये सन्ति ते सर्वेऽपि अयजन्त इत्यर्थः॥

(Dinakara)

(यज्ञं) यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि आसन्ने (मानसे?) यज्ञे प्रौक्षन् प्रोक्षितवन्तः। कीदृशमित्यत्राह। (अग्रतः) सर्वसृष्टेः पूर्वं पुरुषं जातं पुरुषत्वेनोत्पन्नम्। एतच्च प्रागेवोक्तं 'तस्माद्विराळजायत' इति। तेन पुरुषेण पशुना देवाः अयजन्त मानसं यागं निष्पादितवन्तः इत्यर्थः। के ते देवा इत्यत्राह। साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः ऋषयः मन्त्रद्रष्टारः (च) ये सन्ति ते सर्वेप्ययजन्त इत्यर्थः॥१४५॥

That Purusha, who appeared as the primoridal being (purusham agratah jātam) was placed on the sacred seat (barhishi) and sanctified (praukshat). With him as the central object (tena) the gods (devāh), the adepts among mortals (sādhyāh) and the seers (ṛshayah) went through the sacrificial rite (ayajanta).

NOTES

1. The devas, the sādhyas and the ṛshis are all aspects of the vital spirit (prāṇa): the devas are luminous spirits in the heavenly realms (cf. *Nirukta,* 12,41 द्युस्थानो देवगण इति नैरुक्ताः।); the sādhyas are principles of energy (prāṇa) which accomplish all action, representing Agni (cf. *Aitareya-brāhmaṇa,* 1, 16 छन्दांसि वै साध्यादेवास्तेऽग्रेऽग्निनाग्निं अयजन्त। *Śatapatha-brāhmaṇa* 10,2,2,3 प्राणा वै साध्यादेवास्त एतमग्र एवमसाधयन्।); and the ṛshis are principles of vision (ṛsh darśane) which are also principles of energy (praṇa) (cf. *Śatapatha-brāhmaṇa,* 6,1,1,1 के त ऋषय इति। प्राणा वा ऋषयः।).

2. The central and primal principle of energy is technically called Indra, the mukhya-prāṇa which enlivens and energizes (indha) all other prāṇas by its power. We read in *Śatapatha-brāhmaṇa* (6,1,1,2):

स योऽयं मध्ये प्राणः एष एवेन्द्रः । तानेष प्राणान्मध्यत इन्द्रियेणैन्ध्दयदैन्ध तस्मादिन्ध इन्धो
ह वै तमिन्द्र इत्याचक्षते परोक्षम् । परोक्षकामा हि देवास्त इद्धाः सप्त नानापुरुषानसृजन्त ।

The seven purushas signify the seven dimensions of the living being: the four major limbs (chatvāra ātmā, head, torso, arms and legs), two sides (paksha) and a tail (puchchha). These seven coalesced into one purusha. This composite purusha became Prajāpati who created all beings and ascended upward and entered into the realm of the Sun (ibid 10,2,2,1):

यान्वै तान्त्सप्तपुरुषान् एकं पुरुषमकुर्वन्त्स प्रजापतिरभवत् । स प्रजा असृजत । स प्रजाः
सृष्ट्वोर्ध्व उदक्रामत् । स एतं लोकमगच्छद्यत्रैष एतत्तपति ।

3. The performance of the yajña by devas was in the nature of mutual offering. Each offered himself as oblation to the other; and Prajāpati gave himself to them (*Śatapatha-brāhmaṇa,* 11,1,8,2):

अथ देवाः अन्योन्यस्मिन्नेव जुह्वतश्चेरुः । तेभ्यः प्रजापतिरात्मानं प्रददौ । यज्ञो हैषामास ।
यज्ञो हि देवानामन्नम् ॥

This became known as yajña; this was 'sarva-medha', yajña is the food (anna) of the gods, for the nature of food is not only to be eaten, but to eat the one eats it (adyate atti cha annam).

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।
पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥१४६॥
(१०.९०.८)

(पदपाठः)

तस्मात् । यज्ञात् । सर्वऽहुतः । सम्ऽभृतम् । पृषत्ऽआज्यम् ॥
पशून् । तान् । चक्रे । वायव्यान् । आरण्यान् । ग्राम्याः । च । ये ॥

(अन्वयः)

सर्वहुतः तस्मात् यज्ञात् पृषदाज्यः संभृतम् । वायव्यान् तान् चक्रे । आरण्यान् ये च ग्राम्याः (चक्रे)॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity described is Purusha.

(Sāyaṇa)

सर्वहुतः सर्वात्मकः पुरुषः। यस्मिन्यज्ञे हूयते सोऽयं सर्वहुत्। तादृशात् तस्मात्। पूर्वोक्तात् मनसात् यज्ञात्। पृषदाज्यं दधिमिश्रमाज्यम्। संभृतं सम्पादितम्। दधि च आज्यं च इत्येवमादि भोग्यजातं सर्वं

सम्पादितमित्यर्थः। तथा। वायव्यान् वायुदेवताकाल्लोकप्रसिद्धान्। आरण्यान् पशून्। चक्रे उत्पादितवान्। आरण्या हरिणादयः। तथा। ये च ग्राम्या गवाश्वादयः। तानपि चक्रे। पशूनां अन्तरिक्षद्वारा वायुदेवत्यत्वम् यजुर्ब्राह्मणे समाम्नायते। (तैत्तरीय ब्राह्मणे ३,२,१,३)

(Dinakara)

सर्वहुतः सर्वात्मकः पुरुषो यस्मिन् यज्ञे हूयते स सर्वहुत्, तादृशस्तस्मात् मानसात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं सम्भृतं सम्पादितम्। दधि च आज्यं चेत्येवमादि भोग्यजातं सर्वं सम्पादितमित्यर्थः। तथा वायव्यान् वायुदेवताकान् तान् लोकप्रसिद्धान् आरण्यान् पशून् चक्रे उत्पादितवान्। आरण्या हरिणादयः। तथा ये च ग्राम्याः गवाश्वादयः तानपि चक्रे। पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं यजुब्राह्मणे समाम्नायते "वायवः स्थेत्याह। वायुर्वा अन्तरिक्षस्याध्यक्षः अन्तरिक्षदेवत्याः खलु वै पशवः। वायव एवैतान् परिददातीति" (तै.ब्रा. ३.२.१.३)॥१४६॥

From that yajña (tasmād yajñāt), which received all as offering (sarvahutah) was produced (sambhṛtam) oblation which is variegated (pṛṣhadājyam). Then, he (Purusha) brought into being (chakre) the animals (paśūn) that fly in air (vāyavyān), that live in jungles (āraṇyān) and that are domesticated (grāmyāh).

NOTES

1. The expression 'sarva-huta' does not mean 'purusha-medha' as it is commonly supposed; it signifies 'sarva-medha'. *Śatapatha-brahmaṇa* (13,7,1,1) describes how the self-manifest Brahman not only performed austerifies but offered himself as oblation in all creatures, and received all creatures into himself as oblations (sarva-medha)

ब्रह्म वै स्वयंभु तपोऽतप्यत। तदैक्षत। न वै तपस्यानन्त्यमस्ति हन्ताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति। तत्सर्वेषु भूतेष्वात्मान॑हुत्वा भूतानि चात्मनि। सर्वेषां भूताना॑श्रैष्ठ्य॑

स्वाराज्यमाधिपत्यं पर्यैत्तथैवैतद्यजमानः सर्वमेधे सर्वान् मेधान् हुत्वा सर्वाणि भूतानि श्रैष्ठ्यꣳस्वाराज्यमाधिपत्यं पर्येति ॥

The same text, elsewhere (13,7,1,14), again refers to the sarva-medha performed by Viśva-karmā-bhauvana (i.e. Purusha or Prajāpati), who as a result of this sacrifice, rose above all creatures and became all:

तेन हैतेन विश्वकर्मा भौवन ईजे । तेनेष्ट्वात्यातिष्ठत्सर्वाणि भूतानीदꣳसर्वमभवत् ॥

2. Vāyavya cf. *Taittirīya-brāhmaṇa* (3,2,3,4):

वायवस्थेत्याह । वायुर्वा अन्तरिक्षस्याध्यक्षः । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान् परि ददाति ।

Also *Śatapatha-brāmaṇa* (4,4,1,15):

वायुप्रणेता वै पशवः । प्राणो वै वायुः । प्राणेन हि पशवश्चरन्ति ॥

3. Bhāskara takes 'pṛshat' in the sense of variegated (vichitra).

(147)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥१४७॥
(१०.९०.९)

(पदपाठः)

तस्मात् । यज्ञात् । सर्वऽहुतः । ऋचः । सामानि । जज्ञिरे ॥
छन्दांसि । जज्ञिरे । तस्मात् । यजुः । तस्मात् । अजायत ॥

(अन्वयः)

सर्वहुतः तस्मात् यज्ञात् ऋचः सामानि जज्ञिरे । तस्मात् छन्दांसि जज्ञिरे। तस्मात् यजुः अजायत ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity described is Purusha.

(Sāyaṇa)

सर्वहुतः तस्मात् पूर्वोक्तात् यज्ञात्। ऋचः सामानि। जज्ञिरे उत्पन्नाः। तस्मात् यज्ञात्। छन्दांसि गायत्र्यादीनि। जज्ञिरे। तस्मात् यज्ञात् । यजुरपि अजायत॥

(Dinakara)

सर्वहुतः तस्मात् पूर्वोक्ताद् यज्ञात् ऋचः सामानि (च) जज्ञिरे उत्पन्नानि। तस्मात् यज्ञात् छन्दांसि गायत्र्यदीनि। (जज्ञिरे)। तस्मात् यजुः अपि अजायत उत्पन्नम्॥१४७॥

From that act of sacrifice (tasmat yajñāt), which was of the nature of all-oblation (sarvahutah), the ṛk-passages, the sāman chants, the poetic forms (like Gāyatri) and the yajus-explanations were produced (jajñire).

NOTES

1. The three Vedas appear to be suggested here. The expression Udgītha is explained as symbolizing the triad: 'ut' Sāman, 'gi' yajus and 'tha' Ṛgveda (*Chhāndogya-up.* 1,7,5).

Prajāpati (purusha) entered into the waters of creation along with these three branches of the Veda (*Śatapatha-brāhmaṇa*, 6,3,1,11):

प्रजापतिः त्रय्या विद्यया सह आपः प्राविशत् ॥

And he perceived that all creatures were present in the three branches of the scripture (ibid 10,4,2,21):

अथ सर्वाणि भूतानि पर्यैक्षत् । स त्रय्यामेव विद्यायाऽ सर्वाणि भूतान्यपश्यत् ॥

Then, Prajāpati recognized that the triad were but his own limbs; it was on that basis that his body had been constructed (ibid. 10,4,2,22)

स ऐक्षत प्रजापतिः । त्रय्यां वाव विद्यायाꣳ सर्वाणि भूतानि ।
हन्त त्रयीमेव विद्यां आत्मानमभिसंस्करवा इति ॥

2. It is interesting that the three Vedas are associated with the three classes of people (varṇa), in *Taittirīya-brāhmaṇa* (3,12,9,2):

ऋग्भ्यो जातं वैश्यं वर्णमाहुः । यजुर्वेदं क्षत्रियस्याहुर्योनिम् । सामवेदो ब्राह्मणानां प्रसूतिः ॥

Later (in 10, 90, 12), the three expressions brāhmaṇa, rājanya and vaiśya are employed together with śūdra (cf. for explanation Notes on 150)

(148)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज् जाता अजावयः ॥१४८॥
(१०.९०.१०)

(पदपाठः)

तस्मात् । अश्वाः । अजयन्त । ये । के । च । उभयादतः ॥
गावः । ह । जज्ञिरे । तस्मात् । तस्मात् । जाताः । अजावयः ॥

(अन्वयः)

तस्मात् अश्वाः अजायन्त । च उभयादतः ये के (अजायन्त)। तस्मात् गावो ह जज्ञिरे । तस्मात् । अजावयः जाताः ॥

The seer of this mantra is Nārāyaṇa; the poetic form is Anushṭup, and the deity described is Purusha.

(Sāyaṇa)

तस्मात् पूर्वोक्ताद्यज्ञात्। अश्वाः। अजायन्त उत्पन्नाः। तथा। ये के च अश्वव्यतिरिक्ताः गर्दभाः अश्वतराश्च। उभयादतः ऊर्ध्वाधोभागयोरुभयोः दन्तयुक्ताः सन्ति तेऽपि। अजायन्त। तथा। तस्मात् यज्ञात्। गावश्च। जज्ञिरे। किञ्च। तस्माद्यज्ञात्। अजावयश्च जाताः॥

(Dinakara)

तस्मात् पूर्वोक्तात् यज्ञात् अश्वाः अजायन्त उत्पन्नाः। यो के च अश्वव्यतिरिक्ताः गर्दभा अश्वतराश्च उभयादतः ऊर्ध्वाधोभागयोरुभयोर्दन्तयुक्ताः सन्ति तेऽपि अजायन्त। तथा तस्माद् यज्ञात् गावः च जज्ञिरे। तस्मात् यज्ञात् अजाः अवयश्च जाताः॥१४८॥

From the yajña (tasmāt) horses came forth (aśvā ajāyanta), and whatever (ye ke) animals have two rows of teeth (upper and lower) (ubhayādatah); also were produced (jajñire) cattle, (gāvah), goats (aja), and sheep (avayah). [See Notes on Mantra 150 (10,90,12)]

NOTES

1. Aśva in the Vedic passages refer to will, force, energy strength, speed (from aśū) impulsion, and possession (from aś). Gāvah signify rays of light, wisdom. Aja (unborn) represents the Brahman principle of austerity, wisdom and priestly duty. Avi is kshatra, valour and might. The 'gāvah' standing for 'viśah' is pervasive, like the rays of the sun. cf. *Taittirīya-samhitā,* 7,1,1,4 of and Notes on 149.

2. In *Śatapatha-brāhmaṇa* (6,4,4,13) horse (aśva) is associated with kshatriya, the foremost among the three varṇas, as he emerged first from āhavanīya-agni. This text aligns ass (rāsabha) with Vaiśya and goat (aja) with Brahmaṇa.

अश्वः प्रथम एति तस्मात् क्षत्रियं यन्तमितरे त्रयो वर्णाः पश्चादनुयान्ति...॥

(149)

ऋषिः नारायणः ।

छन्दः अनुष्टुप् ।

देवता पुरुषः ॥

(संहितापाठः)

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥१४९॥
(१०.९०.११)

(पदपाठः)

यत् । पुरुषम् । वि । अदधुः । कतिधा । वि । अकल्पयन् ॥ मुखम् ।
किम् । अस्य । कौ । बाहू इति । कौ । ऊरु इति । पादौ । उच्येते इति ॥

(अन्वयः)

यत् (यदा) पुरुषं व्यदधुः कतिधा व्यकल्पयन् ? अस्य (पुरुषस्य) मुखं किम् ? अस्य बाहू का ? ऊरू पादौ कौ उच्येते ?

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup, and the deity described is Purusha.

(Sāyaṇa)

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापतेः प्राणरूपा देवाः। यत् यदा। पुरुषं विराड्रूपम्। व्यदधुः संकल्पेनोत्पादितवन्तः। तदानीम्। कतिधा कतिभिः प्रकारैः। व्यकल्पयन् विविधं

कल्पितवन्तः। अस्य पुरुषस्य। मुखं किम् आसीत्। कौ बाहू अभूताम्। का ऊरू कौ च पादौ उच्येते। प्रथमं सामान्यरूपं प्रश्नः। पश्चात् मुखं किमित्यादिना विशेषविषयाः प्रश्नाः।।

(Dinakara)

प्रश्नोत्तररूपेण ब्राह्मणादिवर्णसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्नाः उच्यन्ते। प्रजापतेः प्राणरूपा देवाः यत् यदा पुरुषं विराड्रूपं व्यदधुः संकल्पेनोत्पादितवन्तः (तदा कतिधा कतिभिः प्रकारैः व्यकल्पयन् विविधं कल्पितवन्तः)। अस्य पुरुषस्य मुखं किम् आसीत्। कौ बाहू अभूताम्। कौ ऊरू कौ च पादौ उच्येते। प्रथमं सामान्यरूपः प्रश्नः पश्चात् मुखं किम् इत्यादिना विशेषविषयाः प्रश्नाः ।।१४९।।

When (yat) the gods produced the Purusha (purusham vyadadhuh) out of the yajña, how did they organize him into different dimensions (katidhā vyakalpayan)? what was his face (kim asya mukham)? What were his arms (kau bāhū)? What were his thighs (kā ūrū)? And what came to be recognized as his feet (pādā uchyete)?

(150)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥१५०॥
(१०.९०.१२)

(पदपाठः)

ब्राह्मणः । अस्य । मुखम् । आसीत् । बाहू इति । राजन्यः । कृतः ॥
ऊरू इति । तत् । अस्य । यत् । वैश्यः । पत्ऽभ्याम् । शूद्रः । अजायत ॥

(अन्वयः)

अस्य (यज्ञस्य) ब्राह्मणः मुखः आसीत् । राजन्यः बाहू कृतः । तत् अस्य ऊरू वैश्यः । पद्भ्यां शूद्रः अजायत ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity described is Purusha.

(Sāyaṇa)

इदानां पूर्वोक्तानां प्रश्नानां उत्तराणि दर्शयति। अस्य प्रजापतेः। ब्राह्मणो ब्राह्मणत्व-जातिविशिष्टः पुरुषः। मुखमासीत् मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रियत्वजातिमान् पुरुषः। सः। बाहू कृतः बाहुत्वेन

निष्पादितः। बाहुभ्यां उत्पादित इत्यर्थः तत् तदानीं। अस्य प्रजापतेः। यद् ऊरू। तद्रूपो वैश्यः सम्पन्नः। ऊरुभ्यामुत्पन्न इत्यर्थः। तथा। अस्य पद्भ्यां पादाभ्याम्। शूद्रः शूद्रत्वजातिमान् पुरुषः। अजायत। इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः यजुः संहितायां सप्तमकाण्डे स मुखस्त्रिवृतं निरमिमीत। (तैत्तिरीयसंहितायां ७,१,१,४) इत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतैव योजनीये॥

(Dinakara)

इदानीं पूर्वोक्तप्रश्नानामुत्तराणि दर्शयति। अस्य प्रजापतेः ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषः मुखम् आसीत् मुखादुत्पन्न इत्यर्थः। यः अयं राजन्यः क्षत्रियत्वजातिमान् पुरुषः सः बाहू कृतः बाहुत्वेन निष्पादितः इति, बाहुभ्यां उत्पादित इत्यर्थः। तथा। अस्य प्रजापतेः यत् यौ ऊरु तद्रूप वैश्यः संपन्नः। तथा अस्य पुंसः पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान् अजायत। इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः यजुःसंहितायां सप्तमकाण्डे 'स मुखतस्त्रिवृतं निरभितीत' (तै.सं.७.१.१.४) इत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतया योजनीये॥१५०॥

The priest (brāhmaṇa) constituted his face (mukham āsīt) and his arms (bāhū kṛtah) the ruler (rājanyah); his thighs (ūrū) were the farmer-trader (vaiśya); and from his feet (padbhyah) the worker (śūdra) emerged forth (ajāyata).

NOTES

1. As Sāyaṇa points out, the mantra is to be interpreted in conformity with the account given in *Taittirīya-samhitā* (7,1,1,4 ff)

प्रजापतिर्वाव ज्येष्ठः । स ह्येतेनाग्रेऽयजत । प्रजापतिरकामयत प्र जायेयेति । स मुखतस्त्रिवृत्तं निरमिमीत । तमग्निर्देवत्तऽन्वसृजत । गायत्री छन्दो। रथन्तर९साम । ब्राह्मणो मनुष्याणां । अजः पशूनां । तस्मात्ते मुख्या मुखतो ह्यसृज्यन्त ॥

Having completed the yajña, Prajāpati desired to produce progeny. He brought 'trivṛtstoma into being. And he was responsible for the chief among

the luminous ones: Agni, the principal one among the poetic forms, Gāyatri, Rathantara among the Sāma, brāhmaṇa among human beings and goat among animals. We get this list from the text.

1. From the Face (mukhatah):

i)	Devatā	-	Agni
ii)	Chhandas	-	Gāyatri
iii)	Sāma	-	Rathantara
iv)	Manushya	-	Brāhmaṇa (priests and teachers)
iv)	Paśu	-	goat (aja)

2. From the chest and arms (uraso bāhubhyām):

i)	Devatā	-	Indra
ii)	Chhandas	-	Trishṭup
iii)	Sāma	-	Bṛhat
iv)	Manushya	-	Rājanya (kshatriya) (rulers and soliders)
v)	Paśu	-	sheep (avi)

3. From the middle portion (madhyatah):

i)	Devatā	-	Viśve devāh
ii)	Chhandas	-	Jagatī
iii)	Sāma	-	Vairāja
iv)	Manushya	-	Vaiśya (people in general)
v)	Paśu	-	cows (gāvah)

4. From the feet (pattah):

i) Ekavimśm (stoma

ii) Chhandas	-	Anushṭup
iii) Sāma	-	Vairāja
iv) Manushya	-	Śūdra
v) Paśu	-	horse

2. According to Sāyaṇa and his followers, what we find in this mantra is a reference to the four classes of people (varṇas) that constitute our society. In the *Taittirīya-Samhitā* passages cited above, the first three groups are associated with devatās and not so the fourth one. The association with devatās is taken by Sāyaṇa and his followers to indicate the eligibility to perform yajñas. There is no doubt that Purusha-sūkta is in nature and content somewhat different from the other hymns in the Ṛgvedic corpus. But it cannot be described as 'interpolated' (prakshipta).

And it is also true that nowhere else in the corpus do we find the enumeration of the four classes. However, the words 'brahma', 'kshatra' and 'viśa' have been often employed (as in 8, 35, 16; 4, 50, 8; 4, 42). They do not however suggest the differentiation among the masses. Brahma is priestly power, wisdom and word of knowledge. It refers to making of the mantra (mantra-kṛt), seer of the hymn (sūkta-drashṭṛ) or priest (purohita). Kshatra is heroic power, might and valour. Viśa is people in general, common people. It is quite frequently found in the Ṛgvedic passages (as in 1, 127, 2; 5, 8, 2 and 3; 5, 18, 1; 6, 8, 4; 7, 5, 2 and 3; 8, 43, 21; 8, 75, 8; 10, 11, 4; 10, 69; 1 and 9; 10, 80, 6; 10, 91, 2).

And as *Śatapatha brāhmaṇa* (5, 7, 6, 2 and 3) points out, both Brahma and Kshatra are included in the Viśa (ब्रह्मक्षत्रे च विशि प्रतिष्ठिते ।). But the mantra in the hymn to Purusha is probably the only place where the word 'vaiśya' is used; even as the word 'rājanya' for the kshatriya. In this case, the words do not refer to castes or classes of people (varṇa).

It is to be noted that brahma, kshatra and viśa come for mention often in Ṛgveda, but the word śūdra is to be found only in this mantra and nowhere else. Further, brahma is associated with Agni, kshatra with Indra and viśa with Viśvedevas; although the word śūdra is used in this text, it is not associated with any deva. And śūdra is aligned to horse as the animal; and 'aśva' the Vedic world for horse means force, energy, strength, speed, impulsion and possession (from the root 'aś' or 'aśū'). Vaiśya in *Taittirīya-samhitā* is here aligned with cow (go) understandably. Brahma's association with goat (aja) and kshatra's with sheep (avi) is also significant. It may be seen that all these animals and only these animals figure in 10, 90, 10 (No. 148 here).

3. *Aitareya-brāmaṇa* (34,19) regards brahma and kshatra as two powers that were produced by Prajāpati through yajña and that two classes of people were formed thereby:

प्रजापतिर्यज्ञमसृजत । यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येताम् ।
ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यन्त । हुतादश्चाहुतादश्च ॥

This text indentifies brahma with eligibility to partake of the sacrificial food (hutāda); and kshatra with the absence of this eligibility (ahutāda);

and vaiśya and śūdra are included here in the kshatra class (अथैता आहतादो यद्राजन्यो वैश्यः शूद्रः।). The first power is derived from sacrifice (yajña) alone, whereas the second employs horse, chariot, armour, bow, arrow and so on. The combined weaponry of the kshatra was unable to constitute the yajña, while the power of brahma acquired yajña. It is therefore that yajña is associated with the power of brahma represented by the class of people called brāhmaṇas:

एतानि वै ब्रह्मण आयुधानि यद्यज्ञायुधानि । अथैतानि क्षत्रस्यायुधानि यदश्वरथः कवच इषुधन्व । तं क्षत्रमनन्वाप्य न्यवर्ततायुधेभ्यो ह स्मास्यविजमानः पराङीवैत्यथैनं ब्रह्मान्वैत् । तमाप्नोत् । तमाप्त्वा परस्तान् निरुध्यातिष्ठत् ।... तस्माद्धाप्येतर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितः ॥

(ibid, 34,19)

4. That the four varṇas were equal manifestations of Brahman has been indicated in *Bṛhadāranyaka upanishad* (1,4,15):

तदेतद् ब्रह्म क्षत्रं विट् शूद्रस्तग्निनैव देवेषु ब्रह्माभवत् ।

Taittirīya-samhitā (5,7,6,2,3) invokes Agni, Indra and Bṛhaspati to protect the four classes of people and confer blessings on all of them equally:

ताभिः सर्वाभी रुचे जनाय नस्कृधि । या वो देवाः सूर्ये रूचो गोष्वश्वेषु या रुचः । इन्द्राग्नी, ताभिः सर्वाभी रुचं नो धत्त बृहस्पते । रुचं नो धेहि ब्राह्मणेषु रूचꣳराजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचारुचम् ॥

The first sentence in this passage refers to all human beings (janāya) as deserving of the bestowal of the brilliance of the all-pervasive sun-light.

5. In Ṛgveda (8, 35, 16 to 18) we find the expressions brahma, kshatra and viśa beeing used in a series, invoking the grace of the Aśvins:

ब्रह्म जिन्वतमुत जिन्वतं धियो... (Be favourably disposed towards the hymn-maker, the brāhmaṇa and impel his intellect).

क्षत्रं जिन्वतमुत जिन्वतं नॄन्... (Be favourably disposed towards the valourous and powerful; promote his entourage)

धेनूर्जिन्वतमुत जिन्वतं विशो... (Be favourably disposed towards all people and protect and enlarge the cattle.)

(151)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ॥१५१॥
(१०.९०.१३)

(पदपाठः)

चन्द्रमाः । मनसः । जातः । चक्षोः सूर्यः । अजायत ॥
मुखात् । इन्द्रः । च । अग्निः । च । प्राणात् । वायुः । अजायत ॥

(अन्वयः)

मनसः चन्द्रमा जातः । चक्षोः सूर्यः अजायत । मुखात् इन्द्रश्च अग्निश्च । प्राणाद्वायुः अजायत ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity described is Purusha.

(Sāyaṇa)

यथा दध्याज्यादिद्रव्याणि, गवादयः पशवः, ऋगादि वेदाः, ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना, एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह। प्रजापतेः मनसः सकाशात् चन्द्रमा जातः। चक्षोः च चक्षुषः। सूर्यः अपि अजायत। अस्य मुखात् इन्द्रश्च अग्निश्च देवौ। उत्पन्नो। अस्य प्राणाद्वायुरजायत॥

(Dinakara)

यथा दध्यादिद्रव्याणि गवादयः पशवः ऋगादयो वेदाः ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्नाः एवं चन्द्रादयो देवा आपि तस्माद्विराट्पुरुषादेवोत्पन्ना इत्याह। प्रजापतेः मनसः सकाशात् चन्द्रमाः जातः। चक्षोः चक्षुषः सूर्यो अजायत। मुखात् इन्द्रः च अग्निः च द्वौ देवावुत्पन्नौ। अस्य प्राणात् वायुः अजायत॥१५१॥

The moon was born (chandramā jātah) out of Purusha's mind (manasah). From his eyes (chakshoh), the sun (sūryah) emerged (ajāyata). From his mouth (mukhāt) issued forth both Indra and Agni; and from his breath (prāṇāt) was formed (ajāyata) Vāyu.

(152)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥१५२॥
(१०.९०.१४)

(पदपाठः)

नाभ्याः । असीत् । अन्तरिक्षम् । शीर्ष्णः । द्यौः । सम् । अवर्तत ॥
पत्ऽभ्याम् । भूमिः । दिशः । श्रोत्रात् । तथा । लोकान् । अकल्पयन् ॥१५२॥

(अन्वयः)

नाभ्या अन्तरिक्षं आसीत् । शीर्ष्णः द्यौः समवर्तत । पद्भ्यां भूमिः । श्रोत्रात् दिशः । तथा लोकान् अकल्पयन् ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup, and the deity described is Purusha.

(Sāyaṇa)

यथा चन्द्रादीन् प्रजापतेः मनःप्रभृतिभ्योऽकल्पयन्, तथा अन्तरिक्षादीन् लोकान् प्रजापतेः नाभ्यादिभ्यः। देवाः। अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्यः प्रजापतेः नाभेः। अन्तरिक्षमासीत्। शीर्ष्णः शिरसः। द्यौः। समवर्तत उत्पन्ना। अस्य। पादाभ्याम्। भूमिरुत्पन्ना। अस्य। श्रोत्रात् दिश उत्पन्नाः॥

(Dinakara)

यथा चन्द्रादयो देवा-मनःप्रभृतिभ्योऽकल्प्यन्त तथा अन्तरिक्षादिलोकान् प्रजापतेर्नाभ्यादिभ्यो देवाः अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्याः प्रजापतेर्नाभेः अन्तरिक्षम् आसीत्। शीर्ष्णः शिरसः द्यौः समवर्तत उत्पन्ना। अस्य पद्भ्यां भूमिः उत्पन्ना। अस्य श्रोत्रात् दिशः उत्पन्नाः। इति॥१५२॥

From the Purusha's navel (nābhyā) came out (āsīt) the mid-region (antariksham); from his head (śīrshṇah), the sky (dyauh) issued forth (sam avartata); from his feet (padbhyām) was formed the earth (bhūmih); and from his ears (śrotrāt) the quarters of space (diśah). Thus (tathā) the gods fashioned (akalpayan) all the worlds (lokān).

(153)

ऋषिः नारायणः ।
छन्दः अनुष्टुप् ।
देवता पुरुषः ॥

(संहितापाठः)

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥१५३॥
(१०.९०.१५)

(पदपाठः)

सप्त । अस्य । आसन् । परिऽधयः । त्रिः । सप्त । समऽइधः । कृताः ॥
देवाः । यत् । यज्ञम् । तन्वानाः । अबध्नन् । पुरुषम् । पशुम् ॥

(अन्वयः)

अस्य (यज्ञस्य) सप्त परिधयः आसन् त्रिःसप्त समिधः कृताः । देवाः यत् यज्ञं तन्वानाः पुरुषं पशुं अभध्नन् ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anushṭup; and the deity described is Purusha.

(Sāyaṇa)

अस्य सांकल्पिकयज्ञस्य। गायत्र्यादीनि सप्त च्छन्दांसि। परिधयः आसन्। ऐष्टिकस्य आहवनीयस्य त्रयः परिधयः। उत्तरवेदिकाः त्रय। आदित्यश्च सप्तमः। परिधिप्रतिनिधिरूपः। अत एव आम्नायते। न पुरस्तात् परिदध्यात् आदित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्तीति। तत एव आदित्यसहिताः सप्तपरिधयः। अत्र च्छन्दोरूपाः। तथा समिधः त्रिःसप्त त्रिगुणीकृत सप्तसंख्याका एकविंशतिः कृताः। द्वादशमासाः, पञ्चर्तवः,

त्रय इमे लोकाः, असावादित्य एकविंशः। तै०सं ५,११०,३। इति श्रुताः पदार्थाः एकविंशतिदारुयुक्तेन्धनत्वेन भाविताः। यत् यः पुरुषः वैराजः अस्ति तं पुरुषम्। देवाः प्रजापतिप्राणेन्द्रिरूपाः। यज्ञं तन्वाना मानसं यज्ञं कुर्वाणाः। पशुमबध्नन् विराट्पुरुषमेव पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः। एतदेवाभिप्रेत्य पूर्वत्र 'यत्पुरुषेण हविषा' इत्युक्तम्॥

(Dinakara)

अस्य साङ्कल्पिकयज्ञस्य सप्त गायत्र्यादीनि सप्त छन्दांसि परिधयः आसन्। ऐष्टिकस्याहवनीयस्य त्रयः परिधयः उत्तरवेदिकास्त्रयः आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः। अत एव आम्नायते - ''न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद् रक्षांस्यपहन्ति'' (तै.सं.२.६.६.३) इति। एवम् आदित्यसंहताः सप्त परिधयः अत्र सप्तच्छन्दोरूपाः। तथा समिधः त्रिः सप्त। त्रिगुणितसप्तसंख्याकाः एकविंशतिः कृताः। ''द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः'' (तै.सं.५.१.१०.३) इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः। यत् यः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं कुर्वाणाः पशुम् अबध्नन् विराट्पुरुषम् एव पशुत्वेन भावितवन्तः। एतदेवाभिप्रेत्य पूर्वं 'यत्पुरुषेण हविषा' इत्युक्तम्॥१५३॥

For this yajña (asya) seven were the enclosures (sapta paridhayah); three-times seven (trih-sapta, viz. twenty one, ekavimśati) were the pieces of fuel that were used (samidhah kṛtāh). This was when (yat) the gods set out to perform the yajña (devāh yajñam tanvānā) and bound (abandhnan) the Purusha as the sacrificial object (paśum)

NOTES

1. 'Pari-dhi', signifies the sacred grass (darbhā) that are placed alround the five-altars in the four directions. This is to prevent the evil forces from approaching and disturbing the sacrifice. It is usual to leave the eastern direction open, for the sun himself will guard the sacrifice from that direction. So *Taittirīya-samhitā* (2,6,6,3).

न पुरस्तात् परि दधाति आदित्यो ह्येवोद्यन् पुरस्ताद्रक्षांऽस्यपहन्ति ॥ The paridhis here, according to Sāyaṇa, the seven poetic forms (chhandas), like Gāyatrī. They protect the mānasa-yajña.

2. The number 'trih-sapta' (or 7x3, twenty-one) indicate the twelve months, five seasons, and the three realms (earth, midregion and sky) together with the sun (āditya) constitute the faggots that are fed into the sacrificial fire. The seasons are vasanta, (spring), grīshma (summer), varshāh (rains), śarat (autumn), hemanta (winter, including śiśira),

Alternately, the five organs of knowledge, the five organs of action, the five vital currents (prāṇa), the five elements (earth, water, fire air and space) and mind are the twenty-one details mentioned here.

3. 'Paśu' literally means the animal; in the sacrificial context, the word refers to the animal (real or iconic, intended to be sacrificed. Here it is mānasa-yajña (conceptual), as Sāyaṇa rightly points out. The individual human form (purusha-vidha) is sacrificed in the cosmic form (virāṭ-purusha). Hence purusha is described as the 'paśu'.

Yāska in his *Nirukta* (12, 41) suggests that paśu symbolizes the fire that is employed to kindle the main fire (sacrificial fire). *Aitareya-brāhmaṇa* (1,15) takes paśu in the sense of faggots that contain fire within them; and says explicitly that fire is the paśu of the devas

यदग्निं मन्थन्ति । अग्निर्हि देवानां पशुः ॥

Śatapatha-brāhmaṇa (6,2,1,2) explains the word 'paśu' by a legend to the effect that the purusha, horse, cow, sheep and goat were sighted (apaśyat) by Prajāpati; they became 'paśus' because they were seen (from the root 'paś', "to see").

स एतान् पञ्च पशूनपश्यत् । पुरुषमश्वं गामविमजं । यदपश्यत्तस्मादेते पशवः ॥

Elsewhere, the same text says that Agni in all his forms is paśu, even as Prajāpati became Agni (6,2,1,12):

त एते सर्वे पशवो यदग्निः ।.... अग्निर्ह्येष यत्पशवस्ततो वै प्रजापतिरग्निरभवत् ॥



(154)

ऋषिः नारायणः ।
छन्दः त्रिष्टुप् ।
देवता पुरुष ॥

(संहितापाठः)

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१५४॥
(१०.९०.१६)

(पदपाठः)

यज्ञेन । यज्ञम् । अयजन्त । देवाः । तानि । धर्माणि । प्रथमानि । आसन् ॥
ते । ह । नाकम् । महिमानः । सचन्त । यत्र । पूर्वे । साध्याः । सन्ति । देवाः ॥

(अन्वयः)

देवाः यज्ञेन यज्ञं अयजन्त । तानि प्रथमानि धर्माणि आसन् । यत्र पूर्वे देवाः साध्याः सान्ति नाकं ते महिमानः सचन्ते ॥

The seer of the mantra is Nārāyaṇa; the poetic form is Anusṭup; and the deity described is Purusha.

(Sāyaṇa)

पूर्वं प्रपश्चेनोक्तं अर्थं संक्षिप्यात्र दर्शयतिं। देवाः प्रजापतिप्राणरूपाः। यज्ञेन यथोक्तेन मानसेन संकल्पेन। यज्ञं यथोक्तयज्ञस्वरूपं प्रजपतिम्। अयजन्त पूजितवन्तः। तस्मात् पूजनात्। तानि प्रसिद्धानि। धर्माणि जगद्रूपविकाराणां धारकाणि। प्रथमानि मुख्यानि। आसन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः।

अथोपासनतत्फलानुवादकभागार्थः संगृह्यते। यत्र यस्मिन् विराट्प्राप्तिरूपे। नाके। पूर्वे साध्याः पुरातना विराडुपास्तिसाधकाः। देवाः। सन्ति तिष्ठन्ति। तन्नाकम् विराट्प्राप्तिरूपं स्वर्गम्। ते महिमानः तदुपासकाः महात्मानः। सचन्त समवयन्ति। प्राप्नुवन्ति॥

(Dinakara)

अस्याः पूर्वं प्रपञ्चेनोक्तम् अर्थं संक्षिप्य दर्शयति। देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन सङ्कल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिम् अयजन्त पूजितवन्तः। तस्मात् पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि आसन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः। अथोपासनतत्फलानुवादकभागार्थः संगृह्यते। यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाः विराडुपास्तिसाधकाः देवाः सन्ति तत् नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानः तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्तीति॥१५४॥

इति पुरुषसूक्तव्याख्या॥

The gods (devas, the vital currents of Purusha or Prajāpati) worshipped (ayajanta) the yajña (viz. Purusha) through the yajña (viz. mānasa-yajña, mental act). Thus were brought first and foremost into existence (prathamāni āsan) the principles underlying individual and collective existence (dharmāṇi). The great ones who worship thus (te mahimānah) will indeed reach (ha sachante) the abode of bliss (nākam), where the ancient accomplishers (sādhyāh) and gods (devāh) dwell (santi).

NOTES

1. Sāyaṇa suggests that the sentence यज्ञेन यज्ञं अयजन्त can be interpreted in three ways:

(1) यज्ञेन निर्मथ्याग्निना यज्ञं होमसाधनं आहवनीयं अयजन्त पूजितवन्तः॥ This is entirely in the ritualistic context. The āhavanīya-fire is joined with the nirmathya-fire, and the sacrificial act is accomplished

(2) यज्ञेनाग्निना पशुभूतेन यज्ञं यष्टव्यं अग्निं अयजन्त पूजितवन्तः॥ The sacrificial object (paśu) (viz. the sacred faggots is also of the nature of fire; and with this the fire-ritual is completed (cf. also Yāska, *Nirukta,* 12, 41 अग्निनाग्निमयजन्त)

(3) यज्ञेन ज्ञानादियज्ञेन यज्ञं विष्णुमयजन्त॥ Vishṇu (who is yajña, यज्ञो वै विष्णुः।) was approached through knowledge.

2. The word Nāka is explained as the abode (like heaven) where distress does not exist:

नास्मिन् अकमस्तीति नाकः स्वर्गः।

Nāka is negation of 'aka', which is itself a negation of 'ka' (meaning happiness). As *Nirukta* (2,14) puts it:

कमिति सुखनाम । तत्प्रतिषिद्धं प्रतिषिद्ध्येत॥

It is in the *Nighaṇṭu* synonymous with the luminous realm above (dyauh). This region is described as the abode of all the gods (RV. 1,19,6).

ये नाकस्याधिरोचने दिवि देवास आसते॥ It is also identified with the Sun (āditya) (ibid 1,34,8)

तिस्रः पृथिवीरुपरि प्र वा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम्।

Also *Chhandogya-Upanishad* (2,10,5) described nāka as the sorrowless abode of Āditya:

इतोऽसावादित्यो द्वाविंशेन परमादित्याज्जयति तन्नाकं तद्विशोकम्।।

3. Here the Purusha-sūkta ends.

(155)

ऋषिः पूरूरवा ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥
(अथ पुरूरवोर्वशीसंवादः)

(संहितापाठः)

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥
(१०.९५.१)

(पदपाठः)

हये । जाये । मनसा । तिष्ठ । घोरे । वचांसि । मिश्रा । कृणवावहै नु ।
न नौ । मन्त्राः । अनुदितासः । एते । मयः । करन् । परऽतरे । चन । अहन् ॥

(अन्वयः)

हये घोरे जाये, मनसा तिष्ठ । वचांसि नु मिश्रा कृणवावहै । नौ एते मन्त्राः अनुदितासः परतरे चन् अहन् मयः न करन् ॥

The seer of the mantra is Purūrava, son of Iḷā, the poetic form is Anushṭup and the deity addressed is Urvaśī.

(Sāyaṇa)

(पुरूरवसो वाक्यम्। जायां पश्यन् वदति।)

हये हे घोरे । अस्मकं दुःखजनकत्वात्। घोरकारिणि जाये। मनसा अस्मदुपरागवता मनसा युक्ता सतो। तिष्ठ क्षणमात्रं संनिधावेव निवस। किमर्थं संस्थानमिति तत्राह। वचांसि वाक्यानि। मिश्राणि

उक्तिप्रत्युक्तिरूपाणि। नु अद्य क्षिप्रम् वा। कृणवावहै करवावहै। किमर्थं वचसः करणमिति चेत् उच्यते। नौ आवयोः। मन्त्रा रहस्यार्थाः। एते विवक्षिता। अनुदितासः अव्याह्रियमाणाः। परस्परसंभाष्यमाणा गुंफिताः सन्तः। परतरे चनाहन्। चनेति निपातसमुदायश्चार्थे। अनेकेषु दिवसेषु चरमेऽप्यहनि। मयः सुखनामैतत्। सुखं न करन्। कुर्वन्ति। अतः कृणवावहा इति॥

(Dinakara)

पुरूरवो जायां वदति। हे जाये मनसा घोरे तिष्ठ। मिश्रा मिश्राणि नु अद्य उक्ति (प्रत्युक्ति) रूपाणि वचांसि कृणवावहै करवावहै। नौ आवयोः मन्त्राः रहस्यार्थाः एते विवक्षिताः। चनेति चार्थे। परतरे अहन् चरमे अहनि च अनुदितासः अनुत्पन्नाः सन्तः मयः सुखं न करन् न कुर्वन्ति॥१५५॥

(Purūravas says)

O my fierce wife (haye ghore jāye), stay for a while (tishṭha) with an easy mind (manasā). Let us talk together (miśrā vachāmsi kṛṇuvāvahai) now (nu). These (ete) our secret thoughts (nau mantrāh) which were unarticulated (anuditāsa) do not make us happy (na mayaskaran) even in our last days together (paratare chāhan).

NOTES

This mantra and the following seventeen mantras are in the nature of a dialogue (samvāda) between the nymph Urvaśī and the king Purūravas, son of Iḷā (Sāyaṇa : एळोर्वशीतिहासोऽत्र वैशद्याय प्रवर्ण्यते॥) Purūravas fell madly in love with Urvaśi. He cried bitterly when he got separated from the nymph (hence his name Purūravā पुरूरवाः बहुधा रोरूयते। तस्यैषा भवति। *Nirukta* 10,46). The story of Purūravas and Urvaśi is related in *Śatapatha-brāhmaṇa* (11, 5, 1-15), Shaḍguru-śishya's gloss on *Sarvānukramaṇī, Mahābhārata* (Adiparva,

69, 21-27), *Kāṭhaka-saṃhitā* (8,10,3) and in some Purāṇas like Vāyu and Vishṇu. There are different versions of the story.

Bṛhaddevatā (7,147-153) describes Purūravas as a saintly king (rājarshi). He ruled over Pratishṭhāna-pura. He and Urvaśi lived together for some years (four according to some sources), in mutual love and adoration, but with an understanding (saṃvid, contract).

पूरूरवसि राजर्षौ अप्सरास्तूर्वशी पुरा।
न्यवसत्संविदं कृत्वा तस्मिन् धर्मं चचार च।।

Purūravas was a mortal human being, and Urvaśi was a celestial damsel; and the love between the two annoyed Indra, who commissioned his weapon Vajra to cause a rift between them. Vajra obliged, and exercised his deceitful magic. When Urvaśi disappeared, Purūravas, love-lorn, became mad with grief and wandered about. In the course of his wandering, one day he sighted Urvaśī in a pond sporting with her friends. Purūravas requested Urvaśī to return to him. But she refused, saying that she was now beyond his reach, and promising to become his beloved again in the heaven.

तया तस्य च संवादमसूयन् पाकशासनः।
पैतामहं चानुरागमिन्द्रवच्चापि तस्य तु।
स तयोस्तु वियोगार्थं पार्श्वस्थं वज्रमब्रवीत्।
प्रीतिं भिन्दि तयोर्वज्र मम चेदिच्छसि प्रियम् ।।
तथेत्युक्त्वा तयोः प्रीतिं वज्रोऽभिनत्स्वमायया।
ततस्तया विहीनस्तु चचारोन्मत्तवन्नृपः।।
चरन् सरसि सोऽपश्यदभिरूपामिवोर्वशीम्।
सखीभिरभिरूपाभिः पञ्चभिः पार्श्वतो वृताम्।।

तामाह पुनरेहीति दुःखात्सा त्वब्रवीन्नृपम्।
अप्राप्याहं त्वयाद्येह स्वर्गे प्राप्स्यसि मां पुनः॥

The mantras in the Ṛgveda contain the conversation between the two: the invitation by Purūravas, and the rejection by Urvaśī:

आह्वानं प्रति चाख्यानमितरेतरयोरिदम्।
संवादं मन्यते यास्क इतिहासं तु शौनकः॥

(156)

ऋषिः उर्वशी ।
छन्दः त्रिष्टुप् ।
देवता पूरूरवा ऐलः ॥

(संहितापाठः)

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥
(१०.९५.२)

(पदपाठः)

किम् । एता । वाचा । कृणव । तव । अहम् । प्र । अक्रमिषम् । उषसाम् । अग्रियाऽइव ॥
पुरूरवः । पुनः । अस्तम् । परा । इहि । दुःऽआपना । वातःऽइव । अहम् । अस्मि ॥

(अन्वयः)

एता वाचा किं कृणव? उषसां अग्रिया इव अहं तव प्राक्रमिषम् । पुरूरवः, अस्तं परेहि । अहं वात इव दुरापना अस्मि ॥

The seer of this mantra is Urvaśi; the poetic form is Anushṭup; and the deity addressed is Purūravas, the son of Iḷā.

(Sāyaṇa)

(अनया तमुर्वशी प्रत्युवाच)

एतैतया वाचा कैवलया पुनः संभोगरहितया किं कृणव किं करवाव? अहं तु इदानीं। तव त्वत्सकाशात्। प्रक्रामिषं अतिक्रान्तवत्यस्मि। अतिक्रमे दृष्टान्तः। उषसां अग्रियेव बह्वीनां उषसां मध्ये अग्र्या अग्रे भवा। पूर्वोषाः प्राक्रामीद् यथा अहमपि इति। यस्मादेवं तस्माद्धे पुरूरवः। त्वं पुनः अस्मत्सकाशात्। अस्तं गृहम्।

परेहि परागच्छ। मा ममाभिलाषं कार्षीः। तस्या दुर्ग्रहत्वमाह। अहं। वात इव वायुरिव। दुरापना दुष्प्रापा दुरापा वा अस्मि। दुरापा वा अहं त्वया एतर्ह्यस्मि पुनर्गृहान् इहि इति हैवैनं तदुवाचेति वाजसनेयकम्॥

(Dinakara)

उर्वश्याह। एतया तव केवलया वाचा अहं किं कृणव करवाव। अहं त्वत्सकाशात् प्राक्रमिषं गतवती। तत्र दृष्टान्तः। उषसाम् अग्रियेव। हे पुरूरवः त्वम् अस्तं गृहं परा इहि (परा) गच्छ। अहं वात इव दुरापना दुष्प्रापा अस्मि॥१५६॥

(Urvaśī says)

What do we achieve (kim etā kṛṇuvā) by talking together (vāchā)? I am gone from you (aham tava prākramisham), like the first of the dawns (ushasām agriyā iva). Go back now to your abode (punah astam parehi), O Purūravas, I (durāpanā asmi), like thin air (vāta iva)

NOTES

The word Purūrava literally means 'much-sound'; it signifies thunderstorm, thunderbolt. *Nirukta* (10,46-47) says: पुरूरवाः पुरू रवा बहुधा रोरूयते। तस्यैषा भवति। The glossator Durga explains that the word refers to the divinity in the mid-region (madhyama-sthāna-devatā) or Agni in the midregion (madhyamāgni). *Nirukta* (5,13) explains the word Urvaśī as signifying 'greatly celebrated' (उर्वभ्यश्नुते। उरु महत् यशोऽभिव्याप्नोतीति) or 'exceedingly bright or possessive (उरुर्वा वशोऽस्याः।). Durgā takes 'vaśa' in the sense of kāma or sensual love; but the root 'vas' also signifies brilliance, kāntau), or 'possession through thighs' (उरुभ्यां अश्नुते।). It is reasonable to take Urvaśī to symbolize the expansive and attractive character of the earth, and Purūravas the descent of thunder and rains from the atmosphere onto the earth. Even when Urvaśī

is made to refer to a celestial damsel (apsaras), the word 'apsarā' means that which is expansive, pervasive (from 'āplṛ vyāptau'); Sākapūṇi interprets pervasion as suggesting wide and vivid visibility (cf. *Nirukta*, 5,13):

> आप्लृ व्याप्तौ तस्य वा अप्सः। तद्भिनायनेन रश्मिना आत्मनः
> प्रत्ययाधानार्थं व्यापयितव्यं भवति। स्पष्टं दर्शनायेति शाकपूणिः।।

It is also to be noted that when Purūravas is described as the offspring of Iḷā, 'iḷā' means the earth, the firmament.

(157)

ऋषिः पुरूरवः ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ॥
(१०.९५.३)

(पदपाठः)

इषुः । न । श्रिये । इषुऽधेः । असना । गोऽसाः । शतऽसाः । न । रंहिः ॥
अवीरे । क्रतौ । वि । दविद्युतत् । न । उरा । न मायुम् । चितयन्त । धुनयः ॥

(अन्वयः)

इषुधेः इषुः श्रिये असना न । गोषाः रंहिः न । शतसाः । अवीरे क्रतौ न वि दविद्युतत् । धुनयः उरा मायुं न चितयन्त ॥

The seer of the mantra is Purūrava, son of Iḷa; the poetic form is Trishṭup; and the deity addressed is Urvaśī.

(Sāyaṇa)

(अनया पुरूरवाः स्वस्य विरहजनितं वैक्लव्यं तां ब्रूते।)

इषुधेः इषवो धीयन्तेऽत्रेतीषुधिर्निषङ्गः। ततः सकाशात् इषुरसनासनायै प्रक्षेप्तुं न भवति। श्रिये विजयार्थम्। त्वद्विरहाद्युद्धस्य बुद्धावप्यनिधानात्। तथा। रंहिर्वेगवानहम्। शत्रुसकाशात्। गोषाः तेषां शत्रूणां गवां संभक्ता नाभवम्। तथा। शतसाः शतानां अपरिमितानां शत्रुधनानां संभक्ता नाभवम्। किञ्च। अवीरे

वीरवर्जिते। क्रतौ राजकर्मणि सति। न वि दविद्युतत् न विद्योतते। न मत्सामर्थ्यम्। किञ्च। धुनयः कम्पयितारः अस्मदीया नरा उरोरौ। विस्तीर्णे संग्रामे। मायुं मीयते प्रक्षिप्यत इति मायुः शब्दः। सिंहनादम्। न चितयन्त बुद्ध्यन्ते।

(Dinakara)

अनया पुरूरवाः विरहक्लेशं तां प्रति ब्रूते। इषुधेः सकाशात् निर्गतः इषुः त्वद्विरहात् असना। (असनायै प्रक्षेप्तुं श्रिये) जयश्रिये न भवति। तथा रंहिः वेगवान् अहं शत्रूणां गोषाः तैः (गवां) संभक्ता मिलिता(?) नाभवम्। तथा शतसाः शतानामपरिमितानां शत्रुधनानां संभक्ता नाभवम्। किं च अवीरे वीरवर्जिते क्रतौ युद्धयज्ञेऽपि न वि दविद्युतत् न (विद्योतते) मत्सामर्थ्यम्। धुनयः (कम्पयितारः) अस्मदीयाः भटाः उरा उरौ (विस्तीर्णे संग्रामे) मायुम्। मीयते प्रक्षिप्यत इति मायुः शब्दः। तं न चितयन्त (चिती संज्ञाने) नावबुध्यन्त॥१५७॥

(Purūravas pleads)

My arrow (ishuh) does not fly forth (asanā na) from the quiver (ishudheh) for victory (śriye). I cannot rush forward to win the cattle of my foes (goshāh), or acquire the hundred rewards of the battle (śatasā). My will and energy (kratau) are devoid of fortitude (avīre); and my valour does not shine in my actions (na vi davidyutat). My soldiers who can shake up the foes (dhunayah) will not listen (na chitayanta) to my words of command (māyum) in the extended engagements (urā).



(158)

॥ ऋग्द्वयं परित्यक्तम् ॥

ऋषिः पुरूरवः ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदे चक्षुर्न ग्रन्थिनी चरण्युः ।
ता अञ्जयोऽरुणयो न संत्रुः श्रिये गावो न धेनवोऽनवन्त ॥१५८॥
(१०.९५.६)

(पदपाठः)

या । सुऽजूर्णिः । श्रेणिः । सुम्नेऽआपिः । ह्रदेऽचक्षुः । न । ग्रन्थिनी । चरण्युः ॥
ताः । अञ्जयः । अरुणयः । न । सस्रुः । श्रिये । गावः । न । धेनवः । अनवन्त ॥

(अन्वयः)

या सुजूर्णिः श्रेणिः सुम्न आपिः ह्रदेचक्षुः ग्रन्थिनी चरण्युः। ताः अञ्जयः अरुणयः न स्रुः। धेनवः गावो न श्रिये अनवन्त ॥

The seer of the mantra is Purūrava, son of Iḷā; the poetic form is Trishṭup; and the deity addressed is Urvaśī.

(Sāyaṇa)

(पुरूरवसो वाक्यम्।)

या सुजूर्णिः सजवैतन्नामिकास्ति। तथा या श्रेणिर्या सुम्नआपिर्या ह्रदेचक्षुः। नकारः समुच्चये। ताभिः चतसृभिः आलिभूताभिः मानिनीभिः सहिता। ग्रन्थिनी ग्रन्थनवती सन्दर्भवती। चरण्युः चरणशीला उर्वशी

आजगाम। यद्वा ग्रन्थिनीत्येतत् सखिभूताप्सरे। नादधेयम्। या सुजूर्णिः सुजवोर्वशी सा ताभिः सह जगाम। ता अप्सरसोऽञ्जय आभरणोपेताः। अरुणयोऽरुणवर्णा। न ससुः पूर्ववन्न गच्छन्ति। श्रिये श्रयणाय धेनवो नरप्रसूता। गावो न गाव इव। आश्रयार्थं यथा गावः। अनवन्त शब्दायन्ते। तथा न शब्दयन्तीति व्यतिरेके दृष्टान्तः ।।

(Dinakara)

पुरूरवसो वाक्यम्। सुजूर्णिः श्रेणिः सुम्नआपिः ह्रदेचक्षुः इति चतस्रः सख्यः। नकारः समुच्चये। ताभिश्चसृभिः ग्रन्थिनी सहिता चरण्युः चरणशीला उर्वशी आजगामेति शेषः। ताः सख्यः अञ्जयः आभरणोपेताः अरुणयः अरुणवर्णाः न सस्रू पूर्ववत् न गच्छन्ति मदानुकूल्यं न कुर्वन्तीत्यर्थः। श्रिये श्रयणाय धेनवः नवप्रसूताः गाव इव अनवन्त (गावः यथा शब्दायन्ते) तथा न शब्दयन्तीति व्यतिरेके दृष्टान्तः। मच्छब्दं न कुर्वन्तीत्यर्थः ।।१५८।।

(The mantras 4 and 5 are omitted)

(Purūravas says)

Urvaśī, who is swift-moving (charaṇyuh) comes here, along with her maids-in-waiting (Sujūrni, Śreṇi, Sumna-āpi, Hrade-chakshus and Granthinī). They are all well-decorated (añjayah), and ruddy-complexioned (aruṇayah). They do not run away as in earlier days (na sasruh). They seek protection (śriye), and articulate softly (anavanta), even like the cows (gāvo na) who have delivered just then (dhenavah).

(159)

ऋषिः उर्वशी ।

छन्दः त्रिष्टुप् ।

देवता पुरूरवा ऐळः ॥

(संहितापाठः)

सम॑स्मिञ्जाय॑मान आसत ग्ना उतेमं॑वर्धन्नद्य१ः स्वगू॑र्ताः ।
महे यत् त्वा॑ पुरूरवो रणाया॑वर्धयन् दस्युहत्या॑य देवाः॥१५९॥
(१०.९५.७)

(पदपाठः)

सम् । अस्मिन् । जाय॑माने । आसत । ग्नाः । उत ईम् । अवर्धन् । नद्यः॑ । स्वऽगू॑र्ताः ॥
महे । यत् । त्वा । पुरूरवः । रणा॑य । अव॑र्धयन् । दस्युऽहत्या॑य । देवाः ॥

(अन्वयः)

अस्मिन् जायमाने ग्नाः समासत । उत ईं स्वगूर्ताः नद्यः अवर्धन् । पुरूरवः, यत् महे रणाय दस्युहत्याय त्वा देवाः अवर्धन् ॥

The seer of the mantra is Urvaśī; the poetic form is Trishṭup; and the deity addressed is Purūravas, son of Iḷā

(Sāyaṇa)

(अनयैताभिःसह संसर्गः त्वयानुभूतः इत्युर्वशी वदति।)

अस्मिन् पुरूरवसि जायमाने सति। ग्ना अप्सरसः देववेश्याः। अपि। समासत सङ्गता अभवन्। उत अपि। च ईमेनं पुरूरवसम्। स्वगूर्ताः स्वयं गामिन्यः। नद्यः तासां आश्रयभूता। अवर्धयन्। किञ्च। हे पुरूरवः। यद्यस्मात्। त्वा त्वाम्। महे महते। रणाय रमणीयाय संग्रामाय। दस्युहत्याय दस्युहननाय। देवाः त्वां अवर्धयन्॥

(Dinakara)

अस्मिन् पुरूरवसि जायमाने वर्धमाने ग्राः अप्सरसोऽपि सम् आसत सङ्गताः अभवन्। मयि स्थितायां तास्वप्यासक्त इति भावः। उत अपि च ईम् एनं पुरुरवसं स्वगूर्ताः स्वयंगामिन्यः नद्यः तासामप्सरसामाश्रयभूताः अवर्धयन्। मयि सत्यपि अन्यासु (अप्सरःसु तं) प्रेरितवत्य इत्यर्थः। किं च हे पुरूरवः (यत् यस्मात्) त्वा महे महते रणाय देवाः दस्युहत्याय दस्युहननाय अवर्धयन्। तेन भोगविघ्नः सूचितः॥१५९॥

(Urvaśī says)

When he (asmin, Purūravas) flashed forth (jāyamāne-sati), celestial damsels (gnāh), surrounded (sam āsata) him (īm), and the rivers, exulting in themselves (nadyah sva-gūrtāh), welled up (avardhan), for (yat), O Purūravas, the gods (devāh) nourished you (avardhan) for the great and glorious enterprise (mahe-raṇāya) of destroying the impious folk (dasyu-hatyāya).

NOTES

1. Purūravas here signifies the thunder-bolt that flashes forth with a roaring sound (gnāh, cf *Nighaṇṭu* 1, 11 speech, sound, voice; also gnāvah stuti-vāchah, "words of praise") (see also 1,15,3; 1 2,1,5; 4,9,4).

2. The word 'dasyu' means one who is impious, an unbeliever (aśraddhā, ayajña, avrata) and one given to aggression and violence. Indra is described as fighting against the dasyus like Śambara, Śushka and Dhuni. In the present context, it refers to whatever is counter to the natural order, like excessive dryness in the air (śushka) and drought (śambara). Purūravas as madhyamāgni (see NOTES on 156) is looked upon as what sets nature in order.

(160)

ऋषिः पुरूरवो ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।
अप स्म मत् तरसन्ती न भुज्युस्ता अत्रसन् रथस्पृशो नाश्वाः ॥१६०॥
(१०.९५.८)

(पदपाठः)

सचा । यत् । आसु । जहतीषु । अत्कम् । अमानुषीषु । मानुषः । निऽसेवे ॥
अप । स्म । मत् । तरसन्ती । न । भुज्युः । ताः । अत्रसन् । रथऽस्पृशः ।
न । अश्वाः ॥

(अन्वयः)

यत् मानुषः अत्कं जहतीषु आसु आमानुषीषु सचा निषेवे, ताः मत् तरसन्ति भुज्युः न रथस्पृशः अश्वान अप अत्रसन् ॥

The seer of the mantra is Purūravas, the son of Iḷā; the poetic form is Trishṭup; and the deity addressed is Urvaśī.

(Sāyaṇa)

(इदमादि त्रीणि ऐळवाक्यानि। तत्रादितो द्वाभ्यां उर्वशीमन्याश्च सह स्तौति।)

यद् यदा। सचा सहायभूतः पुरूरवाः। अत्कं स्वकीयं रूपम्। अत्क इति रूपनाम। जहतीषु परित्यजन्तीषु। अमानुषीषु देवताभूतासु अप्सरःसु। मानुषः। सन्निषेवे अभिमुखं गच्छति। तदानीम्। ताः

अप्सरसः। मन्मत्तः। अपापसृत्य अत्र आसन्। त्रसतिर्गतिकर्मा। गच्छन्ति। पलायने दृष्टान्तः। तरसन्ती भुज्युर्न। तरसन्नाम मृगः। तस्य स्त्री। भुज्युः भोगसाधनभूता स्त्री मृगी। स यथा व्याधाद् भीता पलायते। किञ्च। रथस्पृशो नाश्वा रथे नियुक्ता अश्वा इव। यथा। ते पलायन्ते तद्वत् पलायन्त इति। उर्वश्यानेकाभिरस्याभिः सह भोगमनुभुक्तवानसि इत्युक्तः प्रत्याचष्टे॥

(Dinakara)

त्रीण्यैळवाक्यानि। यत् यदा सचा सहायभूतः देवानामिति शेषः (पुरूरवाः) अत्कं स्वकीयरूपं जहतीषु (परित्यजन्तीषु) अमानुषीषु आसु अप्सरस्सु मानुषः मानुषः सन् निषेवे तदा ताः अप्सरसः मत् मत्तः अप अपसृत्य अत्रसन् गच्छन्ति स्म। अत्र दृष्टान्तः। तरसन्ती, (तरसन्) मृगनाम, (मृग) विशेषस्त्री भुज्युः भोगसाधनभूता सा यथा व्याघ्रात् पलायत इति भावः। दृष्टान्तान्तरम्। न इवार्थः। रथस्पृशः न रथनियुक्ताः अशवाः यथा पलायन्ते तथैव॥१६०॥

(Purūravas says)

When (yat) this mortal man (mānushah) sought company (sachā nisheve) with the celestial damsels (amānushīshu) who have abandoned their natural forms (atkam jahatīshu), then they (tāh) forsook me (mat) and fled away (apa atrasan), like the frightened female doe (tarasantī bhujyuh na) or like the horse yoked to the chariot (rathaspṛśah aśvāh na).



(161)

ऋषिः पुरूरवाः ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

यदासु मर्तो अमृतासु निस्पृक् सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते ।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥१६१॥
(१०.९५.९)

(पदपाठः)

यत् । आसु । मर्तः । अमृतासु । निःऽस्पृक् । क्षोणीभिः । क्रतुऽभिः । न । पृंक्ते ॥
ताः । आतयः । न । तन्वः । शुम्भत । स्वाः । अश्वासः । न । क्रीळयः । दन्दशानाः ॥

(अन्वयः)

यत् अमृतासु आसु मर्तः निस्पृक् क्षोणीभिः क्रतुभिः न सं पृंक्ते, ताः आतयः स्वाः तन्वः क्रीळयः दन्दशानाः अश्वाशो न, न शुम्भत ॥

The seer of this mantra is also Purūravas, son of Iḷā; the poetic form is Trishṭup; and the deity addressed is Urvaśī.

(Sāyaṇa)

यद् यदा। आसु आमृतासु अप्सरःसु। मर्तः मनुष्यः पुरूरवाः। निस्पृक् निःशेषण स्पृशन्। क्षोणीभिः वाग्भिः। क्रतुभिःन कर्मभिश्च। सं पृंक्ते सम्पर्क करोति। नकारः समुच्चयार्थः। ताः अप्सरसः। आतयः अतिभूताः। तदानीम्। स्वाः तन्वः आत्मीयानि रूपाणि। न शुम्भत न प्रकाशयन्ति। अश्वासः नाश्वा इव।

क्रीळयः संक्रीडमानाः। दन्दशाना दन्दशूका जिह्वाभिरात्मीयाः सृक्का भक्षयन्तः। ते यथा चापल्येन धावन्तः स्वरूपं न प्रयच्छन्ति रथिकाय तद्वत्। इति दुःखाद् ब्रूते॥

(Dinakara)

यत् यदा आसु अमृतासु अप्सरस्सु मर्तः मनुष्यः पुरूरवाः निस्पृक् निःशेषेण स्पृशन् क्षोणीभिः वाग्भिः क्रतुभिः (न) कर्मभिश्च पृङ्क्ते संपर्कं करोति। नकारः समुच्चयार्थः। तदा ताः अप्सरसः आतयः आतिभूताः स्वाः तन्वः आत्मीयानि रूपाणि न शुम्भत न प्रकाशयन्ति। (अश्वासो न) अश्वा इव क्रीळयः संक्रीडमानाः दन्दशानाः दन्दशूकाः सर्पवज्जिह्वाभिः (आत्मीयाः) सृक्काः भक्षयन्तः। (ते यथा) स्वरूपं न प्रयच्छन्ति अश्ववाराय (तद्वत्) ॥१६१॥

(Purūravas continues)

When this mortal man (martah) associates (nisprk, touches) with these celestial ones (amrtāsu āsu), with words (kshonībhih) and also with actions (kratubhih na), getting into contact with them (sam prṅkte), then they, like ducks playing in water (ātayah krīḷayah) hiding their bodies (svāh tanvah), or like the grazing horses becoming elusive (dandaśānā aśvāso na) disappear from vision (na śumbhata).



(162)

ऋषिः पुरूरवा ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

विद्युन्न या पतन्ती दविद्योद् भरन्ती मे अप्या काम्यानि ।
जनिष्ठो अपोनर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥१६२॥
(१०.९५.१०)

(पदपाठः)

विऽद्युत् । न । या । पतन्ती । दविद्योत् । भरन्ती । मे । अप्या । काम्यानि ॥
जनिष्टा इति । अपः । नर्यः । सुऽजातः । प्र । उर्वशी । तिरत । दीर्घम् । आयुः ॥

(अन्वयः)

या अप्या काम्यानि मे भरन्ती विद्युन्न पतन्ती दविद्योत् । अपः नर्यः सुजातः जनिष्ठो उर्वशी आयुः दीर्घं प्र तिरत ॥

The seer of this mantra, like the previous two ones, is Purūravas, son of Iḷā, the poetic form is Trishṭup, and the deity referred to is Urvaśī.

(Sāyaṇa)

(अनयोरुर्वशीं स्तौति।)

या उर्वशी। विद्युन्न विद्युदिव। पतन्ती गच्छन्ती। दविद्योत् द्योतते। किं कुर्वती? अप्या। अप इत्यन्तरिक्षनाम। तत्सम्बन्धानि व्याप्तानि। कामानि अस्मदभिमतानि। उदकानि वा। मे मह्यम्। भरन्ती

सम्पादयन्ती। यदागतायाः तस्याः सकाशात्। अपो व्याप्तः। कर्मसु। नर्यो नरेभ्यो हितः। सुजातः सुजननः पुत्रो। जनिष्टो अजनिष्ट उत्पाद्यते। तदानीम्। मम। उर्वशी दीर्घं आयुः। प्रतिरति प्रवर्धयति। प्रजामनु प्रजायसे तदु ते मर्त्यामृतम्। (तैत्तिरीयब्रह्मणे, १,५,५,६॥) इति हि मन्त्रः॥

(Dinakara)

निन्दामन्यासां कृत्वोर्वशीं स्तौति। या उर्वशी विद्युत् न विद्युदिव पतन्ती दविद्योत् द्योतते। कीदृशी। अप इत्यन्तरिक्षनाम। तत्सम्बन्धीनि अप्या अप्यानि काम्यानि उदकानि मे मह्यं भरन्ती सम्पादयन्ती। (सा) यदा आगता तदा तस्याः सकाशात् अपः यशसा व्याप्तः नर्य्यः नरेभ्यो हितः सुजातः सुजननः पुत्रः जनिष्टो अजनिष्ट। सा उर्वशी तस्मै दीर्घम् आयुः प्र तिरत वर्धयति॥१६२॥

(Purūravas continues)

This Urvaśī (yā), who is luminous like lightning, flashing forth from the sky to the earth (vidyun na patantī davidyot), brings for me all things that I desire (āpyā me kāmyāni bharantī). When indeed a fine offspring (sūjātah), who is active and energetic (āpah) and who does good to mankind (naryah), is born (janishṭa), then Urvaśī would have prolonged my life-span (āyuh dīrgham pra tirata).

(163)

ऋषिः उर्वशी ।
छन्दः त्रिष्टुप् ।
देवता पुरूरवा ऐलः ॥

(संहितापाठः)

जज्ञिष इत्था गोपीथ्याय हि दधाथ तत् पुरूरवो म ओजः ।
अशासं त्वा विदुषी सस्मिन्नहन् न म आशृणोः किमभुग् वदासि ॥१६३॥

(१०.९५.११)

(पदपाठः)

जज्ञिषे । इत्था। गोऽपीथ्याय । हि । दधाथ । तत् । पुरूरवः । मे । ओजः ॥ अशासम् । त्वा । विदुषी । सस्मिन् । अहन् । न । मे । आ । अशृणोः । किम् । अभुक् । वदासि ॥

(अन्वयः)

पुरूरवः, इत्था, गोपीथ्याय जज्ञिषे हि । मे तत् ओजः दधाथ । विदुषी सस्मिन्नहन् त्वा अशासम् । त्वं मे न अशृणोः । अभुक् किं वदासि?

(Sāyaṇa)

इत्थेत्थम्। गोपीथ्याय। गौः पृथिवी, पीथं पालनम्। स्वार्थिकस्तद्धितः। भूरक्षणाय। जज्ञिषे हि जातोऽसि खलु पुत्ररूपेण। आत्मा वै पुत्र नामेति श्रुतेः। (पुनर्देव्याह।) हे पुरूरवः। मे ममोदरे। मयि। ओजः अपत्योत्पादनसामर्थ्यम्। दधाथ मयि निहितवानसि। तत् तथास्तु। अथापि स्थातव्यमिति चेत् तत्राह। अहं। विदुषी भावि कार्यं जानती। सस्मिन् अहं सर्वस्मिन् अहनि त्वया कर्तव्यम्। त्वा त्वाम्। अशासं

शिक्षितवत्यस्मि। त्वम्। मे मम। वचनं। नाशृणोः न शृणोषि। किं त्वं अभुक् अभोक्ता पालयिता। प्रतिज्ञातार्थं अपालयन्। वदासि 'हये जाय' इत्यादिरूपं प्रलापम्। (वाजसनेयकमुदाहृतम्।)॥

(Dinakara)

(उर्वशीवाक्यम्।) त्वम् इत्था इत्थं गोपीथ्याय गौः पृथिवी तस्याः (पीथ्याय) रक्षणाय मदुदरे जज्ञिषे हि जातोऽसि। पुत्ररूपेणेति भावः। हे पुरूरवः त्वं मे उदरे ओजः रेतोरूपं तेजो दधाथ निहितवानसि। (अहं) विदुषी भावि कार्यं जानती सस्मिन् सर्वस्मिन् (वर्णलोपः) अहनि त्वा अशासं शिक्षितवत्यस्मि। त्वं मे वचः न आशृणोः न कृतवान्। त्वम् अभुक् अभोक्ता मद्वचनस्य अपालयिता इदानीं किं वदासि 'हये जाये' इत्यादिकम्॥१६३॥

(Urvaśī replies)

O Purūravas, you have indeed appeared (jajñishe hi) for the sake of protecting the earth (gopīthyāya), and you have given unto me (me dadhātha) vigour (ojah). All-knowing (vidushī), I have instructed you (tvā aśāsam) regarding your responsibility on each of the days (sasmin ahan). But you (tvam) listened not to me (me na aśruṇoh). Unresponding as you are (abhuk), why do you talk to me now (kim vadāsi)?

(164)

ऋषिः पुरूरवा ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद् विजानन् ।
को दम्पती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१६४॥
(१०.९५.१२)

(पदपाठः)

कदा । सूनुः । पितरम् । जातः इच्छात् । चक्रन् । न । अश्रु । वर्तयत् । विऽजानन् ॥
कः । दम्पती इति दम्ऽपती । सऽमनसा । वि । यूयोत् । अध । यत् । अग्निः । श्वशुरेषु । दीदयत् ॥

(अन्वयः)

कदा सूनुः जातः पितरं इच्छात्, कदा विजानन् चक्रन् न अश्रु वर्तयत् । अध यत् अग्निः श्वशुरेषु दीदयत् कः समनसा दम्पती वि यूयोत् ?

The seer of the mantra is Purūravas, son of Iḷā; the poetic form is Trishṭup, and the deity referred to is Urvaśī.

(इदं पुरूरवसो। वाक्यम्।)

कदा कस्मिन् काले। सूनुः तव उदरजातः सन्। पितरं माम्। इच्छेत्। इषु इच्छायां। कदा वा विजानन्। पितरं माम्। अधिगच्छन्। चक्रन् क्रन्दमानो। नाश्रु वर्तयत् नेति चार्थे। किञ्च। कः किंविधः सन्। सूनुः

समनसा समनसौ समनस्कौ। दम्पती जायापती। त्वां मां च। वि यूयोत् विश्लेषयेत्। यु मिश्रणामिश्रणयोः। अध अधुना। यद् यदा। अग्निः तव हृदयस्थितः तेजोरूपो गर्भः। श्वशुरेषु। दीदयत् दीप्यते। दीदयति दीप्तिकर्मेति नैरुक्तो धातुः॥

(Dinakara)

अथ पुरूरवसो वाक्यम्। सूनुः तवोदरे जातः सन् पितरं मां कदा (इच्छात्) इच्छेत्। कदा वा सूनुः विजानन् मां पितरमधिगच्छन् चक्रन् क्रन्दमानः अश्रु न वर्तयत्। नेति चार्थः। कः (किंविदः सन्) सूनुः समनसा शोभनमनस्कौ दम्पती आवां वि यूयोत् विश्लेषयेत्। अध अधुना यत् यदा अग्निः तेजस्वी त्वत्पुत्रः श्वशुरेषु त्वदीयश्वशुरगृहेषु दीदयत् दीप्यते॥१६४॥

(Purūravas pleads)

When (kadā) does the son (sūnuh), born (jātah), long for the parent (pitaram ichchhāt), and when (kadā), knowing (vijānan), does he cry for his parent (chakran) and shed tears (na aśru vartayat)? Then (adha), when (yat) does the fire inside (agnih) glow brightly in the grandparents (śvaśureshu dīdayat)? Who indeed (kah) can separate (vi yūyot) the couple (dampatī) who are of one mind and heart (samanasau)?



(165)

ऋषिः उर्वशी ।
छन्दः त्रिष्टुप् ।
देवता पुरूरवा ऐलः ॥

(संहितापाठः)

प्रति ब्रवाणि वर्तयते अश्रु चक्रन् न क्रन्ददाध्ये शिवायै ।
प्र तत् ते हिनवा यत् ते अस्मे परेह्यस्तं नहि मूर मापः ॥१६५॥
(१०.९५.१३)

(पदपाठः)

प्रति ब्रवाणि । वर्तयते । अश्रु । चक्रन् । न । क्रन्दत् । आऽध्ये । शिवायै ॥ प्र । तत् ते । हिनव । यत् । ते । अस्मे इति । परा । इहि अस्तम् । न हि। मूर । मा । आपः ॥

(अन्वयः)

प्रति ब्रवाणि, अश्रु वर्तयते आध्ये शिवायै चक्रन् न क्रन्दत् । यत् ते अस्मे तत् ते प्रहिनव। अस्तं परेहि । मूर, मा न हि आपः ॥

The seer of the mantra is Urvaśī; the poetic form is Trishṭup; and the deity addressed is Purūravas, son of Iḷa.

(Sāyaṇa)

(इदमुर्वशीवाक्यम्)

हे पुरूरवः त्वां प्रति ब्रवाणि प्रति वच्मि। त्वदपत्यमुश्रुबाष्पम्। अश्रु बाष्पम्। वर्तयते वर्तयिष्यति। आध्य आध्याते वस्तुनि। शिवायै। शिवे कल्याणे समुपस्थिते सति। चक्रन् रुदन्। अश्रूणि विमुञ्चन्। न

क्रन्दत्। नकारश्चार्थे। रोत्स्यति चेत्यर्थः। तत् त्वदपत्यम्। ते तुभ्यम्। हिनव प्रहिणोमि। यदपत्यं। ते तव सम्बन्धि। अस्मे अस्मासु। निहितम्। त्वं परेहि अस्तम्। अस्तमिति गृहनाम। स्वगृहं प्रतिगच्छ। हे मूर मूढ। मा माम्। न ह्याप न प्राप्नोषि॥

(Dinakara)

उर्वश्युक्तिः। हे पुरूरवः प्रति ब्रवाणि त्वां प्रतिवच्मि। त्वदपत्यम् अश्रु वर्तयते वर्तयिष्यति। आध्ये आध्याते शिवायै शिवे कल्याणे समुपस्थिते सति चक्रन् रुदन्। अश्रूणि। विमुञ्चन्। (न) क्रन्दन् आक्रन्दन् रोत्स्यति चेत्यर्थः। चार्थे नकारः। तत् अपत्यं ते तुभ्यं हिनव प्रहिणोमि यदपत्यं ते (तव संबन्धि) अस्मे अस्मासु निहितमिति शेषः। त्वम् अस्तं गृहं परा इहि गच्छ। हे मूर मूढ त्वं मां नहि आपः न प्राप्नोषि (आप्लृ व्याप्तौ)॥१६५॥

(Urvaśī says)

I shall answer you (prati bravāṇi). Tears will flow (aśru vartayate) when the expected (ādhye) and auspicious event occurs (śivāyai); there will be crying (chakran) and weeping (na krandat). Whatever has been yours (yat te) and became mine (asme), I shall return that to you (tat te pra hinava). Now go back to your home (astam parehi). O foolish man (mūra), you cannot reach me (mā na hi āpah).

(166)

ऋषिः पुरुरवः ऐळः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गन्तवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१६६॥
(१०.९५.१४)

(पदपाठः)

सुऽदेवः । अद्य । प्रऽपतेत् । अनावृत् । पराऽवतम् । परामाम् । गन्तवै । ऊं इति ॥
अध । शयीत । निःऽऋतेः । उपऽस्थे । अध । एनम् । वृकाः । रभसासः । अद्युः ॥

(अन्वयः)

सुदेवः अद्य प्रपतेत् अनावृत् परमां परावतं गन्तवै । अध निर्ऋतेः उपस्थे शयीत । अध एनं रभसासः वृकाः अद्युः ॥

The seer of the mantra is Purūravas, son of Iḷā; the poetic form is Anushṭup; and the deity referred to is Urvaśi.

(Sāyaṇa)

(अथ परिदूनः पुरूरवा उवाच)

सुदेवः त्वया सुक्रीडः पतिः। अद्य प्रपतेत् अत्रैव प्रपततु। अथवानावृदनावृत्तः सन्। परमां परावतं दूरादपि दूरदेशम्। गन्तवै गन्तुं महाप्रस्थानगमनं कुर्यात्। अध अथवा। यत्रकुत्रापि गन्तुं समर्थः। निर्ऋतेः

पुथिव्या उपस्थे। शयीत शयनं कुर्यात्। यद्वा। निर्ऋतिः पापदेवता। तस्याः। उपस्थे उत्सङ्गे संनिधौ। म्रियतां इत्यर्थः। अध अथवा। एनम्। वृका आरण्याः श्वानः। रभसासः वेगवन्तः। अद्युः भक्षयन्तु॥

(शतपथब्राह्मणे ११.५.१.८ सुदेवोऽद्योद्वा बध्नीत प्र वा पतेत् तदेनं वृका वा श्वानो वा अद्युरिति हैव तदुवाच॥ इति।)

(Dinakara)

ऐळोक्तिः। हे उर्वशि सुदेवः। (त्वया सह सुक्रीडः) पुरूरवाः त्वां विना अद्य प्रपतेत् अत्रैव पततु। अथवा (अनावृत्) अनावृताः (अनावृत्त?) (विवस्त्रः(?) सन् परमां परावतं दूरादपि दूरदेशं गन्तवै गच्छेत्। महाप्रस्थानं कुर्यादिति भावः। अथ अथवा निर्ऋतेः भूम्याः उपस्थे शयनं कुर्यात्। यद्वा निर्ऋतिः पापदेवता, तस्याः समीपे शयीत म्रियताम्। अध अथवा एनम् ऐळं वृकाः रभसासः वेगवन्तः अद्युः भक्षयन्तु॥१६६॥

(Purūravas cries bitterly and says)

May the one who played pleasantly with you (sudevah) fall there (adya prapatet) in all his nakedness (anāvṛt). Or (adha), let him start and go away to a place farthest removed (parāvatam paramām gantavā)! Or (adha), let him lie down inert on the back of this earth (nirṛteh upasthe śayīta)! Or (adha), may the fast-moving wolves devour him (enam rabhasāso vṛkā adyuh).



(167)

ऋषिः उर्वशी ।
छन्दः त्रिष्टुप् ।
देवता पुरूरवा ऐलः ॥

(संहितापाठः)

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥१६७॥
(१०.९५.१५)

(पदपाठः)

पुरूरवः । मा । मृथाः । मा । प्र । पप्तः । मा । त्वा । वृकासः । अशिवासः । ऊँइति । क्षन् ॥ न । वै । स्त्रैणानि । सख्यानि । सन्ति । सालावृकाणाम् । हृदयानि । एता ॥

(अन्वयः)

पुरूरवः, मा मृथाः । मा प्र पप्तः । त्वा अशिवासः वृकासः मा उक्षन् । स्त्रैणानि सख्यानि न वै सन्ति । एता सालावृकाणां हृदयानि ॥

The seer of this mantra is Urvaśī; the poetic form is Trishṭup; and the deity addressed is Purūravas the son of Iḷā.

(Sāyaṇa)

(तमितरा प्रत्युवाच।)

हे पुरूरवः। त्वं मा मृथाः मृतिं मा प्राप्नुहि। तथा मा प्र पप्तः अत्रैव पतनं मा कार्षीः। तथा। त्वा त्वाम्। अशिवासः अशुभाः। वृकासः वृकाः। मा उक्षन्। उ इत्येवकारार्थे। अक्षन् माभ्यवहारयन्तु । किमित्येवं

अस्मदुपरि आग्रहं करोषि? मा कार्षीः इत्यर्थः। अथ स्वस्नेहस्य असारतामाह। स्त्रैणानि स्त्रीणां कृतानि। सख्यानि। न वै सन्ति न सन्ति खलु। अभावे कारणमाह। एतानि सख्यानि। सालावृकाणां हृदयाणि यथा वत्सादीनां विश्वासापन्नानां घातुकानि। तद्वत्॥

(Dinakara)

(उर्वशी प्रत्युवाच) हे पुरुरवः त्वं मा मृथाः (मृतिं मा प्राप्नुहि) मा च प्र पप्तः अत्रैव पतनं मा कार्षीः। त्वाम् अशिवासः अशिवाः वृकाः मा उ क्षन् (मा) भक्षयन्तु। उ इति एवकारर्थः। स्त्रैणानि स्त्रीभिः कृतानि न वै सन्ति। सख्यानि ता एतानि सख्यानि सालावृकाणां हृदयानि॥१६७॥

(Urvaśī admonishes him)

O Purūravas, die not (mā mṛthā); fall not (mā pra paptah); let not the terrible wolves devour you (mā tvā vṛkāsah aśivāsa u kshan). Be cool and collected, for there can be no lasting friendship with women (na strainạni sakhyāni santi). Their hearts (etā hṛdayāṇi) are the hearts of jackals (sālāvṛkāṇām hṛdayāni).



(168)

ऋषिः उर्वशी ।

छन्दः त्रिष्टुप् ।

देवता पुरूरवा ऐलः ॥

(संहितापाठः)

यद् विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥१६८॥
(१०.९५.१६)

(पदपाठः)

यत् । विऽरूपा । अचरम् । मर्त्येषु । अवसम् । रात्रीः । शरदः । चतस्रः ॥
घृतस्य । स्तोकम् । सकृत् । अह्नः । आश्नाम् । तात् । एव । इदम् ।
ततृपाणा । चरामि ॥

(अन्वयः)

यत् विरूपा मर्त्येषु अचरं, रात्रीः चतस्र शरदः अवसम् । सकृत् अह्नः घृतस्य स्तोकं अश्नाम् । तादेव तातृपाणा इदं चरामि ॥

The seer of the mantra is Urvaśī; the poetic form is Trishṭup; and the deity addressed is Purūravas, son of Iḷā.

(Sāyaṇa)

यद् यदा। विरूपा मनुष्यसम्पर्काद्विगतसहजभूतदेवरूपेत्यानुकूल्येन नानारूपा वा। मर्त्येषु मनुष्येषु। अचरम्। तदानीम्। रात्रीः पूरयित्रीश्चतस्रः शरदोऽवसम्। न्यवसम्। तदानीं घृतस्य स्तोकं सकृदह्न अश्नाम्। तादेव तेनैव। स्तोकेन। अहम्। इदं सम्प्रति। तातृपाणा तृप्ता सती। चरामि॥

(Dinakara)

उर्वश्युक्तिः। विरूपा मनुष्यसम्पर्काद्विगतसहजदेवरूपा यद्वा पत्यानुकूल्यार्थं गृहीतनानाविधरूपा अहं मर्त्येषु यत् यदा अचरं तदानीं रात्रीः रसयित्रीः (चतस्रः) शरदः वर्षाणि अवसं न्यवसम्। घृतस्य स्तोकम् अल्पं घृतं अह्नः अहनि सकृदेव आश्नां भक्षितवती। तादेव तेनैव स्तोकेन घृतेन इदं सम्प्रति तातृपाणा तृप्ता सती चरामि गच्छामि। विरोधलक्षणया अतृप्तेत्यर्थः॥१६८॥

(Urvaśī explains)

When I disguised my celestial form (yad virūpā), and moved about (avasam) among mortals (martyeshu), I spent four years (śaradaś chatasrah), enjoying the nights (rātrīh). And during that period, I partook of a little of clarified butter once a day (ghṛtasya stokam sakṛd ahnah aśnām), and I was satisfied with that much (tādeva tātrpāṇā). And now (idam) I go (charāmi).



(169)

ऋषिः पुरूरवा ऐलः ।
छन्दः त्रिष्टुप् ।
देवता उर्वशी ॥

(संहितापाठः)

अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान् नि वर्तस्व हृदयं तप्यते मे ॥१६९॥
(१०.९५.१७)

(पदपाठः)

अन्तरिक्षऽप्राम् । रजसः । विऽमानीम् । उप । शिक्षामि । उर्वशीम् । वसिष्ठः ॥ उप । त्वा । रातिः । सुऽकृतस्य । तिष्ठात् । नि । वर्तस्व । हृदयम् । तप्यते । मे ॥

(अन्वयः)

अन्तरिक्षप्रां रजसः विमानीं उर्वशीं वसिष्ठः उपशिक्षामि । सुकृतस्य रातिः त्वा उपतिष्ठात् । मे हृदयं तप्यते । निवर्तस्व ॥

The seer of the mantra is Purūravas, son of Iḷa; the poetic form is Trishṭup; and the deity addressed is Urvaśī.

(Sāyaṇa)

अन्तरिक्षप्रां स्वतेजसा अन्तरिक्षस्य पूरयित्रीम्। तथा। रजसः रञ्जकस्य उदकस्य। विमानां निर्मात्रीम्। उर्वशीम्। वसिष्ठः समानानां मध्ये अतिशयेन वासयिता। अहम्। उपशिक्षामि वशं नयामि। सुकृतस्य शोभनकर्मणः। रातिः दाता। पुरूरवाः। त्वा त्वाम्। उप तिष्ठात् उपतिष्ठतु। मे हृदयं तप्यते। अतो नि वर्तस्व। (एवं राजोऽवाच॥)

(Dinakara)

ऐलोक्तिः। अहम् अन्तरिक्षप्रां स्वतेजसा अन्तरिक्षस्य पूरयित्रीं तथा रजसः रञ्जकस्योदकस्य (विमानीम्) निर्मात्रीम्। (मदर्थमिति शेषः।) उर्वशीं वसिष्ठः सपत्नीनां मध्ये मानेन वासयिता उप शिक्षामि वशं नयामि। ऐळः सुकृतस्य शोभनकर्मणः रातिः दाता त्वाम् उप तिष्ठात् उपतिष्ठतु। नि वर्तस्व यतो मे हृदयं तप्यते॥१६९॥

(Purūravas tells Urvaśī)

I, the best among the dwellers together (vasishṭhah) take under my charge (upa śikshāmi) Urvaśī who fills the firmament (antarikshaprām) and creates worlds for me (rajasah vimānīm). May I sit with you (tvā upa tishṭhāt), who is the bestower of favours for good deeds (sukṛtasya rātih). My heart is burning (me hṛdayam tapyate), so return, Urvaśī to your abode (ni vartasva).

(170)

ऋषिः उर्वशी ।
छन्दः त्रिष्टुप् ।
देवता पुरूरवा ऐलः ॥

(संहितापाठः)

इति त्वा देवा इम आहुरैळ यथेमेतद् भवसि मृत्युबन्धुः ।
प्रजा ते देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१७०॥
(१०.९५.१८)

(पदपाठः)

इति । त्वा । देवाः । इमे । आहुः । ऐळ । यथा । ईम् । एतत् । भवसि । मृत्युऽबन्धुः ॥
प्रऽजा । ते । देवान् । हविषा । यजाति । स्वःऽगे । ऊंइति । त्वम् । अपि । मादयासे ॥

(अन्वयः)

ऐळ । त्वा इमे देवाः इति आहुः । यथे मृत्युबन्धुः भवसि । एतत् ते प्रजा देवान् हविषा यजाति । त्वं अपि स्वर्गे मादयासे ॥

The seer of the mantra is Urvaśī; the poetic form is Trishṭup; and the deity addressed is Purūravas, son of Iḷā.

(Sāyaṇa)

हे ऐळ पुरूरवः। त्वा त्वाम्। इमे देवाः इत्याहुः। मृत्युबन्धुः मृत्योः बन्धकः मृत्योर्बन्धुभूतो वा। मृत्युवशमप्राप्नुवंस्त्वम्। यथेम् यथैतद्। भवसि भविष्यसि। प्रजा प्रकर्षेण जायमानः। त्वम्। ते तव सम्बन्धिनः।

यष्टव्यान् देवान्। हविषा। यजासि यजसि। स्वर्ग उ स्वर्ग एव। त्वमपि मादयासे मादयसेऽस्माभिः सह। एवमाहुरित्यर्थः।। यस्मादेवं करोषि तस्मादभिलाषं हित्वा सुखी भवेति। सेयं पुरूरवसं प्रत्युवाच।।

(Dinakara)

उर्वशीवाक्यम्। हे ऐळ इमे देवाः त्वाम् इति एतत् यथा त्वं मृत्युबन्धुः मा भवसि। प्रजा प्रकर्षेण जायमानस्त्वं ते देवान् एव यष्टव्यान् हविषा यजासि। जीवन् सन् यज्ञान् करिष्यसीत्यर्थः। यदि चोर्वशीकामना तर्हि स्वर्गे वयमिव त्वमपि उर्वश्या सह मादयासे मोदिष्यसि। एवमाहुरित्यर्थः।।१७०।।

इत्युर्वशीराजसंवादः।।

(Urvaśī consoles)

O Purūravas, son of Iḷā (aiḷa), these gods (ime devāh) have ordained thus (iti āhuh): Because you are subject to the bonds of death (yathem mṛtyubandhuh bhavasi), you will surely die (etat). Your progeny (te prajā) will worship the gods with oblations (devān havishā yajati), and then you will also reach the celestial realms (tvam api svarge) and enjoy with us (mādayāse).



(171)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या ।
छन्दः त्रिष्टुप् ।
देवता दक्षिणा प्रजापत्या ॥

(संहितापाठः)

आविरभून् महि माघोनमेषां विश्वं जीवं तमसो निरमोचि ।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥१७१॥
(१०.१०७.१)

(पदपाठः)

आविः । अभूत् । महि । माघोनम् । एषाम् । विश्वम् । जीवम् । तमसः । निः । अमोचि ॥
महि । ज्योतिः । पितृऽभिः । दत्तम् । आ । अगात् । उरुः । पन्थाः । दक्षिणायाः । अदर्शि ॥

(अन्वयः)

माघोनं महि एषां आविरभूत् । विश्वं जीवं तमसः निरमोचि । पितृभिः दत्तं महि ज्योतिः अगात् । दक्षिणायाः उरुः पन्थाः अदर्शि ॥

According to Sāyaṇa, the seer of the mantra is Divya, son of Angirasa or Dakshiṇā, daughter of Prajāpati; the poetical form is Trishṭup; and the deity is Dakshinā daughter of Prajāpatī.

(Sāyaṇa)

(इदं सूक्तं दक्षिणाया वा तद्दातॄणां वा स्तावकम् ।) माघोनं मधवा इन्द्रः तस्य सम्बन्धि । सूर्यात्मकस्य इन्द्रस्य स्वभूतं महि । महत्तेज । एषां यजमानानां यागसिध्यर्थम् । आविरभूत् प्रकाशितं उद्गतं अभूत् । तत्र ।

विश्वं सर्वम्। जीवं स्थावरजङ्गमात्मकं जगत्। तमसः सकाशात्। निरमोचि निर्मुक्तमभूत्। अथ अनन्तरम्। पितृभिः यत् पितृभिर्देवैः। दत्तं नो हविषां आगताय। तन्महि महज्ज्योतिः। सूर्याख्यम्। आगात् आगच्छति। पश्चात्। दक्षिणाया यागाङ्गभूतायाः। उरुः महान्। पन्था मार्गः। अदर्शि सर्वैर्यजमानैः दृष्टोऽभूत्। सर्वे यागं कृत्वा ऋत्विग्भ्यः दक्षिणाः दत्तवन्त इत्यर्थः॥

(Dinakara)

माघोनं मध्वा चैत्रमासस्य सूर्यः तत्सम्बन्धि महि महत्तेजः एषां यजमानानां यागसिद्ध्यर्थम् (आविः अभूत्) आविर्भूतम्। ततः विश्वं जीवं स्थावरजङ्गमात्मकं तमसः सकाशात् निरमोचि निर्मुक्तम् अभूत्। अथानन्तरं पितृभिः देवैः दत्तं महि महत् ज्योतिः सूर्याख्यम् आगात् आगच्छति परिभ्रमति। तेन ज्योतिषा दक्षिणायाः दक्षिणदिशः। इदं चोपलक्षणम्। सर्वदिशामपि। उरुः महान् पन्था अदर्शि॥१७१॥

The great glory of Indra (maghonam mahi) has now become manifest (āvir abhūt) for all (eshām). All life (viśvam jīvam) has been delivered from darkness (tamasah niramochi). This light, immense (mahi jyotih) and given to us by our progenitors as gifts (pitṛbhih dattam), namely the sun, has arrived (āgāt). The expansive path (uruh panthāh) of intuitive discernment and right understanding (dakshiṇāyāh) is being seen (adarśi).

NOTES

Bṛhaddevatā (8, 22-23) names Divya, of the lineage of Angiras, as the seer of this hymn, or alternately, Dakshiṇā, daughter of Prajāpati, who is also the deity (devatā) and speaks of herself.

सूक्तेन तु परेणात्र स्वयमाविरभूदिति।
आत्मानमेव तुष्टाव प्राजापत्याथ दक्षिणा॥

The text also indicates that some people take this hymn as the eulogy of the donors of sacrificial presents and rewards (dātrīn atra stutān eke

dakshiṇānam vadanti tu). Sāyaṇa prefers this latter view and makes sacrificial presents (dakshiṇā) or the donors of the sacrificial presents (tad dātāro vā) as the devatā of the hymn. But this seems rather laboured. His statement that the hymn is a eulogy of the gifts made to the priests of the sacrifice or of the donors of such gifts or of the performers of sacrifices is not justified in the context, or by the contents of the hymn.

अनेन सूक्तेनर्त्विग्भ्यो दीयमाना दक्षिणा तद्दातारो
यजमाना वा स्तूयन्ते ॥

In this, he follows Kātyāyana's *Sarvānukramaṇī* (32,2), but Kātyāyana gives this as an alternate explanation. His first preference is for taking Divya as the seer (ṛshi) or Dakshiṇā as the seer (ṛshikā).

दिव्यो नामाङ्गिरस ऋषिः। दक्षिणा नाम प्रजापतेः
सुता वर्षिका। दक्षिणां यजमानैर्ऋत्विग्भ्यो दीयमानां
तद्दातॄन् दक्षिणाया दातॄन् यजमानान् वास्तौत् ॥

It is true that the more popular sense in which the word 'dakshiṇā' is taken is gifts, presents or rewards given to the priests in a ritual (yajñādi-vidhi-dānam). But this is not appropriate in the Ṛgvedic context. The word literally means competence, skill, ability (dakshate iti, from 'daksha vṛddhau', "to grow", "to act quickly", *Dhātupāṭha* 16,7). The word has several meanings (such as 'right', 'south', 'direction', and 'intuition'). It can be seen

that Dinakara takes the word in the mantra in the sense of southern direction, which in fact suggests all the directions:

दक्षिणायाः दक्षिणादिशः । इदं चोपलक्षणम् सर्व दिशामपि ॥

This is one of the instances where he differs from Sāyaṇā markedly.

In view of the thrust of the mantra, it appears best to follow Sri Aurobindo's view that the word means 'intuition', 'discernment', 'right understanding'. The word here is associated with the 'great or wide path' (uruh panthā), which was beheld or sighted (adarśi) by the seer. And there is also the mention of darkness being eliminated (tamaso niramochi); further, 'great light' is said to have come (mahi jyotih agāt). Dakshiṇā's wide path can only be the light of right understanding. The alternate seer is Divya, which again means divine or celestial light; the word 'divya' is almost synonymous with 'dakshiṇā'. It is especially the case, when Dakshiṇā is described as associated with Prajāpati (prājāpatya), who is identical with Brahman as the ultimate reality, Viśva-karmā as the all-creator, Hiraṇya-garbha as the light within the womb (hidden).

The mantra that follows makes the meaning of dakshiṇā as right understanding more significant: Those with the right understanding of the real (dakshiṇāvantah) are established (asthuh) in the high realms of divinity or sky (ucchā divi).

On the premise that Veda has three meanings, the adhyātma-meaning becomes relevant here. The sacrificial context is here to be viewed in the light of inner sacrifice (jñāna-yajña), where dakshiṇā can only mean discernment, understanding, or intuition, without which the inner sacrifice becomes meaningless and incomplete.



(172)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या ।
छन्दः त्रिष्टुप् ।
देवता दक्षिणा ॥

(संहितापाठः)

उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण ।
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥१७२॥
(१०.१०७.२)

(पदपाठः)

उच्चा । दिवि । दक्षिणाऽवन्तः । अस्थुः । ये । अश्वऽदाः । सह । ते । सूर्येण ॥
हिरण्यऽदाः । अमृतऽत्वम् । भजन्ते । वासःऽदाः । सोम । प्र । तिरन्ते । आयुः ॥

(अन्वयः)

दक्षिणावन्तः उच्चा दिवि अस्थुः । ये अश्वदाः ते सूर्येण सह । हिरण्यदाः अमृतत्वं भजन्ते । सोम, वासोदाः आयुः प्र तिरन्ते ॥

The seer of the mantra is Divya, or Dakshiṇā (daughter of Prajāpati); the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

दक्षिणावन्तः दक्षिणायाः देयत्वेन तद्वन्तः। दक्षिणां दत्तवन्तः। यजमानाः। उच्चा उच्चैः स्थानैः स्थिते। दिवि द्युलोके। अस्थुः तिष्ठन्ति। अश्वदाः अश्वानां दातारः। ये यजमानाः। ते। सूर्येण सर्वस्य स्वस्वकर्मणि

प्रेरकेण आदित्येन सह। तिष्ठन्ति। ये। हिरण्यदाः हिरण्यदातारः। ते। अमृतत्वं अमरणधर्मत्वं देवत्वम्। भजन्ते। अमृतं वै हिरण्यमित्याम्नायात्। तथा। सौम्यं वै वसः इति श्रवणात् सोम एव सम्बोध्यते। हे सोम। वासोदाः तद्दैवत्य वस्त्राणां दातारः। ये सन्ति ते। त्वया सह तिष्ठन्तीति शेषः। एते सर्वे। आयुः जीवनम्। प्र तिरन्ति प्रवर्धयन्ति॥

(Dinakara)

दक्षिणा देवत्वेन येषां ते दक्षिणावन्तः यजमानाः दिवि द्युलोके उच्चा अस्थुः तिष्ठन्ति। सामान्येनोक्त्वा दानविशेषेण फलविशेषमाह। अश्वदाः अश्वानां दातारः ये यजमानाः ते सूर्येण सह तिष्ठन्ति। ये हिरण्यदाः हिरण्यदातारः ते अमृतत्वम् अमरणधर्मत्वं देवत्वं भजन्ते। "अमृतं वै हिरण्यम्" (तै.सं.५.२.७.२.) इति श्रुतेः। तथा, "सौम्यं वै वासः" (तै.ब्रा.२.२.५) इति श्रवणात्। हे सोम वासोदाः (ये) त्वद्दैवत्यवस्त्रदातारः सन्ति ते त्वया सह तिष्ठन्तीति शेषः। एते सर्वे आयुः जीवनं प्र तिरन्ते प्रवर्धयन्ति। (प्रपूर्वस्तिरतिर्वृद्ध्यर्थः) ॥१७२॥

Those with the right understanding of the real (dakshiṇā-vantah) abide (asthuh) in the highest realm (uchchā divi). Those (te) with mental power (aśvadāh) will abide alongside the Sun (sūryeṇa saha); those who are endowed with spiritual lustre (hiraṇyadāh) will attain to immortality (amṛtatvam bhajante); those who dwell in the real (vāsodāh, from 'vasa nivāse'), O Soma (representing the principle of mind) will prolong their lives (pratiranti āyuh).

NOTES

The suffix 'dā' would normally mean 'giver' (from dāśr dāne). But it sigrifies in the context 'having' 'possessing' 'consuming', ad bhakshaṇe, in keeping with 'dakshiṇā-vantah'.

(173)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्यः।
छन्दः त्रिष्टुप्।
देवता दक्षिणा ॥

(संहितापाठः)

दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति।
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ॥१७३॥
(१०.१०७.३)

(पदपाठः)

दैवी। पूर्तिः। दक्षिणा। देवऽयज्या। न। कवऽअरिभ्यः। न हि। ते। पृणन्ति॥
अथ। नरः। प्रयतदक्षिणासः। अवद्यऽभिया। बहवः। पृणन्ति॥

(अन्वयः)

पूर्तिः देवयज्या दैवी दक्षिणा कवारिरभ्यः न। ते न हि पृणन्ति। अथ अवद्यभिया बहवः नरः प्रयतदक्षिणासः पृणन्ति॥

The seer of the mantra is Divya or Dakshiṇā, daughter of Prajāpati; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

दैवी देवसम्बन्धिनी। तादृशी पूर्तिः पालिनी। तत्साध्या। देवयज्या देवयागः। तदङ्गभूता दक्षिणा। न कवारिभ्यः कुत्सितगन्तृभ्यः अयष्टभ्यः। (ऋ गतौ)। एतेभ्यो न भवति। यद्वा। देवानां स्वभूता पूर्तिः पूरयित्री स्तुतिभिः हविर्भिश्च तादृशी देवयज्या दक्षिणा च तेभ्यो न भवतः। तत्र हेतुरुच्यते। हि यस्मात्। ते

कुत्सितगन्तारः। न हि पृणन्ति देवान् स्तुतिभिः हविभिर्वा न प्रीणयन्ति। अथेति प्रश्ने। यष्टॄणां देवयागादि कथं भवति? उच्यते। नरः कर्मणां नेतारः। अत एव प्रयतदक्षिणासः दत्तदक्षिणाः। बहवो यजमाना। अवद्याभिया पापभिया। विहितानुष्ठाने दुरितानि भवन्ति खलु। तस्मात् तद्भीत्या। पृणन्ति देवान् प्रीणयन्ति। तस्मात् यष्टॄणां देवपालनयागदक्षिणा भवन्ति॥

(Dinakara)

दैवी देवप्रीत्यर्थं दीयमाना देवयज्या देवयागाङ्गभूता दक्षिणा पूर्तिः पालिनी उत्तमेत्यर्थः। (सा च) कवारिभ्यः कुत्सितेभ्यः (अयष्टॄभ्यः) न दातव्येति शेषः। हि यतः ते कुत्सिताः देवान् स्तुतिभिर्हविर्भिर्वा न पृणन्ति न प्रीणयन्ति (पृण प्रीणने)। अथ प्रयतदक्षिणासः (दत्तदक्षिणाः) अपि (बहवः) नरः पुमांसः यत् कवारिभ्यः (अयष्टॄभ्यः) पृणन्ति प्रीणयन्ति तत् अवद्यभिया निन्दाभीत्या ॥१७३॥

This right understanding of the real (dakshiṇā) which fulfils the objectives of existence (pūrtih), which is associated with the offerings to the gods above (devayajyā), and which partakes of the highest realm (daivī) is not to be had by those who are engaged in evil ways (na kavāribhyah). These folk, given to wrong ways (te), do not really bring delight to anyone (na hi pṛṇanti). Many human beings (bahavah narah) strive for the right understanding (prayata-dakshiṇāsah), only out of fear of blame from others (avadya-bhiyā).

(174)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या।
छन्दः जगती।
देवता दक्षिणा ॥

(संहितापाठः)

शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः।
ये पृणन्ति प्र च यच्छन्ति सङ्गमे ते दक्षिणां दुहते सप्तमातरम् ॥१७४॥
(१०.१०७.४)

(पदपाठः)

शतऽधारम्। वायुम्। अर्कम्। स्वःऽविदम्। नृऽचक्षसः। ते। अभि। चक्षते। हविः॥
ये। पृणन्ति। प्र। च। यच्छन्ति। सम्ऽगमे। ते। दक्षिणाम्। दुहते। सप्तऽमातरम्॥

(अन्वयः)

शतधारं वायुं स्वर्विदं अर्कं नृचक्षसः ते हविः चक्षते। सङ्गमे ये प्रयच्छन्ति च पृणन्ति च ते सप्तमातरं दक्षिणां दुहते॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Jagatī; and the deity is Dakshiṇā.

(Sāyaṇa)

शतधारं बहुधारेणोपेतम्। वायुं एतन्नामकम्। स्वर्विदं स्वर्गस्य लम्भकम्। सर्वस्य वेत्तारम् वा। अर्कं अर्चनीयं आदित्यं च। तौ नृचक्षसः नृणां द्रष्टॄन् अनन्यान् इन्द्रादीन् देवान् च। अभिलक्ष्य। ते यजमानाः। हविः चक्षते तेभ्यो दातुं पश्यन्ति जानन्ति। किञ्च। सङ्गमे कर्मकरणार्थं ऋत्विजं अत्र संगच्छन्ते इति सङ्गमः। तस्मिन्यज्ञे। ये यष्टारः। पृणन्ति स्तुतिभिः प्रीणयन्ति। ये च तेभ्यो देवेभ्यो हवींषि प्रयच्छन्ति। ते।

सप्तमातरं सप्तसंख्याका मातृभूता अग्निष्टोमदि संस्था यस्यां भवन्ति सा। यद्वा। सप्तसंख्याका मातरः कर्मणां निर्मातारः। कर्तारो होत्रादयः सन्ति। तादृशीं दक्षिणां दुहते। ऋत्विग्भ्यो दुहन्ति॥

(Dinakara)

ये अर्कम् आदित्यं, नृचक्षसः नृणां द्रष्टॄन्, कदास्मभ्यं हविर्दास्यन्तीति द्रष्टॄनिन्द्रादिदेवांश्चाभिलक्ष्य हविः चक्षते दातुं जानन्ति। ये च संगमे, संगमधिगच्छन्ति ऋत्विजो यत्रेति स संगमो यज्ञः, तस्मिन् देवेभ्यः पृणन्ति स्तुतिभिः प्रीणयन्ति देवेभ्यश्च हविः प्रयच्छन्ति। देवान् अभिलक्ष्य हविः प्रचक्षते दातुं जानन्ति प्रयच्छन्ति (च)) ते सप्तमातरं सप्तसंख्याकमातृकां दक्षिणां दुहते प्राप्नुवन्ति। कीदृशमादित्यं, शतधारं बहुधारणोपेतं, वायुं वायुनामकम्, आदित्यस्य जगद्रूपत्वात्, स्वर्विदं स्वर्गस्य लम्बकम्॥१७४॥

The wise ones (te) perceive (chakshate) that offerings must be made (havih) to (abhi) the wind of a hundred streams (śatadhāram vāyum), to the worshipful sun who is aware of all things (svarvidam arkam), and to the spirits that can see into all mortals (nṛchakshasah). They (ye) who offer themselves (pra yachchhanti) to these gods and cause delight to them (pṛṇanti), the inner sacrifice in them (samgame) will milk (duhate) the right understanding in seven measures (sapta-mātaram dakshiṇām).

NOTES

Dakshiṇā is here described as 'sapta-mātaram', viz., having seven mothers. The numbers 7 occurs in several Ṛgvedic passages (1,72,6; 3,7,1; 4,7,5; 8,72,7; 10,5,5; 10,8,14 and 10,122,3). There are references to seven delights (sapta-ratnāni), seven rays of light (sapta-archishah), seven flames of fire (sapta-jvālāh), seven understandings (sapta-dhītayah), seven cows (sapta-gāvah), seven mothers (sapta-mātarah), seven rivers (sapta-nadyah) and seven voices (sapta-vāṇi).

(175)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या ।
छन्दः त्रिष्टुप् ।
देवता दक्षिणा ॥

(संहितापाठः)

दक्षिणावान् प्रथमो हूत एति दक्षिणावान् ग्रामणीरग्रमेति ।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥१७५॥
(१०.१०७.५)

(पदपाठः)

दक्षिणाऽवान् । प्रथमः । हूतः । एति । दक्षिणाऽवान् । ग्रामऽनीः । अग्रम् । एति ॥
तम् । एव । मन्ये । नृऽपतिम् । जनानाम् । यः । प्रथमः । दक्षिणाम् । आऽविवाय ॥

(अन्वयः)

हूतः दक्षिणावान् प्रथमः एति । ग्रामणीः दक्षिणावान् अग्रं एति । प्रथमः यः जनानां दक्षिणां आविवाय तमेव नृपतिं मन्ये ॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

हूतः ऋत्विग्भिराहूतः। दक्षिणावान् यजमानः। प्रथमः सर्वेषां मुख्यः सन्। एति सर्वत्र गच्छति। तथा। ग्रामणीः ग्रामाणां नेता। धनवत्त्वेन तेषां कर्ता। दक्षिणावान्। सः अग्रमेति सर्वेषां प्रथममेव गच्छति। तमेव। नृपतिं नराणां पालयितारम्। इति। मन्ये ऋषिरहं अवबुद्ध्ये। प्रथमः। यः। जनानां। दक्षिणाम्। आविवाय

आगमयति॥ तं नृपतिं मन्ये। यद्वा। जनानामिति पूर्ववाक्यशेषः। जनानां मध्ये तमेव मनुष्याणां स्वामिनमिति मन्ये॥

(Dinakara)

दक्षिणावान् यजमानः हूतः सन् प्रथमः एति सभासु प्रथमं लोकाः तम् आह्वयन्ति तथा ग्रामणीः सन् अग्रम् एति। (तमेव नृपतिं नराणां पालयितारमिति मन्ये ऋषिरहमवबुध्ये)। यः (जनानां) दक्षिणाम् आविवाय (आगमयति) प्रापयति ॥१७५॥

The one with right understanding (dakshiṇāvān) comes first (prathamah eti) when people are reckoned (hūtah); he is the leader of the hosts of people (grāmaṇīh) and goes ahead (agram eti). The one who has made become (āvivāya) right understanding (dakshiṇām) for himself is in my view (manye), the foremost (prathamo) protector of the people (nṛpatim).



(176)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या ।
छन्दः त्रिष्टुप् ।
देवता दक्षिणा ॥

(संहितापाठः)

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणाया रराध ॥१७६॥
(१०.१०७.६)

(पदपाठः)

तम् । एव । ऋषिम् । तम् । ऊँ इति । ब्रह्माणम् । आहुः । यज्ञऽन्यम् । सामऽगाम् । उक्थऽशसम् ॥ सः । शुक्रस्य । तन्वः । वेद । तिस्रः । यः । प्रथमः । दक्षिणया । रराध ॥

(अन्वयः)

तं एव ऋषिं, तमु ब्रह्माणं आहुः । सामगां उक्थशासं यः प्रथमः दक्षिणया रराध सः शुक्रस्य तिस्रः तन्वः वेद ॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

तमेव दक्षिणाया दातारम्। ऋषिं अतीन्द्रियार्थदर्शिनम्। यद्वा। सत्कर्मकरणेनर्षिमित्याहुः। तथा। तमु तमेव। ब्रह्माणमाहुः। किञ्च। तमेव यज्ञन्यम्। यज्ञस्य नेतारं अध्वर्युमित्याहुः। तमेव सामगां साम्नां गातारमिति।

तथा। उक्थशासं उक्थशसं शस्त्राणां शंसितारं होतारमिति ब्रुवन्ति। दक्षिणादानेन तत्कर्मणः परिग्रहात्। स दाता। शुक्रस्य दीप्यमानस्य ज्योतिषः। तिस्रः तन्वः अग्निवैद्युतादित्यात्मकानि त्रीणि शरीराणि। वेद जानाति। यद्वा। शुक्रस्य दीप्तस्य अग्नेः आहवनीयाद्यात्मकानि त्रीणि शरीराणि जानाति। प्रथमो मुख्यः। यो जनः। दक्षिणया रराध ऋत्विगादीन् आराधयति॥

(Dinakara)

तम् एव ऋषिम् अतीन्द्रियार्थदर्शिनम् आहुः। यज्ञन्यं यज्ञनेतारं सामगां सामगातारं उक्थशासम् उक्थशंसितारं होतारमाहुः। सः शुक्रस्य अग्नेः तिस्रः तन्वः आहवनीयाद्यात्मिकाः वेद। प्रथमः दापने मुख्यः यः दक्षिणया ऋत्विगादीन् रराध आराधितवान् ॥१७६॥

He alone (tam eva), who has the right understanding is called (āhuh) the sage-seer (ṛshim), the knower of the ultimate reality (bṛhmāṇam); he is the one who chants the Sāman hymns (sāmagām), and the one who recites the powerful prayers (ukthaśāsam). He is first among those who translate the right understanding into an accomplished way of life (prathamah dakshiṇayā rarādha). He understands (veda) the three forms of that bright and luminous spirit (śukrasya tisrah tanvah): the sun, the wind and the fire.

(177)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या।
छन्दः त्रिष्टुप्।
देवता दक्षिणा ॥

(संहितापाठः)

दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम्।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥१७७॥
(१०.१०७.७)

(पदपाठः)

दक्षिणा। अश्वम्। दक्षिणा। गाम्। ददाति। दक्षिणा। चन्द्रम्। उत। यत्। हिरण्यम्।
दक्षिणा। अन्नम्। वनुते। यः। नः। आत्मा। दक्षिणाम्। वर्म। कृणुते। विऽजानन् ॥

(अन्वयः)

दक्षिणा अश्वं ददाति। गां चन्द्रं उत हिरण्यं अन्नं वनुते। नः यः आत्मा वर्म विजानन् दक्षिणां कृणुते ॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

दक्षिणा तद्दातृभ्यो अश्वं ददाति। तथा। गां च ददाति। तथा चन्द्रं सुवर्णम् ददाति। उत अपि च। यद्धिरण्यं रजतमस्ति। रजतं हिरण्यमित्याम्नानात्। तच्च ददाति। किञ्च सा अन्नं वनुते ददाति। वनोतिरत्र दानार्थः। तस्मात्। नः अस्मदीयः। य आत्मा अस्ति स वर्म विजानन् कवचं यथायुधानाम् निवारकम्। तद्वत् दुरितानि निवारयतीति कवचं इति विजानन्। दक्षिणां अश्वादिदानशीलां कृणुते। ऋत्विग्भ्यः करोति॥

(Dinakara)

(दक्षिणा तद्दातृभ्यः अश्वं ददाति। तथा च गां ददाति। तथा। चन्द्रं सुवर्णं (उत अपि च) हिरण्यं रजतं (ददाति)। किं च सा अन्नं वनुते। वनोतिरत्र दानार्थः। यः विजानन् दक्षिणाख्यं वर्म (कवचं) कृणुते सः (नः) आत्मा (?) ॥१७७॥

The right understanding (dakshiṇa) provides one (dadāti) with power (aśvam), knowledge (gām), delight (chandram) and glorious lustre (hiraṇyam). The right understanding (dakshiṇā) also provides for (vanute) food (annam, sustenance). Our self (na ātmā) has right understanding as its armour (dakshiṇām varma kṛṇute), and this is done knowingly (vijānan, viz. deliberately, with effort).



(178)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या ।
छन्दः त्रिष्टुप् ।
देवता दक्षिणा ॥

(संहितापाठः)

न भोजा मंम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यंथन्ते ह भोजाः ।
इदं यद् विश्वं भुवनं स्वश्चैतत् सर्वं दक्षिणैभ्यो ददाति ॥१७८॥
(१०.१०७.८)

(पदपाठः)

न । भोजाः । मम्रुः । न । निऽअर्थम् । ईयुः । न रिष्यन्ति । न । व्यथन्ते । ह । भोजाः । इदम् । यत् । विश्वम् । भुवनम् । स्व१रिति स्वः । च । एतत् । सर्वम् । दक्षिणा । एभ्यः । ददाति ॥

(अन्वयः)

भोजाः न मम्रुः । न्यर्थं न ईयुः । न रिष्यन्ति । भोजाः न व्यथन्ते । यदिदं विश्वं भुवनं यत् स्वश्च एतत्सर्वं दक्षिणा एभ्यः ददाति ॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

भोजा भोजयितारः। धनादिदानेन दातारः। न मम्रुः। न म्रियन्ते। देवत्वं भजन्त इत्यर्थः। अत एव न्यर्थम्। निकृष्टां गतिं नेयुः। न प्राप्नुवन्ति। तथा च। न रिष्यन्ति कैश्चिदपि अहिंसिता भवन्ति। अत एव।

भोजा दातारः। न व्ययन्ते। परस्परं न भीता न बाधिता वा भवन्ति। ह प्रसिद्धौ। किञ्च। इदं परिदृश्यमानम्। विश्वं सर्वम्। भुवनं यद् भूतजातमस्ति। स्वश्च स्वर्गलोकश्च। एतत् सर्वं । दक्षिणा स्वयम्। एभ्यः दातृभ्यः। ददाति प्रयच्छति॥

(Dinakara)

भोजाः दातारः न मम्रुः न म्रियन्ते। न्यर्थं (ऋ गतौ) अनिष्टां गतिं न ईयुः। (तथा) न रिष्यन्ति। (अहिंसिता भवन्ति। अत एव भोजाः न व्यथन्ते।) हशब्दः प्रसिद्धौ इदं विश्वं सर्वं भुवनं यत् अस्ति यच्च स्वः स्वर्गलोकश्च एतत् सर्वं दक्षिणा (एभ्यः) दातृभ्यः ददाति ॥१७८॥

Those who make others happy (bhojāh) do not die (na mamruh); nor do they come to grief (nyartham na īyuh); nor yet get hurt by others (na rishyanti). They do not decay and degenerate (na vyayante). The right understanding (dakshiṇā) will provide (dadāti) for these people who make others happy (ebhyah) whatever is there (etat sarvam) in this world in front of us (yad idam viśvam bhuvanam) and also in the celestial realms (yat svaścha).



(179)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या।
छन्दः त्रिष्टुप्।
देवता दक्षिणा ॥

(संहितापाठः)

भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१ या सुवासाः।
भोजा जिग्युरन्तःपेयं सुराया भोजा जिग्युर्ये अहूताः प्रयन्ति ॥१७९॥
(१०.१०७.९)

(पदपाठः)

भोजाः। जिग्युः। सुरभिम्। योनिम्। अग्रे। भोजाः। जिग्युः। वध्वम्। या। सुऽवासाः ॥ भोजाः। जिग्युः। अन्तःऽपेयम्। सुरायाः। भोजाः। जिग्युः। ये। अहूताः। प्रऽयन्ति ॥

(अन्वयः)

भोजाः अग्रे योनिं सुरभिं जिग्युः। या सुवासाः वध्वं जिग्युः। भोजाः सुरायाः अन्तः पेयं जिग्युः। ये अहूताः प्रयन्ति भोजाः जिग्युः ॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

भोजा दातारः। अग्रे प्रथममेव। योनिं क्षीरादेरुत्पत्तिस्थानम्। सुरभिं धेनुम्। जिग्युः शत्रुभ्यो जितवन्तः। (जि जये।) तथा। भोजा दातारः। वध्वं वधूं नवोढाम् स्त्रीम्। जिग्युः। या स्त्री सुवासाः शोभनवासाः अस्ति

तां जिग्युः। किञ्च। भोजाः शत्रूणां सुरायाः। अन्तःपेयं अन्तःपानम्। जिग्युः। ये शत्रवोऽहूता बलाधिक्येन अहूयमानाः। प्रयन्ति प्रमुखमागच्छन्ति। तान्। भोजाः दक्षिणाया दातारो जनाः। जिग्युः जयन्ति॥

(Dinakara)

(भोजाः दातारः अग्रे प्रथममेव) योनिं सर्वकामप्राप्तिहेतुं सुरभिं कामधेनुं (जिग्युः। अपि च ते) तां वध्वं वधूं नवोढां स्त्रीं जिग्युः। कीदृशीं, या सुवासाः। किंच ते शत्रूणां सुरायाः अन्तः पेयं मदं जिग्युः तेषां शत्रूणां गर्वपरिहारं कुर्वन्ति। ये अहूताः बलाधिक्येन (अनाहूयमानाः) प्रयन्ति प्रमुखमागच्छन्ति तान् भोजाः दक्षिणादातारो जनाः (जिग्युः) जयन्ति ॥१७९॥

The providers of happiness to others (bhojāh) first of all (agre) win for themselves (jigye) delightful abodes of their own (surabhim yonim); they win (jigye) a bride that is finely attired (vadhvam suvāsāh). They (bhojāh) win (jigyuh, viz. enjoy) the very inner essence (antah peyam) of the delicious drink (surāyāh). They (bhojāh) win (jigyuh) all who come to them (prayanti) on their own (ahūtāh, uninvited).

NOTES

1. 'Surabhim yonim'. The word 'yoni' means seat, womb, or home. It is used in the sense of native abode in the Ṛgvedic passages (1,140,1; 3,5,7; 5,21,4; 6,15,16; 6,16,35; 7,4,5 and 10,19,4). Surabhi is what is fragrant and delightful (e.g. 10,70,4). Sāyaṇa takes 'surabhi' as meaning cow and 'yoni' as the source of milk etc. It is to be remembered that the ideas of cow, bride, drink and so on are sumbolic in import.

(180)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या।
छन्दः त्रिष्टुप्।
देवता दक्षिणा ॥

(संहितापाठः)

भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या३ शुम्भमाना।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ॥१८०॥
(१०.१०७.१०)

(पदपाठः)

भोजाय। अश्वम्। सम्। मृजन्ति। आशुम्। भोजाय। आस्ते। कन्या। शुम्भमाना। भोजस्य। इदम्। पुष्करिणीऽइव। वेश्म। परिऽकृतम्। देवमानाऽइव। चित्रम् ॥

(अन्वयः)

भोजाय आशुं अश्वं सं मृजन्ति। कन्या शुम्भमाना भोजाय आस्ते। पुष्करिणीव परिष्कृतं वेश्म भोजस्य देवमानेव चित्रम् ॥

The seer of the mantra is Divya or Dakshiṇā; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

भोजाय दात्रे। आशुं शीघ्रगामिनम्। अश्वम्। संमृजन्ति परिचारकाः सम्यगलंकुर्वन्ति। तथा। कन्या अभिनवयौवना। शुम्भमाना शरीरावयवशोभया वस्त्राद्यलंकारशोभया च शोभमाना स्त्री। तस्मै भोजाय दात्रे।

आस्ते। तथा। भोजस्य दातुरेव। हृदयाह्लादकरं वेश्म गृहं भवति। कीदृशम्। पुष्करिणीव। पुष्कराणि पद्मानि यस्याः सन्तीति पुष्करिणी। सरसी सा यथा पद्महंसादिभिरलंकृता भवति तद्वत्। परिष्कृतं वितानादिभिरलंकृतम्। तथा। देवमानेव देवमानमिव। चित्रं मनोहरं वेश्म भवति॥

(Dinakara)

भोजाय दात्रे अश्वम् आशुं शीघ्रगामिनम् (अश्वं) सं मृजन्ति कण्टकलोहयन्त्रेण कण्डूयन्ति। किंच भोजाय शुम्भमाना शरीरावयवसन्निवेशविशेषशोभना कन्या आस्ते। इदं हृदयाह्लादकं वेश्म गृहं पुष्करिणीव। पुष्कराणि पद्मानि सन्ति यस्यां सा पुष्करिणी सा यथा पद्मादिभिरलंकृता भवति तद्वत् गृहं परिष्कृतं वितानादिभिरलंकृतं (देवमानेव) देवमानमिव (देवयानमिव) चित्रं मनोहरं तस्य भवति॥१८०॥

For the provider of happiness (bhojāya), they deck out in all its glory (sam mṛjanti) the horse with great speed (āśum aśvam). A bride, splendidly presented (kanyā śumbhamānā) becomes his (āste). And for him (bhojasya) is made an excellent abode (veśma), magnificent (chitram) like the dwelling of gods (devamāneva), and fascinating like a lotus pond (pushkariṇīva parishkṛtam).

(181)

ऋषिः दिव्यो दक्षिणा वा प्राजापत्या ।
छन्दः त्रिष्टुप् ।
देवता दक्षिणा ॥

(संहितापाठः)

भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद् रथो वर्तते दक्षिणायाः।
भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता ॥ १८१ ॥
(१०.१०७.११)

(पदपाठः)

भोजम् । अश्वाः । सुष्ठुऽवाहः । वहन्ति । सुऽवृत् । रथः । वर्तते । दक्षिणायाः ॥
भोजम् । देवासः । अवत । भरेषु । भोजः । शत्रून् । सम्ऽअनीकेषु । जेता ॥

(अन्वयः)

सुष्ठुवाहः अश्वाः भोजं वहन्ति। दक्षिणायाः सुवृत् रथः वर्तते। देवासः, भरेषु भोजं अवत।
भोजः समनीकेषु शत्रून् जेता ॥

The seer of the mantra is Divya or Dakshiṇā ; the poetic form is Trishṭup; and the deity is Dakshiṇā.

(Sāyaṇa)

सुष्ठुवाहः (वह प्रापणे) शोभनवहनसमर्थाः। अश्वाः। भोजं दातारम्। वहन्ति। लक्ष्यं देशं प्रापयन्ति। ततो दक्षिणाया दातुः यजमानस्य। सुवृत् सुष्ठुचक्रादिवर्तनं यस्य सोऽश्वादि सहितो रथो वर्तते। अथ प्रत्यक्षः। हे देवासः हे देवा इन्द्रादयः। भरेषु भ्रियत आहवनीयादिरूपेण अग्निः अत्रेति भरा यज्ञाः। यद्वा भृणन्ति

भर्त्सयन्ति योद्धारोऽत्रेति भराः संग्रामाः। तेषु। भोजं दातारम्। अवत रक्षत। ततो युष्माभिः पालितो भोजो धनादिदानेन जनानां भोजयिता सन्। समनीकेषु संग्रामेषु शत्रूञ्जेता जयशीलो भवति।

(Dinakara)

सुष्ठ्वाहः शोभनवहनसमर्थाः अश्वाः भोजं दातारं वहन्ति (वह प्रापणे)। दक्षिणायाः दातुर्यजमानस्य सुवृत् सुष्ठु चक्रादिवर्तनं यस्य सः अश्वादिसहितो रथो वर्तते। देवासः हे देवाः भरेषु, भ्रियते आहवनीयादिरूपेणाऽग्निरत्रेति भराः यज्ञाः तेषु, यद्वा भृ भर्त्सने, भृणन्ति भर्त्सयन्ति योद्धारोऽत्रेति भराः संग्रामास्तेषु (भोजम्) अवत। ततः युष्माभिः पालितः भोजः धनादिदाने जनानां भोजयिता सन् समनीकेषु संग्रामेषु शत्रून् जेता जयशीलो भवतु ॥१८१॥

The provider of happiness (bhojam) is mounted on a horse that carries burdens with ease (sushṭhuvāho aśvāh), the chariot with excellent wheels (suvṛtrathah) is there for him who has right understanding (dakshiṇāyāh vartate). O ye gods (devāsah), guard him (avata) who provides happiness to others (bhojam), in all undertakings (bhareshu). He (bhojah) will become the victor (jetā) against all odds (śatrūn) in all difficult situations (samanīkeshu).

(182)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः जगती ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

न वा उ देवाः क्षुधमिद् वधं ददुरुताशितमुप गच्छन्ति मृत्यवः।
उतो रयिः पृणतो नोप दस्यत्युतापृणन् मर्डितारं न विन्दते ॥१८२॥
(१०.११७.१)

(पदपाठः)

न । वै । ऊं इति । देवाः । क्षुधम् । इत् । वधम् । ददुः । उत । अशितम् ।
उप । गच्छन्ति । मृत्यवः ॥ उतो इति । रयिः । पृणत । न । उप । दस्यति ।
उत । अपृणन् । मर्डितारम्। न । विन्दते ॥

(अन्वयः)

देवाः वै क्षुधं न ददुः । वधमित् । उत अशितं मृत्यवः उपगच्छन्ति । उतो पृणतः रयिः न उप दस्यति । उत अपृणन् मर्डितारं न विन्दते ॥

The seer of the mantra is Bhikshu of the Āngirasa lineage; the poetic form is Jagatī, and the deity (viz. theme) is eulogy of gift of wealth and food.

(Sāyaṇa)

भिक्षुः प्रथमं व्यतिरेकमुखेन अन्नदानं प्रशंसति। देवा वै देवाः खलु। सर्वेषां क्षुधं न ददुः। न प्रायच्छन्। किन्तु। वधमिद् वधमेव दत्तवन्तः। एतादृशीं वधरूपां क्षुधं अन्नदानेन यः शमयति स दाता खलु। उ इति पूरणः। यः अदत्त्वा भुंक्ते। तमाशितं भुञ्जानं पुरुषमपि। मृत्यवः मरणानि। उप गच्छन्ति समीपे यान्ति। क्षुधार्तानां भोक्तृणां च मरणं समानम्। किं दानेन धननाशरूपेण? अत आह। उतो उतशब्दोऽप्यर्थे। पृणतः प्रयच्छतः। पुरुषस्य। रयिः धनम्। न उपक्षीयते। (दसु उपक्षये। पृण दाने।) दानप्रसङ्गेन अदातारं दूषयति। अपृणन् अप्रयच्छन्। पुरुषस्तु। मर्डितारं आत्मनः सुखयितारम्। न विन्दते न कुत्रापि लभते। इह बन्धवोऽप्रदानान्न सुखयन्ति देवा अपि हविष्प्रदानाभावात्॥

(Dinakara)

(देवाः सर्वेषां क्षुधं) न ददुः। इदिति निश्चये। किन्तु वधम् इत् वधमेव ददुः। आशितम् अदत्त्वा भुञ्जानं मृत्यवः उप गच्छन्ति। चार्थे उतशब्दः। पृणतः प्रयच्छतः जनस्य रयिः धनं नोप दस्यति नोपक्षीयते (दसु उपक्षये)। अपृणन् अप्रयच्छन् मर्डितारम् आत्मनः सुखयितारं न विन्दते न प्राप्नोति॥१८२॥

The gods (devāh) did not provide hunger (kshudham) for beings; but they ordained death for all (vadham it). And (uta), even the beings who eat food (aśitam) are approached by death (mṛtyavah upagachchhanti). Further (uto), the wealth (rayih) of one gives food (pṛṇatah) will not diminish (na upa dasyati). However (uta), the one who does not give (apṛṇan) will not find any one who can make him happy (marḍitāram na vindate).

NOTES

Kātyāyana's *Sarvānukramaṇī* (62, 14) says भिक्षुर्नामाङ्गिरसो धनस्य अन्नस्य च दानं प्रकर्षेण, अदातृनिन्दा पूर्वकं प्रशशंस स्तुतवान्॥

(183)

ऋषि: भिक्षुः आङ्गिरसः।
छन्दः जगती।
देवता धनान्नदानप्रशंसा।।

(संहितापाठः)

य आध्राय चकमानाय पित्वोऽन्नवान्त्सन् रफितायोपजग्मुषे।
स्थिरं मनः कृणुते सेवते पुरोतो चित् स मर्डितारं न विन्दते ॥१८३॥
(१०.११७.२)

(पदपाठः)

यः। आध्राय। चकमानाय। पित्वः। अन्नऽवान्। सन्। रफिताय।
उपऽजग्मुषे ॥
स्थिरम्। मनः। कृणुते। सेवते। पुरा। उतो इति। चित्। सः। मर्डितारम्।
न। विन्दते ॥

(अन्वयः)

यः अन्नवान् सन् आध्राय पित्वः चकमानाय रफिताय उपजग्मुषे मनः स्थिरं कुरुते उतो पुरा चित् सेवते सः मर्डितारं न विन्दते ।।

The seer of the mantra is Bhikshu of the Āṅgirasa-lineage; the poetic form is Jagatī; and the deity (viz. theme) is eulogy of gift of wealth and food.

(Sāyaṇa)

यः पुरुषः। स्वयं अन्नवान् अपि। आध्राय आधार्यते असौ इति आध्रो दुर्बलः। तस्मै। पित्वः पितून् अन्नानि। चकमानाय चकमानः कान्तिकर्मा। रफिताय रफतिर्हिंसार्थः॥ दारिद्र्येण हिंसिताय। उपजग्मुषे। गृहं प्रत्यागताय अतिशयेन। मनः आत्मीयं अन्तःकरणं। अदाने। स्थिरं कृणुते कुरुते। मनःस्थैर्यकरणेन तं क्लेशयतीत्यर्थः। न केवलं क्लेशकरणम्। अपि तु। पुरा तस्य पुरस्तादेव। सेवते भोगान्। सोऽपि। मर्डितारं आत्मनः सुखयितारं। न विन्दते न कुत्रापि लभते॥

(Dinakara)

यः पुरुषः अन्नवान् सन्नपि आध्राय दुर्बलाय पित्वः अन्नानि चकमानाय कामयमानाय रफिताय दारिद्र्येण हिंसिताय (स्फि हिंसार्थः) उपजग्मुषे गृहं प्रत्यागताय अन्नादि दातुं मनः स्वीयमन्तः करणम् (अदाने) स्थिरं कृणुते कुरुते उतो (पुरः तस्य पुरस्तादेवान्नादि सेवते च (सः मर्डितारं सुखयितारं नाप्नोति) ॥१८३॥

When a poor man (ādhrāya) begging for food (pitvā chakamānāya) helplessly (raphitāya), approaches (upajagmushe) the rich one who has enough food (annavān san), the latter hardens his heart (manah sthiram kurute) and partakes of food (sevate) even in front of the hungry one (purā chit), such a one will not find (na vindate) anyone who can make him happy (marḍitāram).

(184)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप्।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ॥१८४॥
(१०.११७.३)

(पदपाठः)

सः । इत् । भोजः । यः । गृहवे । ददाति । अन्नऽकामाय । चरते । कृशाय ॥
अरम् । अस्मै । भवति । यामऽहूतौ । उत । अपरीषु । कृणुते । सखायम् ॥

(अन्वयः)

यः अन्नकमाय गृहवे चरते कृशाय ददाति स इत् भोजः । यां आहूतौ अस्मै अरं भवति । उत अपरीषु सखायं कृणुते ॥

The seer of this mantra is Bhikshu of the Āngirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is the eulogy of gift of wealth and food.

(Sāyaṇa)

(अन्वयमुखेन प्रशंसति) स इत् स एव। भोजः दाता खलु। यः गृहवे प्रतिग्रहीत्रे। अन्नकामाय अन्नं याचमानाय। चरते गृहमागतवते। कृशाय दारिद्र्येण। एतादृशाय अतिथये। अन्नम्। ददाति प्रयच्छति। यां

आहूतौ यामा गन्तारो देवाः। त आहूयन्तेऽत्रेति यामहूतिर्यज्ञः। तस्मिन्। अस्मै दात्रे। फलम्। अरम् पर्याप्तं भवति। कामप्रदानं भवतीत्यर्थः। उत अपि च। अपरीषु अन्यासु शात्रवीषु सेनासु। सखायं कृणुते तद्वदाचरतीत्यर्थः। तस्य सर्वे सखाय एव, न शत्रव इत्यर्थः।।

(Dinakara)

यः गृहवे गृहागताय चरते अध्वनीनाय, "अध्वनीनोऽतिथिर्ज्ञेय" इति मनुस्मृतेः, दारिद्र्येण कृशाय अन्नं ददाति स इत् स एव भोजः दाता। अस्मै दात्रे यामहूतौ, यामाः गन्तारो देवाः हूयन्ते आहूयन्तेऽत्रेति यज्ञः तस्मिन्, अरम् अलं पर्याप्तं भवति। अन्नमिति शेषः। उत किंच अपरीषु शात्रवीषु सेनासु दाता वैरिणमपि सखायं कृणुते करोति ।।१८४।।

He indeed is (sa it) the provider of happiness (bhojah), who offers (dadāti) food for the hungry (annakāmāya), home for the homeless (gṛhave), rest for the wanderer (charate), and nourishment for the emaciated (kṛśāya). This is like a sacrifice for the wandering spirits (yāmahūtau); and for one who engages himself in it (asmai) quick becomes the reward (aram bhavati). Further (uta), he would make friends (sakhāyam kṛṇute) even of strangers (aparīshu).

(185)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप् ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः।
अपास्मात् प्रेयान् न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत् ॥१८५॥
(१०.११७.४)

(पदपाठः)

न । सः । सखा । यः । न । ददाति । सख्ये । सचाऽभुवे । सचमानाय । पित्वः ॥
अप । अस्मात् । प्र । इयात् । न । तत् । ओकः । अस्ति । पृणन्तम् । अन्यम् ।
अरणम् । चित् । इच्छेत् ॥

(अन्वयः)

यः सचाभुवे सचमानाय सख्ये पित्वः न ददाति सः न सखा। अस्मात् अप प्रेयात्।
तदोकः न अस्ति। पृणन्तं अन्यं अरणं इच्छेत् ॥

The seer of the mantra is Bhikshu of Āṅgirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is eulogy of gift of wealth and food.

(Sāyaṇa)

(व्यतिरेकेण निन्दामाह) सः पुरुषः। सखा न भवति। यः पुरुषः। सचाभुवे सर्वदा सहभवनशीलाय। सचमानाय सेवमानाय उपसर्जनीभूताय। सख्ये सखिजनाय। पित्वः पितून् अन्नानि। न ददाति न प्रयच्छति।

स सुहृन्न भवतीत्यर्थः। अस्मात् अदातुः सख्युः। सः अप प्रेयात् अपगच्छेत्। यद्येनं परित्यज्य गच्छेत्। तर्हि तदोकः निवासः सदनम्। नास्ति न भवति। सदनं हि बन्धुभिः परिवृतम्। स गतः पुरुषः। पृणन्तं अन्नादिकं प्रयच्छन्तम्। अन्यं अरणं चिदर्थं स्वामिनं एव। इच्छेत् कामयेत॥

(Dinakara)

यः सख्ये (सखिजनाय) सचाभुवे सह वसते सचमानाय सेवमानाय पित्वः अन्नानि न ददाति सः न सखा, ''भोजयेच्चागतान् काले सखिसम्बन्धिबान्धवान्'' इति यमस्मृतेः। यद्यपिः सखा वा अस्मात् अदातुः सख्युर्वा सकाशात् अप प्रेयात् परित्यज्य गच्छेत् तर्हि तत् ओकः गृहं न अस्ति (न भवति), चित् चेत् स गतः अन्यं (पृणन्तम् अन्नादिकं प्रयच्छन्तम्) अरणं दातारम् इच्छेत् गच्छेत्। अन्यत्र गमनात् पूर्वं नाकारितश्चेत्तदा गृहनाश इत्यर्थः॥१८५॥

He (yah) who does not provide support (pitvah na dadāti) for his friend (sakhye) who is his constant companion (sachābhuve) and who is his well-wisher (sachamānāya), is no friend at all (na sa sakhā). One must move away from such a one (asmāt apa preyāt), who cannot be a 'home' (tad okah na asti). One must seek another person who is worthy (anyam araṇam ichchhet).



(186)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप् ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

पृणीयादिन् नाधमानाय तव्यान् द्राघीयांसमनु पश्येत पन्थाम्।
ओ हि वर्तन्ते रथ्येव चक्रान्यमुप तिष्ठान्त रायः ॥१८६॥
(१०.११७.५)

(पदपाठः)

पृणीयात् । इत् । नाधमानाय । तव्यान् द्राघीयांसं । अनु । पश्येत । पन्थाम् ॥
ओ इति । हि । वर्तन्ते । रथ्याऽइव । चक्रा । अन्यंऽअन्यम् । उप । तिष्ठन्त । रायः ॥

(अन्वयः)

तव्यान् नाधमानाय पृणीयात् इत् । द्राघीयांसं पन्थां अनुपश्येत । रायः रथ्येव चक्रा ओ हि वर्तन्ते । अन्यमन्यं उप तिष्ठन्त ॥

The seer of the mantra is Bhikshu of Āṅgirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is eulogy of gift of wealth and food.

(Sāyaṇa)

(धनवन्तं पुरुषं दाने प्रेरयति।) तव्यांस्तवीयान् धनैरतिशयेन प्रवृद्धः पुरुषः। नाधमानाय याचमानाय अतिथये। पृणीयादित् धनानि दद्यादेव। यदि दद्यात्। द्राघीयांसं दीर्घतमम्। पन्थां पन्थानम्। सुकृतमार्गम्। अनु पश्येत अनुपश्येत्। तत्र कारणमाह। रायो धनान्यो हि। आ उ आवर्तन्ते खलु। एकत्र न तिष्ठन्तीर्थः।

तत्र दृष्टान्तः। रथ्येव यथा रथ्यानि। रथसम्बन्धीनि। चक्राणि उपर्यधोभावेन आवर्तन्ते तद्वत् आवृत्तिमेव दर्शयति। अन्यमन्यं पुरुषं धनान्युपतिष्ठन्त। उपतिष्ठन्ते समवेतनि भवन्ति। तस्माद्धनानि देयानीति भावः॥

(Dinakara)

तव्यान् तवीयान् कृशोऽपि पुरुषः, धनहीन इति यावत्, नाधमानाय याचमानाय पृणीयात् इत् दद्यादेव (पृ पालनपूरणयोः) सः द्राघीयांस (पन्थां) पन्थानं दीर्घपुण्यमार्गम् अनु पश्येत। हि यस्मात् रायः धनानि खलु निश्चयेन ओ (आ उ) वर्तन्ते एकत्र न तिष्ठन्तीत्यर्थः। तत्र दृष्टान्तः। रथ्या रथसंबन्धीनि चक्रा चक्राणि यथा उपर्यधश्चावर्तन्ते, तद्वत् अन्यमन्यं पुरुषं रायो धनानि उप तिष्ठन्ते॥१८६॥

The strong man (tavyān) must indeed bestow strength (pṛṇīyāt it) on the weak and the imploring (nādhamāya), so that he too will perceive (anu paśyeta) the best of the paths of progress (drāghiyāmsam panthām). Wealth which is the source of strength (rāyah) are turning like the wheels of a chariot (rathyeva chakrā o hi vartante); it goes from one to another and settles down there (anyam anyam upa tishṭhante).



(187)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप् ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥१८७॥
(१०.११७.६)

(पदपाठः)

मोघम् । अन्नम् । विन्दते । अप्रऽचेताः । सत्यम् । ब्रवीमि । वधः । इत् ।
सः । तस्य ॥ न । अर्यमणम् । पुष्यति । नो इति । सखायम् । केवलऽअघः ।
भवति । केवलऽआदी ॥

(अन्वयः)

अप्रचेताः सः मोघं अन्नं विन्दते । सत्यं ब्रवीमि । तस्य स वध इत् । यः अर्यमणं न पुष्यति सखायं नो, केवलादी (सः) केवलाघः भवति ।

The seer of the mantra is Bhikshu of the Āṅgirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is eulogy of gift of wealth and food.

(Sāyaṇa)

(अदातारं दूषयति)। अप्रचेताः अप्रकृष्टज्ञानः । दाने चेतः मनो यस्य । न भवति स मोघम् व्यर्थम् एव । अन्नं विन्दते लभते । इदं सत्यं यथार्थमेवेति ब्रवीमि । ऋषिरहं वदामि । न केवलं व्यर्थम् । किन्तु । तस्य पुरुषस्य । सः । वध इत् वध एवान्नं परामृशतः। अथवा । स निरर्थको वध एव । यः पुरुषः अर्यमणं उपलक्षणमिदं सर्वान्देवान् अर्यमादीन् । न पुष्यति हविष्प्रदानेन न पोषयति । नो नापि । सखायं समानख्यान-मभ्यागतमतिथिं मित्रवर्गं च न पोषयति । अत एव केवलादी । केवलं असाक्षिकमन्नं भुञ्जानः । सः केवलाघो भवति केवलपापवान् भवति । अघमेव केवलं तस्य शिष्यते । ऐहिकामुष्मिकमिति । तस्माद्यथाकथञ्चि-द्दातव्यमित्याभिप्रायः॥

(Dinakara)

अदातारं दूषयति । अप्रचेताः अप्रकृष्टज्ञानः, दाने यस्य चेतो न भवति सः, मोघं व्यर्थमेव अन्नं विन्दते लभते (विद्लृ लाभे, तौदादिकः। शेमुचादीनाम् (पा ७.१.५९) इति नुमागमः।) इदं सत्यं यथार्थमेव ब्रवीमि ऋषिरहं वदामि। न केवलं व्यर्थं (किंतु) तस्य पुरुषस्य सः वधः इत् वध एव। अथवा स निरर्थको वध एव यः पुरुष अर्यमणम्। उपलक्षणमिदम्। सर्वान् देवान् न पुष्यति हविः प्रदानेन (न पोषयति) नापि सखायम् अपि आगतमतिथिमित्रवर्गं च न पोषयति। (पुष पुष्टौ, दैवादिकः। यच्छब्दाध्याहारात् अनिघातः।) अत एव केवलादी (अदेः, सुप्यजातौ (पा ३.२.७८) इति णिनिः, अत उपधालक्षणा वृद्धिः।) केवलमेकोऽन्नं भुञ्जानः अयं केवलाघो भवति केवलं पापवान् भवति। पापमेव केवलमवशिष्यते, नैहिकं नामुष्मिकमिति। तस्माद्यथाकथंचिद्दातव्यमिति अभिप्रायः॥१८७॥

The person who has an uncultivated heart (aprachetāh) obtains food (annam vindate) all in vain (mogham). I do speak truth (satyam bravīmi) when I say that food for him is merely death (tasya vadha it). One who fails to nourish Aryaman, who is the spirit of the unbroken path (cf.RV 10,64,5), or his friends, and eats his food all alone (kevalādī), becomes surely the eater of his own sins (kevalāgho bhavati).

(188)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप् ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

कृषन्नित् फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः । वदन्। ब्रह्मावदतो वनीयान् पृणन्नापिरपृणन्तमभि ष्यात् ॥
(१०.११७.७)

(पदपाठः)

कृषन्। इत्। फालः। आशितम् कृणोति। यन्। अध्वानम्। अप। वृक्ते। चरित्रैः ॥ वदन्। ब्रह्मा। अवदतः। वनीयान्। पृणन्। आपिः। अपृणन्तम्। अभि। स्यात् ॥

(अन्वयः)

कृषन् फालः आशितं कृणोति। अध्वानं यन् चरित्रैः अप वृंक्ते। वदन् ब्रह्मा अवदतः वनीयान्। पृणन् अपृणन्तं अभि आपिः स्यात्

The seer of the mantra is Bhikshu of Āṅgirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is the eulogy of the gift of wealth and food.

(Sāyaṇa)

कृषन् कृषिं कुर्वन्। आशितं कर्षकं भोक्तारं। कृणोति करोति। तथा। अध्वानं मार्गं। यन् गच्छन्। पुरुषः। चरित्रैः आत्मीयैः गमनैः। अप वृंक्ते स्वामिनो धनमावर्जयति। वदन् शास्त्रार्थं ब्रुवाणः। ब्रह्मा ब्राह्मणः।

अवदतः शास्त्रार्थं। अब्रुवानाज्जनाद्वनीयान्। संभृक्ततमः प्रियकरो भवति। ते यथा स्वकर्माणि प्रवर्तमानाः परेषां उपकारकाः तथा । पृणन् दाता पुरुषः। अपृणन्तं अदातारं जनं अभिलक्ष्य। आपिः स्यात् बन्धुर्भवेत्॥

(Dinakara)

कृषन् कृषिं कुर्वन् पुरुषः फाले काष्ठे आशितं स्थितं कीटादि कष्टभोक्तारं। कृणोति करोति। अध्वानं यन् गच्छन् पुरुषः चरित्रैः स्वकीयैर्गमनैः अन्यान् अप वृङ्क्ते रोधयति (वृजी वर्जने)। वदन् (शास्त्रार्थं ब्रुवाणः ब्रह्मा ब्राह्मणः अवदतः अज्ञस्य जनस्य वनीयान् प्रियकरो भवति। (वनतेः (तृजन्तस्य) ईयसुन्।) तथा पृणन् ददन् आपिः दाता अपृणन्तम् अदातारं प्रति अभिष्यात् बन्धुर्भवति। परानभिमतदानकरणात् शत्रुत्वेऽपि लज्जया पुण्यकारयितृत्वेन बन्धुत्वम्॥१८८॥

The ploughshare (phālah) while furrowing the field (kṛshan) provides food for the farmer (āśitam kṛṇoti). The man walking along the road (adhvānam yan) acquires wealth (apa vṛnkte) by his very movement (charitraih). The priest (brahmā) by discoursing about the scriptures (vadan) causes delight (vanīyān) to him who cannot discourse (avadatah). The donor by his generosity (praṇan) will become a friend (āpih syāt) to him who cannot give (apṛṇantam abhi).



(189)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप् ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

एकपाद भूयो द्विपदो वि चक्रमे द्विपात् त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे संपश्यन् पङ्क्तीरुपतिष्ठमानाः ॥१८१॥
(१०.११७.८)

(पदपाठः)

एकऽपात् । भूयः । द्विऽपदः । वि । चक्रमे । द्विऽपात् । त्रिऽपादम् । अभि । एति । पश्चात् ॥
चतुःऽपात् । एति । द्विऽपदाम् । अभिऽस्वरे । सम्ऽपश्यन् । पंक्तीः । उपऽतिष्ठमानः ॥

(अन्वयः)

एकपात् द्विपदः भूयः विचक्रमे । द्विपात् त्रिपादं पश्चात् अभि एति । चतुष्पात् अभिस्वरे द्विपदां संपश्यन् उपतिष्ठमानः एति ॥

The seer of the mantra is Bhikshu of Āṅgirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is the eulogy of gift of wealth and food.

(Sāyaṇa)

अत्र पादशब्दो भागवचनः । एकपात् एकभागधनः । पुरुषः । द्विपादो द्विगुणधनस्य मार्गं भूयः । भूयसा कालेन । वि चक्रमे विविधं गच्छति । तथा द्विपात्पुरुषः । त्रिपादं त्रिभागधनम् । पुरुषं । पश्चात् अभ्येति

अभिगच्छति । चतुष्पात् चतुर्भागधनस्तु । द्विपदां । बहुवचनात् एकपादादय उपलक्ष्यन्ते । एकपादधनादीनां पंक्तीः । अभिस्वरे अभिगमने । संपश्यन् सम्यगीक्षमाणः सन् । उपतिष्ठमान एति गच्छमानो भवति । अन्योन्यापेक्षया सर्व उत्तमाधमाः । तस्मात् त्वं 'अहमेव धनवान्' इति न मन्येः । किन्तु अतिथिभ्यो धनानि ददस्व इत्यर्थः ॥

(Dinakara)

पादशब्दो भागवचनः । एकपात् एकभागधनः पुरुषः द्विपदः द्विगुणधनस्य पुंसः मार्गं (भूयः) भूयसा कालेन वि चक्रमे विविधं गच्छति प्राप्नोति । तथा (द्विपात्) द्विभागधनः त्रिपादं त्रिभागधनं पुरुषं पश्चात् अभ्येति (अभिगच्छति)। चतुष्पात् चतुर्भागधनस्तु द्विपदां, बहुवचनादेकपादादयः उपलक्ष्यन्ते, एकपादधनादीनाम् अभिस्वरे निकटे पङ्क्तीः क्रमान् सम्पश्यन् उपतिष्ठमानः गच्छमानः एति । अन्योऽन्यापेक्षया सर्वेषामेवाधिकधनत्वेन धनगर्वं मा कृथाः किन्तु प्रयच्छेत्यर्थः ॥१८९॥

The man with but one foot (ekapāt) takes longer time (bhūyah) while walking (vi chakrame), than one with two feet (dvipadah). And one with two feet (dvipāt) walks slower and reaches his goal only after (paśchat abhi eti) the one with three feet (tripādam). And one with four feet walks faster, leaving others behind him (dvipadān upatishṭhamānah eti), and recognizing the foot-marks left by them (sampaśyan).

(190)

ऋषिः भिक्षुः आङ्गिरसः ।
छन्दः त्रिष्टुप् ।
देवता धनान्नदानप्रशंसा ॥

(संहितापाठः)

समौ चिद्धस्तौ न समं विविष्टः संमातरा चिन् न समं दुहाते ।
यमयोश्चिन् न समा वीर्याणि ज्ञाती चित् सन्तौ न समं पृणीतः ॥१९०॥
(१०.११७.९)

(पदपाठः)

समौ । चित् । हस्तौ । न । समम् । विविष्टः । सम्ऽमातरा । चित् । न ।
समम् । दुहाते इति ॥ यमयोः । चित् । न समा । वीर्याणि । ज्ञाती
इति । चित् । सन्तौ । न । समम् । पृणीतः ॥

(अन्वयः)

हस्तौ समौ चित् समं न विविष्टः । सं मातरा चित् समं न दुहाते । यमयोश्चित् समा वीर्याणि (न) । ज्ञाती चित् सन्तौ समं न पृणीतः ॥

The seer of this mantra is Bhikshu of Āngirasa lineage; the poetic form is Trishṭup; and the deity (viz. theme) is eulogy of gift of wealth and food.

(Sāyaṇa)

(अतिथिभ्यो धनं अप्रयच्छन् अपि मम भ्राता दास्यतीति चेत् तत्र हेतुमाह ।) समौ चित् हस्तौ । समावपि समं समानं। न विविष्टः कार्यं न व्याप्नुतः । तथा । सं मातरा वत्सस्य मातरौ धेनू । समे अपि । समं समानं पयो न दुहाते । यमयोः चित् सहजातयोः पुत्रयोरपि । समा समानि । वीर्याणि न सन्ति । तस्मात् ज्ञाती चित् एकस्मिन् कुले । सन्तौ जातावपि । समं न पृणीतः न प्रयच्छतः । तस्माद्यस्य धनमस्ति स एव दद्यादित्यर्थः ॥

(Dinakara)

समौ चित् समावपि हस्तौ समं समानकार्यं न विविष्टः न व्याप्नुतः । (विष्लृ व्याप्तौ।) संमातरा चित् समानमातरावपि धेनू समं न दुहाते। यमयोश्चित् सहजातयोरपि समा समानानि वीर्याणि न सन्ति। ज्ञाती चित् ज्ञाती एव सन्तौ (अपि) न समं पृणीतः न समं ददतः। तस्माद्यस्य धनमस्ति स दद्यादेवेत्यर्थः॥१९०॥

The two hands (hastau) are alike (samau chit), but they differ in funcation (no vivishṭah). Two cows may be same for all appearances (sam mātarā chit) but they do not yield milk in same quantity (samam na duhāte). Two persons may be twins (yamayoś chit), but they may not be the same in strength (samā vīryāṇi na). Two persons may have the same family background (jñātī chit santau), but they may not be generous alike (samam na pṛṇītah).



(191)

ऋषिः अग्नियुतः स्थौरोऽग्नियूपो वा स्थौरः।
छन्दः त्रिष्टुप्।
देवता इन्द्रः॥

(संहितापाठः)

अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम्।
प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः॥१९१॥
(१०.११६.८)

(पदपाठः)

अद्धि। इत्। इन्द्र। प्रऽस्थिता। इमा। हवींषि। चनः। दधिष्व। पचता। उत।
सोमम्॥ प्रयस्वन्तः। प्रति। हर्यामसि। त्वा। सत्याः। सन्तु। यजमानस्य। कामाः॥

(अन्वयः)

इन्द्र। प्रस्थिता इमा हवींषि अद्धि इत्। चनः पचता दधिष्व। उत सोमं (पिब)। प्रयस्वन्तः (वयं) त्वा प्रति हर्यामसि। यजमानस्य कामः सत्याः सन्तु॥

The seer of the mantra is Agniyuta or Agniyūpa, son of Sthūra (hence sthaura); the poetic form is Trishṭup; and the deity is Indra.

(Sāyaṇa)

हे इन्द्र। प्रस्थिता प्रस्थितान्युत्तरवेदिम् प्रति। इमे इमानि। हवींषि अद्धीत्। इत् अवधारणे। भक्षयैव। चनः। चन इत्यन्ननाम। तद् दधिष्व धारय। उदरे प्रक्षिप। पचता पचतानि। सवनीय पुरोडाशादीनि च। धारय।

उत अपि च। सोमं पिब। ततः प्रयस्वन्तः। प्रीणयतीति प्रयः अन्नम्। तेन तद्वन्तः सन्तः। त्वा त्वां प्रति। हर्यामसि हर्यामः। कामयामहे धनादीनि। हर्यतिः प्रेप्सा कर्मा। तस्मात् यजमानस्य यागं कुर्वाणस्य कामा धनादि विषया अभिलाषाः। सत्या यथार्थाः। सन्तु॥

(Dinakara)

हे इन्द्र (प्रस्थिता) प्रस्थितानि उत्तरवेदिं प्रति इमा इमानि (उभयत्र डादेशः) हवींषि अद्धि इत् भक्षय। इदवधारणे। चन इत्यन्ननाम (तत्) दधिष्व धारय उदरे प्रक्षिप। उतापि च सोमं पचत पिब। प्रयस्वन्तः प्रयोऽन्नं तद्वन्तो वयं त्वां प्रति हर्यामसि कामयामहे धनादीनि। यजमानस्य कामाः सत्याः सन्तु ॥१९१॥

Accept (addhīd), O Indra, these offerings (imā havīṁshi) well backed in the maturity of my thought (pachatā), placed in front of you (prasthitā), and fill yourself with delight (chanah dadhishva), and also Soma (mind's relish). We are eager to please you (prayasvantah), and we approach you (tvā prati) with our best prayers (haryāmasi). May the longings (kāmāh) of those worshipping you (yajamānasya) get fulfilled (satyāh santu).



(192)

ऋषिः यक्ष्मनाशनः प्राजापत्यः।
छन्दः त्रिष्टुप्।
देवता इन्द्रः अग्निश्च।

(संहितापाठः)

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥१९२॥
(१०.१६१.१)

(पदपाठः)

मुञ्चामि। त्वा। हविषा। जीवनाय। कम्। अज्ञातऽयक्ष्मात्। उत।
राजऽयक्ष्मात्॥ ग्राहिः। जग्राह। यदि। वा एतत्। एनम्। तस्याः। इन्द्राग्नी।
इति। प्र। मुमुक्तम्॥

(अन्वयः)

हविषा त्वा जीवनाय कं अज्ञातयक्ष्मात् मुञ्चामि। उत राजयक्ष्मात्। यदि वा एतत् एनं ग्राहिः जग्राह, इन्द्राग्नी, तस्याः एनं प्र मुमक्तम्॥

The seer of the mantra is the offspring of Prajāpati known as the eliminator of the diseases (yakshma-nāśana); the poetic form is Trishṭup; and the deity invoked is Indra along with Agni.

(Sāyaṇa)

हे यक्ष्माभिभूत, हविषानेन चरुणा। साधनेन होमेन। त्वा त्वाम्। अज्ञातयक्ष्मात्। अयमेतत् संज्ञ इत्यप्र- ज्ञातः शरीरगतो रोगः अज्ञातयक्ष्मः। तादृशाद्रोगात् मुञ्चामि विश्लेषयामि। किमर्थं? जीवनाय कम् जीवनार्थम्। इह लोके चिरकालावस्थानार्थमित्यर्थः। कमिति पूरकः। उत अपि च। राजयक्ष्मात्। यक्ष्माणां। राजा यक्ष्मरोगो राजयक्ष्मः। तस्मादपि त्वां मुञ्चामि। यदि वा यदि चैतत् एतस्मिन् समये। एनं व्याधितं पुरुषम्। ग्राहिः ग्रहणशीला ग्रहरूपा देवता। जग्राह गृहीतवती। तस्याः देवतायाः सकाशात्। हे इन्द्राग्नी। एनम् । प्र मुमुक्तं प्रमोचयतम्॥

(Dinakara)

प्रजापत्या यक्ष्मनाशनी। हे यक्ष्माभिभूत अनेन हविषा त्वाम् (अज्ञातयक्ष्मात्) अज्ञातरोगात् राजयक्ष्मात् क्षयादपि मुञ्चामि। जीवनाय कं जीवनार्थम्। कमिति पूरकः। हे इन्द्रग्नी एतत् एतस्मिन् समये यदि एनं व्याधितं ग्राहिः (ग्रहरूपा) देवता जग्राह तस्याः सकाशात् एनं प्र मुमुक्तं प्रमोचयतम् ॥१९२॥

(The diseased one is assured) I shall free you (muñchāmi) with these offerings of mine (havishā) from this unexplained illness (ajñāta yakshmāt) and dangerous sickness (rāja-yakshmāt), so that you may live happily (jīvanāya kam). If indeed (yadi vā), the spirit who possesses (grāhih) has already taken hold of him (jagrāha), O Indra and Agni, you two must deliver him (enam pra mumuktam) from the grip of this fell disease (tasyāh).

NOTES:

Kātyāyana's *Sarvānukramaṇī* (64, 19) describes this hymn as meant to destroy all diseases (specifically pulmonary consumption, yakshma). According to this text, the seer is called Yakshma-nāśana, and is the son of Prajāpati यक्ष्मनाशनो नाम प्रजापतिपुत्रः। But it may not be his real name; probably

he was a well-known physician, and people called him Yakshma-nāśana ('the destroyer of diseases'). As regards the deity, there was no mention in the older texts; the gloss of Shaḍguruśishya suggests that Indra is to be regarded as the devatā: अनादेशादिन्द्रो देवता। and also mentions that according to *Bṛhaddevatā*, Indra and Agni are together the devatā of this hymn: ऐन्द्राग्नं मन्यते यास्क एके लिङ्गोक्तदैवतम्॥

(193)

ऋषिः यक्ष्मनाशनः प्राजापत्यः ।
छन्दः त्रिष्टुप् ।
देवता इन्द्रः ॥

(संहितापाठः)

यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय ॥१९३॥
(१०.१६१.२)

(पदपाठः)

यदि । क्षितऽआयुः । यदि । वा । पराऽइतः । यदि । मृत्योः । अन्तिकम् ।
निऽइतः । एव ॥ तम् । आ । हरामि । निःऽऋतेः । उपऽस्थात् ।
अस्पार्षम् । एनम् । शतऽशारदाय ॥

(अन्वयः)

यदि क्षितायुः यदि वा परेतः यदि च मृत्योः अन्तिकं नीतः एव, तं निर्ऋतेः उपस्थात् आ हरामि। एनं शतशारदाय अस्पार्षम् ॥

The seer of the mantra is Yakshmanāśana, son of Prajāpati; the poetic form is Trishṭup; and the deity referred to is Indra.

(Sāyaṇa)

यदि स रोगग्रस्तः क्षितायुः। क्षीणायुः भवति। यदि वा परेतः। अस्माल्लोकात् परागतः भवति। यदि च मृत्योः वैवस्वतस्य। अन्तिकं निकटम्। नीतः नितरां प्राप्त एव भवति। एवंभूतमपि तं पुरुषम्। निर्ऋतेः

पापदेवतायाः आयुषः क्षयकारिण्या। उपस्थात् उपस्थानात्। आ हरामि अनाययामि। आवर्तयामि। आहृत्य च। एनम्। शतशारदाय शतसंवत्सर जीवनार्थम्। अस्पार्षम् प्रबलं करोमि (स्पु प्रीतिबलनयोः।)

(Dinakara)

यत् आयं रोगेण ग्रस्तः क्षितायुः, यदि अस्माल्लोकात् वा परेतः गतः, यदि वा मृत्योः अन्तिकं नीतः एव भवति, एवंभूतम् एतं निर्ऋतेः पापदेवतायाः उपस्थात् समीपात् आ हरामि आवर्तयामि। शतशारदाय शतवर्षायुषे एनम् अस्पार्षं मन्त्रेण स्पृष्टवानस्मि ॥१९३॥

If this unfortunate man (ayam) is of wasted life (kshitāyuh), if indeed (yadi vā) he is dead already (pareto), if (yadi) he has arrived at the verge of death (mṛtyoh antikam nītah), surely I shall bring him (enam) back (tam ā harāmi) from the neighbourshood of Nirṛti (the spirit of death, decay and disease) (nirṛteh upasthāt) and provide him with strength and joy with the touch of this mantra (aspārsham) to live for a hundred years (śata-śāradāya).

(194)

ऋषिः यक्ष्मनाशनः प्राजापत्यः ।
छन्दः त्रिष्टुप् ।
देवता इन्द्रः ॥

(संहितापाठः)

सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम् ॥१९४॥
(१०.१६१.३)

(पदपाठः)

सहस्रऽअक्षेण । शतऽशारदेन । शतऽआयुषा । हविषा । आ । अहार्षम् । एनम् ॥
शतम् । यथा । इमम् । शरदः । नयाति । इन्द्रः । विश्वस्य । दुःऽइतस्य । पारम् ॥

(अन्वयः)

यथा इमं शरदः शतं इन्द्रः विश्वस्य दुरितस्य पारं नयाति । सहस्राक्षेण शतशारदेन शतायुषा हविषा एनं आहार्षम् ॥

The seer of the mantra is Yakshmanāśana, son of Prajāpati; the poetic form is Trishṭup; and the deity invoked is Indra.

(Sāyaṇa)

सहस्रमिति बहुनाम। सहस्रमक्षीणि चक्षूंषि, यस्य हविषः फलत्वेन विद्यन्ते तत् सहस्राक्षम्। शरदः सम्बन्धी शारदः संवत्सरः। शतं शारदा यस्य तत् तथोक्तम्। अत एव शतायुषा शतसंवत्सर परिमितम्।

आयुः जीवनम्। फलभूतम्। यस्य। तादृशेन हविषा। यद्वा। सहस्राक्ष इन्द्रः। तेन शतशारदेन शरदां संवत्सरणाम्। शतस्य दातृत्वेन सम्बन्धिना कर्त्रा। शतायुषा हविषा। करणभूतेन। एनम्। यक्ष्मगृहीतम्। आहार्षं रोगात् अनैषम्। यथा येन प्रकारेण। इमं पुरुषं। शतं शरदः संवत्सरान्। एतावन्तं कालं इन्द्रः। विश्वस्य सर्वस्य। दुरितस्य दुःखस्य। पारं अवसानम्। दुःखराहित्यम्। नयाति नयेत्। तथाहार्षं इत्यर्थः॥

(Dinakara)

सहस्राक्षेण। सहस्रमिति बहुनाम। सहस्रशोऽक्षीणि चक्षूंषि यस्य हविषः फलत्वेन विद्यन्ते तत् सहस्राक्षम् (बहुव्रीहौ सक्थ्यक्ष्णोः (पा.५.४.११३) इति षच्)। शरदः सम्बन्धी शारदः संवत्सरः। शतं शारदा यस्य तत्तथोक्तम्। (बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्।) अत एव शतायुषा शतसंवत्सरपरिमितमायुः जीवनं फलभूतं यस्य तादृशेन हविषा यक्ष्मगृहीतम् (एनम्) तथा आहार्षं रोगादनैषं यथा येन प्रकारेण इन्द्रः इमं पुरुषं शतं शरदः संवत्सरान् (अत्यन्तसंयोगे द्वितीया) विश्वस्य सर्वस्य दुरितस्य दुःखस्य पारम् अवसानं दुःखादिराहित्यं नयाति नयेत्, तथा आहार्षमित्यर्थः ॥१९४॥

I have brought him (enam) out of the grip of the disease (ahārsham), by these offerings of mine (havishā), which are thousand-eyed (shasrākshena, (viz. with numerous benefits), which ensure a life-span of hundred years for him (śata-śāradena), and which will endure for a hundred years (śatāyushā), so that (yathā) the mighty Indra leads him safely across (nayāti) to the end of all evils (viśvasya duritasya pāram).

(195)

ऋषिः यक्ष्मनाशनः प्राजापत्यः।
छन्दः त्रिष्टुप्।
देवता इन्द्रः अग्निश्च ॥

(संहितापाठः)

शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान्।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥१९४॥
(१०,१६१,४)

(पदपाठः)

शतम्। जीव। शरदः। वर्धमानः। शतं हेमन्तान्। शतम्। ऊम् इति। वसन्तान्॥
शतम्। इन्द्राग्नी इति। सविता। बृहस्पतिः। शतऽआयुषा। हविषा। इमम्।
पुनः। दुः॥

(अन्वयः)

वर्धमानः शतं शरदः जीव। शतं हेमन्तान् (जीव)। शतं वसन्तान् (जीव)। इन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषा इमं पुनर्दुः॥

The seer of this mantra is Yakshmanāśana, son of Prajāpati; this poetic form is Trishṭup; and the deities invoked are Indra and Agni.

(Sāyaṇa)

हे यक्ष्माद्विमुक्त। वर्धमानः अहरहः अभिवृद्धिं प्राप्नुवन्। त्वम्। शतं शरदः शतसंख्याकान् शरदृतून्। जीव प्राणान् धारय। शतं हेमन्तान् हेमन्तर्तूंश्च। जीव। शतं वसन्तांश्च। उशब्दः समुच्चये। अपि च । इन्द्राग्नी इन्द्रश्च अग्निश्च। सविता प्रेरको देवश्च। बृहस्पतिः बृहतां देवानां पालयिता देवश्च।

(Dinakara)

हे राजयक्ष्माद्विमुक्त वर्धमानः अहरहः वृद्धिं प्राप्नुवन् त्वं (शतं) शरदः शरदृतून् जीव। शतं हेमन्तान् हेमन्तान् हेमन्तऋतूंश्च जीव। शतं वसन्तान्। उशब्दः समुच्चये। अपि च (इन्द्राग्नी) इन्द्रश्चाग्निश्च सविता प्रेरको देवश्च बृहस्पतिः बृहतां देवानां पालयिता देवश्च शतायुषा शतसंवत्सरपरिमितस्य आयुषः हेतुभूतेन हविषा तर्प्यमाणाः सन्तः इमं जनं पुनः दुः पुनरस्मभ्यं प्रादुः॥१९५॥

One must live for a hundred autumns (jīva śatam śaradah), growing in health and happiness day after day (vardhamānah); he must live for a hundred winters (śam hemantān), and for a hundred springs (śatam vasantān). May Indra, Agni, Savitṛ and Bṛhaspati be pleased with the offerings (havishā) and grant him a life-span of a hundred years (śatāyushā imam punarduh).

NOTES

1. 'śatam' means only long life, *Nirukta* (Pariśishṭa, 14, 36).

शतं जीव शरदो वर्धमान इत्यपि निगमो भवति शतमिति शतं दीर्घमायुर्मरुत एना वर्धयन्ति। शतमेनमेव शतात्मानं भवति शतमनन्तं भवति शतमैश्वर्यं भवति शतमिति शतं दीर्घमायुः॥

2. Sāyaṇa takes this mantra as addressed to the person who has been cured of the disease (हे यक्ष्माद्विमुक्त।). But there seems little justification for this supposition.



(196)

ऋषिः यक्ष्मनाशनः प्राजापत्यः।
छन्दः अनुष्टुप्।
देवता इन्द्रः ॥

(संहितापाठः)

आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव।
सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥१९६॥
(१०.१६१.५)

(पदपाठः)

आ। अहार्षम्। त्वा। अविदम्। त्वा। पुनः। आ। अगाः। पुनःऽनव।
सर्वऽअङ्ग। सर्वम्। ते। चक्षुः। सर्वम्। आयुः। च। ते। अविदम् ॥

(अन्वयः)

त्वा आहार्षं त्वा अविदम्। पुनर्नव पुनः आगाः। सर्वाङ्ग, ते सर्वं चक्षुः अविदम्।
ते आयुः च सर्वं अविदम्।

The seer of the mantra is Yakshma-nāśana, son of Prajāpati; the poetic form is Anushṭup; and the deity is Indra.

(Sāyaṇa)

हे व्याधिगृहीत। त्वा त्वाम्। आहार्षम्। मृत्योः सकाशाद् आहृतवानस्मि। अत एव। त्वा त्वाम्। अविदं अलप्सि। हे पुनर्नव पुनरभिनव। पुनरागाः पुनः अस्मत्समीपं आगच्छ। हे सर्वाङ्ग सर्वैः अविकलैः

अङ्गैरुपेत। ते तव। सर्वंचक्षुः। उपलक्षणमेतत्। इन्द्रियवर्गं सकलमिदम्। लब्धवानस्मि। ते तव। आयुः जीवनम्। च। सर्वं सम्पूर्णम्। अविदम्॥

(Dinakara)

हे व्याधिगृहीत त्वा त्वाम् आहार्षं मृत्योः सकाशात् आहृतवानस्मि। अत एव त्वा त्वाम् अविदम् अलप्सि। हे पुनर्नव पुनरभिनव पुनरागाः पुनरस्मत्समीपमागच्छ। हे सर्वाङ्ग सर्वैरङ्गैरुपेत ते सर्वं चक्षुः। उपलक्षणमेतत्। इन्द्रियवर्गं सकलमपि (अविदम्) लब्धवानस्मि। तेन च आयुः जीवितं सम्पूर्णमविदम् ॥१९६॥

I have brought you back to life (tvā ahārsham) and I have got you (avidam). You are now a new man (punarnava), and come anew (punarāgāh). You are now complete in your limbs (sarvāṅga), and I have got you total vision (te sarvam chakshuh avidam) and I have secured your full life-span too (āyuh cha sarvam avidam).

(197)

ऋषिः ध्रुवः आङ्गिरसः ।
छन्दः अनुष्टुप् ।
देवता राज्ञः स्तुतिः ॥

(संहितापाठः)

आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥१९७॥
(१०.१७३.१)

(पदपाठः)

आ । त्वा । अहार्षम् । अन्तः । एधि । ध्रुवः । तिष्ठ । अविऽचाचलिः ॥
विशः । त्वा । सर्वाः । वाञ्छन्तु । मा । त्वत् । राष्ट्रम् । अधि । भ्रशत् ॥

(अन्वयः)

त्वा आ अहार्षम् । अन्तः एधि । ध्रुवः अविचाचलिः तिष्ठ । सर्वा विशः त्वा वाञ्छन्तु ।
त्वत् राष्ट्रं मा अधि भ्रशत् ॥

The seer of the mantra is Dhruva, son of the Angiras lineage; the poetic form is Anushṭup; and the deity (viz. theme) is praise of the ruler.

(Sāyaṇa)

हे राजन्। त्वा त्वाम्। आ अहार्षम्। अस्मद्राष्ट्रस्य स्वामित्वेन अनैषम्। स त्वम्। अन्तः अस्मासु मध्ये। एधि स्वामी भव। ध्रुवः नित्यः सन्। अविचाचलीः अतिशयेन चलनरहितः एव सन्। तिष्ठ राष्ट्रमधितिष्ठ। सर्वाश्च विशः प्रजाः। त्वम्। वाञ्छन्तु अयमेवास्माकं राजाऽस्त्विति कामयन्तु। त्वत् त्वत्तः सकाशात् । राष्ट्रं राज्यम्। माधिभ्रशत् मा भ्रश्यतु वियुक्तं भवतु॥

(Dinakara)

हे राजन् त्वा त्वाम् आहार्षम् अस्य राष्ट्रस्य (स्वामित्वेनानैषम्। स त्वम् अन्तः अस्य मध्ये एधि स्वामी भव। ध्रुवः नित्यः सन् अविचाचलिः अतिशयेन चलनरहितः एव सन् तिष्ठ राष्ट्रमधितिष्ठ। सर्वाः विशः प्रजाः त्वां वाञ्छन्तु अयमेव सदास्माकं राजाऽस्त्विति कामयन्तु (वाञ्छि इच्छायाम्)। त्वत् त्वत्तः सकाशाद्राष्ट्रं राज्यं मा अधि भ्रशत् मा भ्रश्यतु मा वियुक्तं भवतु (भ्रन्शु अधःपतने) ॥१९७॥

We have well chosen you (tvā ā ahārsham) (for king); and prosper (edhi) among us (antah). Be constant and settled in your thoughts (dhruvah), and unshaken by aught (avichāchalih), abide firm (tishṭha). Let all people (sarvā viśah) long for you (vāñchantu tvā), and may the kingdom (rāshṭram) not fall away from you (tvat mā adhibhraśat).

(198)

ऋषिः ध्रुवः आङ्गिरसः ।
छन्दः अनुष्टुप् ।
देवता राज्ञः स्तुतिः ॥

(संहितापाठः)

इहैवैधि माप च्योष्ठाः पर्वतइवाविचाचलिः ।
इन्द्रइवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥१९८॥
(१०.१७३.२)

(पदपाठः)

इह । एव । एधि । मा । अप । च्योष्ठाः । पर्वतःऽइव । अविऽचाचलिः ॥
इन्द्रःऽइव । इह । ध्रुवः । तिष्ठ । इह । राष्ट्रम् । ऊम् इति । धारय ॥

(अन्वयः)

इह एव एधि । मा अप च्योष्ठाः । पर्वत इव अविचाचलिः । इन्द्र इव इह ध्रुवः तिष्ठ ।
इह राष्ट्रं उ धारय ॥

The seer of the mantra is Dhruva of Āngirasa lineage; the poetic form is Anushṭup; and the deity (viz. theme) is praise of the ruler.

(Sāyaṇa)

हे राजन्। इह अस्मिन्नेव राज्ये। एधि स्वामित्वेन सर्वदा वर्तमानो भव। मापच्योष्ठाः अपच्युतो मा भूः। मापगमः। पर्वत इव यथा पर्वतो नैश्चल्येन अवतिष्ठते एवम्। अविचाचलिः चलनरहितो भव। इन्द्र इव यथा स्वर्गे इन्द्रः। एवम्। इह लोके। त्वम्। ध्रुवस्तिष्ठ स्थिरो भव। राष्ट्रं उ राष्ट्रं चेह लोके। धारय स्वे स्वे कर्मण्यवस्थापय॥

(Dinakara)

हे राजन् इहास्मिन्नेव राज्ये एधि स्वामित्वेन सर्वदा वर्तमानो भव। मा अप च्योष्ठाः अपच्च्युतो मा भूः। पर्वत इव यथा पर्वतो निश्चलत्वेनावतिष्ठते एवम् अविचाचलिः चलनरहितो भव। इन्द्र इव यथा स्वर्गे इन्द्रः एवम् इह लोके त्वम् अवतिष्ठ स्थिरो भव। राष्ट्रमु राष्ट्रं च इह लोके धारय स्वे स्वे कर्मण्यवस्थापय॥१९८॥

Prosper here (iha eva edhi) and do not disregard your role (mā apa chyoshṭhāh). Be unshaken (āvichāchalih) like a mountain (parvata iva). Like Indra (indra iva) here (iha), stand firm and rule (dhruvah tishṭha). Preserve the kingdom in order (rāshṭram u dhāraya).

(199)

ऋषिः ध्रुवः आङ्गिरसः ।
छन्दः अनुष्टुप् ।
देवता राज्ञः स्तुतिः ।।

(संहितापाठः)

इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रवत् तस्मा उ ब्रह्मणस्पतिः ।।१९१।।
(१०.१७३.३)

(पदपाठः)

इमम् । इन्द्रः । अदीधरत् । ध्रुवम् । ध्रुवेण । हविषा ।।
तस्मै । सोमः । अधि । ब्रवत् । तस्मै । ऊम् इति । ब्रह्मणः । पतिः ।।

(अन्वयः)

ध्रुवेण हविषा इन्द्रः इमं ध्रुवं अदीधरत् । सोमः तस्मै अधि ब्रवत् । तस्मै उ ब्रह्मणस्पतिः ।।

The seer of the mantra is Dhruva, of Āngirasa lineage; the poetic form is Anushṭup; and the deity (viz. theme) is praise of the ruler.

(Sāyaṇa)

इमं अभिषिक्तम्। ध्रुवेण स्थिरेण। हविषा तर्प्यमाण इन्द्रः। ध्रुवं स्थिरम्। अदीधरत् धारयतु। सोमश्च। तस्मै राज्ञे। अधि ब्रवत् अधिब्रवीतु। मदीयः अयमिति पक्षपात वचनं करोतु। तस्मा उ तस्मा एव। ब्रह्मणस्पतिः मन्त्रस्य पालको देवः। च। अधि ब्रवीतु।।

(Dinakara)

इमम् अभिषिक्तं ध्रुवेण स्थिरेण हविषा तर्प्यमाणः इन्द्रः ध्रुवं स्थिरम् अदीधरत् धारयतु। सोमः तस्मै राज्ञे अधि ब्रवत् ब्रवीतु मदीयोऽयमिति पक्षपातवचनं करोतु तस्मा उ तस्मा एव ब्रह्मणस्पतिः मन्त्रस्य पालको देवश्च अधिब्रवीतु॥१९९॥

May Indra, pleased with his constant offerings (dhruveṇa havishā), settle him (the ruler, imam) firmly (dhruvam adīdharat). May Soma instruct him well (tasmai u adhibravat), and may also Brahmaṇaspati do likewise.



(200)

ऋषिः ध्रुवः आङ्गिरसः ।

छन्दः अनुष्टुप् ।

देवता राज्ञः स्तुतिः ॥

(संहितापाठः)

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ॥२००॥
(१०.१७३.४)

(पदपाठः)

ध्रुवा । द्यौः । ध्रुवा । पृथिवी । ध्रुवासः । पर्वताः । इमे ॥
ध्रुवम् । विश्वम् । इदम् । जगत् । ध्रुवः । राजा । विशाम् । अयम् ॥

(अन्वयः)

द्यौः ध्रुवा । पृथिवी ध्रुवा । इमे पर्वताः ध्रुवासः । विश्वं इदं जगत् ध्रुवम् ।
अयं विशां राजा ध्रुवः ॥

The seer of the mantra is Dhruva, of Āngirasa lineage; the poetical form is Anushṭup; and the deity (viz. theme) is praise of the ruler.

(Sāyaṇa)

द्यौः। ध्रुवा स्थिरा। भवति। पृथिवी च ध्रुवा स्थिरा। भवति। इमे दृश्यमानाः। पर्वता महीधराश्च। ध्रुवासः स्थिराः। इदं विश्वं सर्वं जगत्। ध्रुवं स्थिरम् भवति। एवं एव अयम्। विशानां प्रजानाम्। राजा स्वामी सन्। ध्रुवः स्थिरः भवतु॥

(Dinakara)

यथा द्यौः ध्रुवा स्थिरा भवति। पृथिवी (च) ध्रुवा स्थिरा भवति। इमे दृश्यमानाः पर्वताः महीधराश्च ध्रुवासः स्थिराः। इदं विश्वं सर्वं जगत् ध्रुवं स्थिरं भवति। एवमेव विशां प्रजानां राजा स्वामी सन् अयं ध्रुवः स्थिरो भवतु ॥२००॥

The heavenly realm (dyauh) above is firm (dhruvā); and so is the earth below (pṛthivī). These mountains here (parvatāh ime) are firm. This whole world is firm (viśvam idam jagat dhruvam). Likewise, firm be the ruler of people (ayam viśām rājā dhruvah).

(201)

ऋषिः ध्रुवः आङ्गिरसः।
छन्दः अनुष्टुप्।
देवता राज्ञः स्तुतिः॥

(संहितापाठः)

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥२०१॥
(१०.१७३.५)

(पदपाठः)

ध्रुवम्। ते। राजा। वरुणः। ध्रुवम्। देवः। बृहस्पतिः।
ध्रुवम्। ते। इन्द्रः। च। अग्निः। च। राष्ट्रम्। धारयताम्। ध्रुवम्॥

(अन्वयः)

ते राष्ट्रं राजा वरुणः ध्रुवं (धारयतु)। देवः बृहस्पतिः ध्रुवं (धारयतु)। इन्द्रः च अग्निः च ते राष्ट्रं ध्रुवं धारयताम्॥

The seer of the mantra is Dhruva, son of Āngirasa lineage; the poetical form is Anushṭup; and the deity (viz. theme) is praise of the ruler.

(Sāyaṇa)

हे राजन्। ते तव। राष्ट्रम्। राजा राजमानः। वरुणः। ध्रुवं स्थिरम्। धारयतु। देवः दानादिगुणयुक्तः। बृहस्पतिः। ध्रुवं। धारयतु। इन्द्रश्चाग्निश्च उभौ अपि। ते तव। राष्ट्रम्। ध्रुवं स्थिरम्। धारयताम्। इन्द्राग्न्योरुभयोरपेक्षया ध्रुवशब्दस्य द्विः प्रयोगः॥

(Dinakara)

हे राजन् ते तव राष्ट्रं राजा राजमानः ध्रुवं स्थिरं वरुणः। ध्रुवं देवः बृहस्पतिः। ध्रुवम् इन्द्रः च ध्रुवम् अग्निश्च ध्रुवं ते धारयताम्॥२०१॥

इति श्रीमन्नारायणभट्टात्मज रामकृष्ण भट्टसुत दिनकरभट्टकृते मन्त्रविभागान्तर्गत ऋगर्थसारे अष्टमाष्टकान्तर्गत ऋग्व्याख्या समाप्ता॥

May the resplendent (rājā) Varuṇa, the luminous (devo) Bṛhaspati, Indra and Agni preserve (dhārayatām) your kingdom (te rāshṭram) so that it is firm and prosperous (dhruvam).



APPENDIX

SARVA-ŚĀSTRĀRTHA-SANGRAHA

This work by Satyajñānānanda tīrtha (Seventeenth Century A.D.) seeks to summarize the teachings of the Vedic inquiry known as Pūrva-Mīmāmsā-śāstra. It is a preamble to a larger work called *Veda-prakāśa.* Veda is what illumines the essential aspects of life for man (sarvārtha-prakāśaka) and helps him accomplish the major goals of human life (purushārtha-sampādaka). For Mīmāmsakas, the Vedic corpus is the supreme authority among scriptures and the śāstra is an inquiry into the authoritative character of this corpus. The significance of the Veda consists in the Dharma that it expounds. Dharma is in fact the purport of the Veda (vedārtha). The present work by Satyajñānānanda-tīrtha examines this ideology in the traditional context. It takes the standpoint crystallized by Jaimini, Śabarasvāmin and Kumārila-bhaṭṭa, and it closely follows the lines adopted by Pārthasārathi - miśra in his *Śāstra-dīpikā.* Further, the work seems to be a digest of *Mīmāmsā-sāra-sangraha* of Śamkara-bhaṭṭa, which in turn follows Āpadeva's *Nyāya-prakāśa.* The present work is an excellent introduction for the students of Mīmāmsā.

The author introduces himself as the student of Sachchidānanda-tīrtha, who was himself the very incarnation of the goddess of learning. Otherwise, not much is known about the author or his teacher. From the work on

hand, it can be seen that he was a profound scholar, well-versed in all the extensive literature of Pūrva-mīmāmsā, and also a discerning critic, especially in his brilliant survey of Vidhi and Bhavanā. The short manual not only introduces us to the different dimensions of the Pūrva-Mīmāmsā discipline, but provides an insight into the topics discussed in it.

What follows is the preliminary portion of the first section of work which is rightly described as Śāstrārtha-samgraha (prakaraṇa).



श्री गणेशाय नंः ।
सत्यज्ञानानन्दतीर्थकृतः
सर्वशास्त्रार्थसंग्रहः ॥
(वेदप्रकाशः)

सत्यज्ञानानन्दतीर्थं प्राप्तोऽहं यत्प्रसादतः ।
तं गुरं सच्चिदानन्दं वन्दे वेदं विधिं विभुम् ॥१॥

वेदस्यैव सर्वार्थप्रकाशकत्वेन सर्वपुरुषार्थसम्पादकत्वात्तदध्ययनादौ द्विजातीनां प्रवृत्तर्थं स्वाभीष्टसिद्धये च तमेव नमस्कारव्याजेनाऽऽचार्यमूर्तिस्यं स्तौति –

सत्यज्ञानेत्यादिना । यस्य प्रसादादहं मन्दोऽपि सत्यज्ञानादिपदघटितं परमार्थप्रकाशकमन्वर्थनामधेयं प्राप्तोऽस्मि, तं गुरुं तत्वोपदेष्टारं वन्दे सर्वावस्थास्वभिवादय इत्यर्थः । गुर्वादिपूजाभिवादनशील्य सदा विजय इत्यभिप्रायः। किं लक्षणम्? वेदयति प्रकाशयति स्थावरजङ्गमात्मकं सर्वमिति वेदः सर्वज्ञः सर्वशक्तिः, तं वेदम्, अत एव विधिं सर्वप्रवर्तकं सर्वान्तर्यामिणम्, अत एव विभुं व्यापकम्, सर्वात्मकमिति यावत् । अत एव सच्चिदानन्दं अनृतजडदुःखविलक्षणमित्यर्थः ।

पुनरपि सरस्वत्यात्मानं तं स्तौति -

सुस्फोटवर्णपदवाक्यविभक्तिकायां
ब्रह्मादिदेवमुनिवन्दितपादपद्माम् ।
गाङ्गेन्दुकुन्दधवलां करमञ्जुवीणां
वाणीं परां भगवतीं प्रणमामि नित्याम् ॥२॥

स्फुटत्यस्मादर्थ इति स्फोटः सर्वार्थप्रकाशकः, वर्णा लौकिका वैदिकाश्च त्रिषष्टिश्चतुष्षष्टिर्वा । तत्र लौकिका गौरश्वः पुरुषो हस्तीत्यादयः । वैदिकास्तु 'अग्निमीळे पुरोहितम्', 'इषे त्वोर्जेत्वा', 'अग्न आयाहि वीतये', 'शन्नो देवीरभीष्टय' इत्यादयः । पदानि वर्णघटितानि सुप्तिङन्तानि, तद्रहितान्यपि च तु नेत्यादीनि, तद्घटितानि वाक्यानि पदसमूहात्मकानि, विभक्तयः सु औ जसित्यादयः, अथ वा

विभक्तयो विभागाः शक्तयः शब्दानिष्ठतत्तदर्थप्रकाशनसामर्थ्यानि औत्पत्तिकान्यचिन्त्यानि कार्यैकलिङ्गगम्यानि, शोभना उक्तस्फोटादयः तैरुपलक्षितः कायो यस्यास्तां वाणीं प्रकृष्टया भक्त्या नमामि। शेषं सुलभम् ।

अथ तमेव पुनर्ब्रह्मात्मना स्तुवन् प्रणमति –

दुर्बोधमतिगम्भीरं अगाह्यमकृतात्मनाम् ।
अनन्तशक्तिसम्पन्नं शब्दब्रह्म नमाम्यहम् ॥३॥

येषां सतां सुपदवीमनुनीय नूनं नानानिबन्धकरणे कुशलोऽहमस्मि । तानानमामि ननु नौमि हरं हरिं मां काशीं शिवां शिवसुतं द्युमणिं च गङ्गाम्॥

नत्वा श्रीजैमिनिं भट्टान् शबरस्वामिनं मुनिम् ।
वेदप्रकाशं कुर्वेऽहं स्वशिष्यमतिशुद्धये ॥५॥

शास्त्रार्थसंग्रहं चाऽऽदौ द्वितीये विधिभेदनम् ।
द्विविधां भावनां वक्ष्ये तृतीये विशदां सतीम् ॥६॥

क्व दुग्धसागरो वेदः क्वाऽहमल्पबलो लघुः ।
हास्यास्पदं गमिष्यामि धूर्तानां न महात्मनाम् ॥७॥

अथाऽप्यस्य गमिष्यामि पारं मारुतसूनुवत्
रामभक्तिं तरिं कृत्वा भवार्णवविलङ्घिनीम् ॥८॥

इह खलु 'स्वाध्यायोऽध्येतव्य' इति नित्याध्ययनविधिना विधिवदधीतसाङ्गस्वाध्यायं निष्पापं द्विजातिमापाततोऽधिगतवेदार्थं निस्सन्दिग्धतया वेदबोधितधर्मानुष्ठानार्थं तं जिज्ञासुमुपलभमानो भगवान् जैमिनिराचार्यः सर्वशास्त्रोपाद्घातरूपं बह्वर्थमतिगम्भीरं इदं सूत्रमादौ स्फुटमुच्चारयामास – 'अथाऽतो धर्मजिज्ञासे'ति ।

अत्राऽथशब्द आनन्तर्यार्थः । अतःशब्दो हेत्वर्थः । ज्ञातुमिच्छा जिज्ञासा । धर्माय जिज्ञासा धर्मजिज्ञासा । अत्र धर्मानुष्ठानपर्यवसायि धर्मज्ञानं विवक्षितम्, न हि केवलं धर्मज्ञानमात्रं पुरुषार्थपर्यवसायि भवितुमर्हति, येन तावतैव कृतार्थस्स्यात्, किन्तु धर्मानुष्ठानद्वारा । तथेच्छाशब्देन विचारो विवक्षितः, *शास्त्रस्य विचारात्मकत्वात् ।*

धर्मशब्दन कृत्स्नो वेदार्थो विवक्षितः निषेधवाक्यार्थाधर्मस्याऽपि प्रतिपिपादयिषितत्वाद्धानाय । तथा चाऽयं सूत्रार्थस्सम्पन्नः – वेदाध्ययनानन्तरं वेदाध्ययनस्य तदर्थज्ञानाङ्गत्वात्, ज्ञानस्य च धर्मानुष्ठानहेतुत्वात् तस्य च साक्षात्पुरुषार्थहेतुत्वात् तदर्थिभिर्धर्माधर्मज्ञानाय वेदार्थविचारः कर्तव्य इति । सा च *धर्मजिज्ञासा चतुर्विधा धर्मस्वरूपप्रमाणसाधनफलैः ।*

ननु अध्ययनविधिना वेदवाक्यार्थविचारमात्राक्षेपाद्धर्मस्वरूपप्रमाणजिज्ञासयोः कः प्रसङ्गः? उच्यते – उपाद्घातत्वात्प्रसङ्गः । यदि हि वेदवाक्यार्थो धर्मः प्रयोजनवान् स्यात्, वेदश्च तत्र प्रमाणम्, तदाऽसौ विचारः कर्तव्यो भवति । इतरथा काकदन्तपरीक्षावत्स्यात् । तस्मादध्ययनविधिरेव प्रमाणादिविचारमप्याक्षिपति ज्ञानार्थमध्ययनं विदधत् । एतेन शास्त्रस्य वेदार्थविचारपरत्वात् अथाऽतो वेदार्थजिज्ञासेति सूत्रं युक्तं तद्विचारेण धर्मोऽपि विचारितस्स्यादिति शङ्का परास्ता। धर्मस्यैव साक्षात्पुरुषार्थहेतुत्वेन मुख्यवेदार्थत्वात् । यद्यपि धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्थास्सेव्यत्वेन प्रसिद्धाः, तथाऽपि *काममोक्षयोरेव मुख्य पुरुषार्थत्वम्, सार्वजनीनोत्कटेच्छाविषयत्वात्,* इतरयोस्तु *तद्धेतुत्वाद्गौणम्* । तत्राऽपि मोक्षस्यैव उत्कृष्टता, नित्यत्वात् प्रेक्षावदिष्टत्वाच्च । एवं *गौणयोरपि धर्मस्यैवोत्कृष्टता साक्षान्मोक्षहेतुत्वात्, अर्थस्य तु धर्मद्वारेति विवेकः* । तथा चाऽनेन सूत्रेण प्रारीप्सितस्य शास्त्रस्य श्रेतृप्रवृत्त्यङ्गानुबन्धचतुष्टयर्थात्सूत्रितं भवति । तत्राऽथाऽतश्शब्दाभ्यामधिकारी सूचितः । धर्माजिज्ञासापदेन विषयप्रयोजने, तत्प्रतिपादकत्वाच्छास्त्रस्य प्रतिपाद्यप्रतिपादकसम्बन्धश्च सूचित इति बोध्यम् ।

अत्रेदं चिन्त्यते – किमध्ययनानन्तरं धर्माजिज्ञासया गुरुगृहेऽवस्थातव्यम् ? उत गुरुगृहात्समावर्तितव्यमिति ? किञ्चाऽतः ? यदि स्वाध्यायाध्ययनविधिना धर्ममात्रमध्ययनं स्वर्गाय विधीयते ततस्तन्मात्रेणैव शास्त्रार्थस्य समाप्तत्वा ''दधीत्य स्नाया''दिति स्मृतिबलेन समावर्तितव्यम् । अथ त्वक्षरादिग्रहणपरम्परोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते ततस्तस्य

विचारमन्तरेणाऽसम्भवादध्ययनविधिनैवाऽर्थाद्विचारोऽपि विहित इति गुरुगृह एवाऽवस्थाय धर्मो विचारयितव्यः ।

तत्र 'चोदनालक्षणोऽर्थो धर्म' इत्यारभ्य 'अन्वाहार्ये च दर्शनादि' त्येतदन्तं जैमिनिप्रोक्तं सूत्रजातं धर्मविचारशास्त्रम्, तदेतस्य प्रथमाधिकरणस्य विषयः ।

तत्रैवं संशयः – किमिदं शास्त्रं विधिप्रयुक्त्याऽनारम्भणीयम् ? उतारम्भणीयम् ? इति ।

तत्र (पूर्वपक्षे) नाऽऽरम्भणीयमिति तावत्प्राप्तम् । कुतः?

'विनाऽपि विधिना दृष्टलाभान्न हि तदर्थता ।
कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्'

इति स्वाध्यायसंस्कारद्वारेणाऽध्ययनस्याऽर्थज्ञानहेतुत्वं विनैव विधिना प्रमाणान्तरेण सिद्धमिति तादर्थ्ये विध्यानर्थक्यमिति प्राप्ते –

अभिधीयते (सिद्धान्तः) – यथा दर्शपूर्णमासजन्यं परमापूर्वं अवघातनियमजन्यस्यस्वावान्तरा-पूर्वस्य कल्पकम्, तथाऽशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाधनाध्ययननियमजन्यस्याऽपूर्वस्य कल्पकं भविष्यति । नियमादृष्टानङ्गीकारे च श्रूयमाणो विधिरनर्थकः स्यात् । न च विश्वजिन्न्यायेन (पू.मी.४.६.७) स्वर्गार्थत्वं युक्तम्, दृष्टफलेऽर्थज्ञाने सम्भवति अदृष्टस्य कल्पयितुमशक्यत्वात् । अत एवोक्तम् –

'लभ्यमाने फले दृष्टे नाऽदृष्टपरिकल्पना ।
विधेस्तु नियमार्थत्वान्नाऽऽनर्थक्यं भविष्यती' ति पार्थसारथिमिश्रैः शास्त्रदीपिकायाम् ।

अतो विचारो वैधः । तस्माद्विधिवशादेव विचारशास्त्रमारम्भणीयमिति स्थितम् । अत्र श्रीशबरं भाष्यम् (जैमिनीये) – ''वेदमधीत्य न त्वरितेन स्नातव्यम् । अनन्तरं धर्मो जिज्ञासितव्य इत्यथशब्दार्थः। अतश्शब्दो वृत्तस्याऽपदेशको हेत्वर्थः । यथाक्षेमसुभिक्षोऽयं देशोऽतोऽहमस्मिन् देशे वसामीति । एवमधीतो वेदो धर्मजिज्ञासाया हेतुर्ज्ञातः, अनन्तरं धर्मो जिज्ञासितव्य इत्यतश्शब्दस्य सामर्थ्यम् ।

धर्माय हि वेदवाक्यानि विचारयितुमनधीतवेदो न शक्नुयात्, अत एतस्मात्कारणादनन्तरं धर्मं जिज्ञासितुमिच्छेदित्यतश्शब्दस्याऽर्थः ।

धर्माय जिज्ञासा धर्मजिज्ञासा । सा हि तस्य ज्ञातुमिच्छा, स कथं जिज्ञासितव्यः? को धर्मः? कथं लक्षणकः ? कान्यस्य साधनानि ? कानि साधनाभासानि? किं परश्चेति ।

तत्र को धर्मः, कथं लक्षणक इत्येकेनैव सूत्रेण व्याख्यातम् - 'चोदनालक्षणोऽर्थो धर्म' इति। कान्यस्य साधनानि, कानि साधनाभासानीति (अवशिष्टैरध्यायैः) शेषलक्षणेन व्याख्यातम् । क्व पुरुषपरत्वं क्व वा पुरुषो गुणभूत इति चैतासां प्रतिज्ञानां पिण्डस्यैतत्सूत्रम् – 'अथाऽतो धर्मजिज्ञासे'ति''। तत्सिद्धं वेदाध्ययनानन्तरं समावर्तनात्प्राक् धर्मस्य प्रमाणस्वरूपफलसाधनैः क्रमेण प्रथमद्वितीयषष्ठतदितरविषयैर्जिज्ञासा कर्तव्येति ।

अथ धर्मः प्रसिद्धो वा स्यादप्रसिद्धो वा? आद्ये न जिज्ञास्यः, द्वितीये नतराम् । तदेतदनर्थकं धर्मजिज्ञासाप्रकरणमिति । अत्रोच्यते - विधिवदधीतसाङ्गस्वाध्यायस्याऽऽपाततोऽर्थज्ञानसम्भवेऽपि निर्णयस्य विचाराधीनत्वात् आपातप्रसिध्या धर्मस्य विषयत्वसंभवात् नाऽनर्थकमिति । प्रथमं तावत्को धर्मः, किं लक्षणक इति धर्मस्वरूपप्रमाणप्रतिपादनपरमिदं सूत्रम् – 'चोदनालक्षणोऽर्थो धर्म' इति।

तदिह धर्मं विषयीकृत्य चिन्त्यते – किमस्य न किञ्चित्प्रमाणमस्ति ? किं वा प्रत्यक्षादिकमेव प्रमाणम्? उत चोदनैव? अथवा विकल्पः ? अथ वा समुच्चयः ? इति ।

तत्र (पूर्वपक्षः) शब्दस्य प्रमाणान्तरप्राप्तप्रायकत्वेन स्वयमप्रमाणत्वात् प्रत्यक्षादीनां चाऽसामर्थ्यादप्रमाणको धर्म इत्येकः पक्षः । प्रत्यक्षादिगम्य एवेत्येकः पक्षः । योगिनां प्रत्यक्षगम्यः, अर्वाचीनानां तु चोदनागम्य इत्यपरः । जगद्वैचित्र्यार्थापत्या किमप्यदृष्टमस्तीति सामान्येन प्रसिद्धो धर्मश्चोदनयाऽग्निहोत्रादिविशेषरूपेण गम्यते, तस्मात्समुच्चय इति पक्षान्तरम् ।

चोदनैव प्रमाणं, सा च प्रमाणमेवेति नाऽप्रमाणकत्वमिति सिद्धान्तः । तदिह चोदनैव प्रमाणमेवेत्यवधारणद्वयं प्रतिज्ञायते । तथा च यो धर्मस्स चोदनालक्षणः, चोदनैव तस्य लक्षणं प्रमाणम्, चचोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधौ अर्थाच्चोदनागम्य एवाऽग्निहोत्रादिर्धर्मो

नाऽतल्लक्षणश्चैत्यवन्दनादिरिति स्वरूपमपि सिध्यति । तथा यश्चोदनालक्षणः स धर्म इति स्वरूपविधौ अर्थात्प्रमाणसिद्धिर्वेदितव्या । कश्चिदेवं प्रलपति – कार्यरूपो वेदार्थो न सिद्धस्वरूप इत्यनेन सूत्रेणोच्यते । चोदनालक्षणशब्देन कार्यमुच्यते धर्मशब्देन वेदार्थ इति (प्राभाकराः) ।

अथ मन्दबुध्यनुग्रहार्थं सूत्रपदानि स्फुटं व्याख्यास्यामः । 'चोदनालक्षणोऽर्थो धर्म' इति लक्षणसूत्रम् । तत्र चोदना नाम विधिघटितं वाक्यम्, 'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरि'ति शाबरात्, 'चोदना चोपदेशश्च विधिश्चैकार्थवाचिन' इति भाट्टाच्च (Śloka-vārtika, 5,11)। लक्ष्यते प्रमीयतेऽनेनेति लक्षणं प्रमाणम् । अर्थ्यत इत्यर्थः प्रयोजनवानिति यावत् । चोदनैव लक्षणं प्रमाणं यस्मिन् तादृशोऽर्थो धर्मः । धारणात् स्वानुष्ठातुरभीष्टसंयोजनेन प्रतिष्ठापनाद्धर्मः । अभीष्टं नाम सुखं दुःखनिवृत्तिर्वा । तदर्थमेव सर्वेषां प्राणिनां प्रवृत्तिदर्शनात् । तच्चाऽत्र स्वर्गपदवाच्यम् –

'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमि'ति वचनात् ।

यत्सुखम्, न दुःखेन सम्भिन्नम् - दुःखमिश्रं न भवति, न च ग्रस्तम्-शत्रुकृतापहारादिशङ्कारहितम्, अनन्तरम् - अविच्छिन्नं सन्ततं वर्षादियावत्कालभोग्यम्, अभिलाषोपनीतम् - प्रयत्नानपेक्षाभिलाषमात्रोपनीतविषयम्, तत्सुखं स्वःपदास्पदम् - स्वर्ग पदवाच्यं भवतीत्यर्थः । अत्र विशेषणचतुष्टयेन सांसारिकसुखवैलक्षण्यं प्रदर्शितमिति बोध्यम्।

न च लक्षणं नाम लक्ष्यपरिच्छेदकस्तद्गतासाधारणो धर्मः कश्चिल्लोकप्रसिद्ध आकारः । तेन लक्ष्ये वस्तुनि सम्भावनाज्ञाने जाते तन्निर्णेतुमुद्युक्तः प्रमाणेन तदवगच्छतीति सुप्रसिद्धम् । तद्यथा - कश्चिद्गां जिज्ञासुः सास्नादिमती गौरित्याप्तादुपश्रुत्य चतुष्पाज्जीवेषु तल्लक्षणलक्षितां व्यक्तिमन्विष्येयं गौरिति चक्षुषाऽवगच्छति । न हि कश्चिद्धर्मे आकारोऽस्ति, अलौकिकत्वाद्रूपादिहीनत्वाच्चेति कथं जिज्ञास्य इति वाच्यम् । मा भूच्चक्षुरादिगम्य आकारः, चोदनागम्यः स्वर्गफलसाधनत्वादिलक्षणस्तु वेदप्रसिद्धोऽस्त्येवेति उक्तदोषानवसरात् । अर्थो धर्म इत्युक्ते ब्रह्मणि चैत्यवन्दनादौ घटादौ चाऽतिव्याप्तिः, तद्यवच्छेदाय चोदनागम्य इत्युक्तम् । तावत्येवोक्ते चोदनागम्येऽपि फलतोऽनर्थरूपे श्येनाद्यभिचारकर्मणि अतिव्याप्तिः, तत्परिहारार्थं अर्थ इत्युक्तम् । तथा चाऽर्थत्वे सति चोदनागम्यत्वमिति लक्षणं भवतीति (प्रभाकराः) यथाश्रुतग्राहिणः ।

अन्ये तु चोदनाशब्देन प्रवर्तकं निवर्तकं च वाक्यमुच्यते । ततश्च निषेधवाक्यैः 'न हिंस्यात्सर्वा भूतानी' त्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात् । तद्व्यावृत्त्यर्थमर्थपदं यदेवाऽर्थरूपं प्रवर्तकवाक्ये लक्ष्यते तस्यैव धर्मत्वमित्यर्थकम् । भाष्ये श्येनादिग्रहणं तु तत्साध्यहिंसापरमिति । युक्तं चैतत् – श्येनस्य विहितत्वेन तत्र धर्मस्यैवोचि तत्वात् । न च 'न हिंस्यादि'ति श्येने प्रवर्तते, तस्य हिंसाविषयत्वात् । श्येनस्य चाऽहिंसात्वात् । अत एव 'यो हिंसितुमिच्छेत्तस्याऽयमभ्युपाय' इति भाष्यं श्येनफलस्यैव हिंसात्वपरं सङ्गच्छते ।

न च तस्य धर्मत्वे शिष्टानां तत्र प्रवृत्त्यापत्तिः, तेषां तत्फलेच्छाभावात् । श्येनानुष्ठायिषु अधार्मिकत्वव्यवहारस्य फलमादायैवोपपत्तेश्च । अत्रेदं बोध्यम् - श्रेयस्साधनत्वेन वेदबोधितत्वं धर्मत्वम्। अनिष्टसाधनत्वेन वेदबोधितत्वमधर्मत्वम् । अस्ति चेदं यागादौ हिंसादौ च । प्रवर्तनाविषयभावनाविषये इष्टसाधनत्वस्य, निवर्तनाविषयभावनाविषयेऽनिष्टसाधनत्वस्य सत्वात् प्रवर्तनानिवर्तनान्यथानुपपत्त्या तत्कल्पनात् । अत एव च नाऽपूर्वे धर्माधर्मशब्दवाच्यत्वमस्माकं मते, तस्य शक्तिरूपत्वेने ष्टानिष्टसाधनत्वाभावात् । यस्य हि शक्तिस्तत्साधनम्, न तु सैव तत् । अत एव यो यागमनुतिष्ठति तं धार्मिकमाचक्षते । अदृष्टे तच्छब्दप्रयोगस्तु शक्तिशक्तिमतोरभेदाल्लक्षणया बोध्यः । न च विनिगमनाविरहः 'धर्म चरे' त्यादिवैदिकप्रयोगस्यैव विनिगमकत्वात् । पूर्वसूत्रेऽधर्मविचारस्याऽपि प्रतिज्ञातत्वेन तल्लक्षणावश्यकत्वादकारप्रश्लेषेणाऽधर्मलक्षणमपि सूत्रेण क्रियत इति ।

अत्र च यद्यपि 'अग्नीषोमीयं पशुमालभेते' त्यादिविशेषविधिगोचरत्वात्क्रत्वङ्गहिंसाया 'न हिंस्यात्सर्वा भूतानी'ति सामान्यनिषेधस्य तदितरपरत्वमिति सर्वाचार्यासम्मतम्, तथाऽप्यस्ति कश्चन विशेषः। तथा हि : 'चोदनालक्षणोऽर्थो धर्म' इत्यत्राऽर्थपदव्यावृत्त्यर्थत्वेनाऽधर्मत्वं श्येनादेः प्राभाकरमते। भाट्टमते तु श्येनफलस्यैवाऽभिचारस्याऽनर्थहेतुत्वादधर्मत्वम्, तु कलञ्जभक्षणादेर्निषिद्धस्यैवेति । तार्किकाणां तु मते कृतिसाध्यत्वमर्थहेतुत्वमनर्थहेतुत्वं चेति त्रयं विध्यर्थः । तत्र क्रत्वर्थहिंसायां साक्षान्निषेधाभावात्प्रायश्चितानुपदेशाच्च कृतिसाध्यत्वार्थहेतुत्ववदनर्थहेतुत्वमपि विधिना बोध्यत इति न तस्या अनर्थहेतुत्वम्, श्येनादेस्त्वभिचारस्य साक्षादेव निषेधात्प्रायश्चितोपदेशाच्चाऽनर्थहेतुत्वमिति । औपनिषदैस्तु भाट्टमेव दर्शनं व्यवहारे प्रायोणाऽवलम्बितमिति दिक् । तत्सिद्धं चोदनालक्षणोऽर्थो धर्म इति ।

वेदः पञ्चविधो ज्ञेयो विधिमुख्योऽनपेक्षकः ।
फलवान् बोधको नित्योऽपूर्वार्थस्यैव निर्मलः ॥

वेदयति प्रकाशयति सर्वं क्रियाकारकफलात्मकमिति वेदः मन्त्रब्राह्मणात्म को नारायणाख्यस्य परमात्मन आज्ञाशक्तिः । अत एव स्वतन्त्रो निर्दोषत्वादिगुणसम्पन्नश्च । स च पुनर्विधिनिषेधार्थवादमन्त्र-नामधेयात्मकः पञ्चप्रकारः ।

तत्र विधिरनधिगतप्रयोजनवदर्थविधानेनाऽर्थवान् । यथा – 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इति अप्राप्तप्रयोजनवद्धोमं विधत्ते – अग्निहोत्रहोमेन स्वर्गं भावयेदिति ।

यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते । यथा – 'दध्ना जुहुयादि'त्यत्र होमस्य 'अग्निहोत्रं जुहुयादि' त्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानम् – दध्ना होमं भावयोदिति।

यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते, तदुक्तम् – 'न चेदन्येन शिष्टा' इति । शिष्टा उपदिष्टा इत्यर्थः । यथा – 'सोमेन यजेते' त्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम् - सोमवता योगेनेष्टं भावयेदिति । विधिरेव मुख्यः प्रधानं यस्यं स विधिमुख्यः । तत्सिद्धम् - अप्राप्तं प्रयोजनवन्तमर्थं विधत्ते विधिरिति । तं च पुनर्विस्तरेण द्वितीयप्रकरणे प्रतिपादयिष्यामः ।

अनर्थहेतुकर्मणस्सकाशात्पुरुषस्य निवृत्तिकरत्वेन निषेधानामपि पुरुषार्थानुबन्धित्वम् । तथा हि-यथा विधयः प्रवर्तनामभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयस्साधनत्वमाक्षिपन्तः पुरुषं तत्र प्रवर्तयन्ति, एवं 'न कलञ्ञं भक्षयेत्', 'ब्राह्मणो न हन्तव्यः', 'न सुरांपिबेत्' इत्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिवर्तकत्वनिर्वाहार्थं निषिद्धस्य कलञ्ञभक्षणादेरनर्थहेतुत्वमाक्षिपन्तः पुरुषं ततो निवर्तयन्तीति स्थितम् ।

यथा विध्यादीनामध्ययनविध्युपात्तानां नाऽनर्थक्यम्, एवमर्थवादानामपि तदुपात्तत्वेनाऽऽ-नर्थक्यानुपपत्तेः, स्वार्थप्रतिपादने च प्रयोजनाभावात्, लक्षणया प्रयोजनवदर्थपर्यवसानं वक्तव्यम् । ते चाऽर्थवादा द्विविधाः – विधिशेषा निषेधशेषाश्च । तत्र 'वायव्यं श्वेतमालभेते'त्यादिविधिशेषाणां 'वायुर्वै

क्षेपिष्ठा देवते'[१] त्यादीनामर्थवादानां विधेयार्थस्तावकतयाऽर्थवत्वम् । 'बर्हिषि रजतं न देय' मित्यादिनिषेधशेषणां 'सोऽरोदी'[२] दित्यादीनामर्थवादानां तु निषेध्यनिन्दकतयेति । अतश्च लक्षणया प्राशस्त्यमर्थवादैर्बोध्यते। तच्च प्राशस्त्यज्ञानं शब्दभावनायामितिकर्तव्यतात्वेन सम्बध्यते ।

एवं मन्त्राणामपि प्रयोगसमवेतार्थस्मारकतयाऽर्थवत्वम्, न तु तदुच्चारणमदृष्टार्थम्, दृष्टे सम्भवत्यदृष्टस्याऽन्याय्यत्वात् । न च दृष्टस्य प्रकारान्तरेणाऽपि सम्भवात् मन्त्राम्नानमनर्थकम्, मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात् । अतो युक्तं 'इषे त्वोर्जे त्वा', 'उरु प्रथस्वे' त्यादिमन्त्राणां प्रयोगसमवेतार्थस्मारकतयाऽर्थवत्वम् । तत्र ये मन्त्रा यत्र पठितास्तेषां तत्र यद्यर्थप्रकाशनं प्रयोजनं सम्भवति तदा तत्रैव विनियोगः । येषा तु न सम्भवति तेषां यत्र सम्भवति तत्रोत्कर्षः । यथा पूषानुमन्त्रणमन्त्राणामित्युक्तम्[३] । येषां क्वाऽपि न सम्भवति तदुच्चारणस्य त्वगत्याऽदृष्टार्थत्वम्, सर्वथाऽपि तु तेषां नाऽऽनर्थक्यमिति ।

नामधेयानां विधेयार्थपरिच्छेदकतयाऽर्थवत्वम् । तथा हि – 'उद्भिदा यजेत पशुकाम' इत्यत्र हि उद्भिच्छब्दो यागनामधेयम् । तेन च विधेयार्थपरिच्छेदः क्रियते । अनेन हि वाक्येनाऽप्राप्तत्वात्फलोद्देशेन यागो विधीयते । यागसामान्यस्य चाऽविधेयत्वाद्यागविशेषो विधीयते । तत्र कोऽसौ विशेषः? इत्यपेक्षयामुदिद्भच्छब्दादुद्भिद्रूपो याग इति ज्ञायते, उद्भिदा यागेनेति सामानाधिकरण्येन नामधेयान्वयात्। तस्य च यजिना सामानाधिकरण्यं न नीलोत्पलादिशब्दवत् । तत्र हि उत्पलशब्दस्याऽर्थादुत्पलादन्यो नीलशब्दस्य वाच्योऽर्थोऽस्ति नीलगुणः । लक्षणया तु नीलशब्दस्य द्रव्यपरत्वेन सामानाधिकरण्यम्।

---

१. (तै. सं. २.१.१) 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयती' ति समग्रोऽर्थवादभागः । अस्याऽर्थः - वायुः क्षेपिष्ठाक्षिप्रगामिनी देवता । वैशब्दः प्रसिद्धौ । स्वेन भागधेयेन स्वसम्बान्धिना श्वेतपशुरूपेण हविषा यजमानस्तं यदि प्रीणयति, तर्हि सः वायुः, एनं यजमानं भूतिं प्रापयत्येवेति ।

२. (तै.सं.१.५.१) 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमि'ति वाक्यम् । अत्राऽयं पूर्वसन्दर्भः - पुरैकदा देवा असुरैस्सह युयुत्सवः, कदाचिदस्माकं पराजते जीवनार्थमिदं भविष्यतीति मन्वानाः स्वनिकटस्थममूल्यं वस्तुजातमग्नौ निधाय योद्धुमगच्छन् । तदवलोक्याऽयमग्निः लोभाकृष्टचेतास्तैर्वस्तुभिस्साकं प्लायाम्बभूव । युद्धे यजं प्राप्य प्रतिनिवृत्ता देवा अग्निमपश्यन्तस्तमन्विष्य क्वचिल्लब्ध्वा स्वीयानि वस्तूनि तत आच्छिन्दन् इति। एवं गृहीतधनस्सोऽग्निररोदीत् । यस्मादरुदत, तस्मातस्य रुद्रत्वमिति प्रकृतवाक्यार्थः ।

३. 'पूष्णोऽहं देवयज्यया पुष्टिमान् पशुमान् भूयासमि'ति पूषानुमन्त्रणमन्त्रः । तत्तद्यागीयहविःप्रक्षेपानन्तरं यजमानेन पठ्यमाना मन्त्रा अनुमन्त्रणमन्त्राः ।

उद्भिच्छब्दस्य तु यज्यवगतयागविशेषान्नाऽन्यो वाच्यार्थोऽस्ति, विशेषवाचित्वात्तस्य । अतश्चाऽर्थान्तरवाचित्वाभावेन न नामधेयस्य नीलशब्दवत्सामानाधिकरण्यम् । किं तर्हि ? 'वैश्वदेव्यामिक्षे' त्यत्राऽमिक्षाशब्दवत् । वैश्वदेवीशब्दस्य हि देबताताद्धितान्तत्वात्तद्धितस्य च 'साऽस्य देवते'ति सर्वनामार्थे स्मरणात्सर्वनाम्नां चोपस्थितविशेषवाचित्वेन विशेषपरत्वम् । तत्र कोऽसौ वैश्वदेवी शब्दोपात्तो विशेषः? इत्यपेक्षायां आमिक्षापदसान्निध्यादामिक्षारूपो विशेष इत्यवगम्यते । यथाऽऽहुः –

'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।
आमिक्षापदसान्निध्यात्तस्यैव विषयार्पण' मिति ।*

तथा –

'श्रुत्यैवोपपदस्याऽर्थस्सर्वनाम्ना प्रतीयते ।
तदर्थस्तद्धितेनैवं त्रयाणामेवाच्यते'ति ॥

तस्माद्यथा वैश्वदेवीशब्दोपात्ताविशेषसमर्पकत्वेनाऽऽमिक्षापदस्य वैश्वदेवीशब्देन सामानाधिकरण्यम् । एवं सामान्यस्याऽविधेयत्वात् यज्यवगतयागविशेषसमर्पकत्वेन नामधेयस्य यजिना सामानाधिकरण्यम् । तत्सिद्धं नामधेयानां विधेयार्थपरिच्छेदकतयाऽर्थवत्वम् । यथाऽऽहुः – 'तदधीनत्वाद्यागविशेषसिद्धेरि'ति ।

नामधेयत्वं च निमित्तचतुष्टयात् - मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्चेति । तत्र 'उद्भिदा यजेत पशुकाम' (ताण्ड्यब्राह्मण १९,७,२) इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात । एवं ज्योतिष्टोमादिशब्दानामपि । 'चित्रया यजेत पशुकाम' इत्यत्र चित्राशब्दस्य वाक्यभेदभयात्कर्मनामधेयत्वम् । एवं बहिष्पवमानाज्यप्टष्ठशब्दानामफि । 'अग्निहोत्रं जुहोती'त्यत्राऽग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्य शास्त्रात् । तस्य गुणस्य (१) प्रख्यापकशास्त्रस्य

---

* (२.२.९. तन्त्रवार्तिके) अस्याऽर्थः – एषः 'साऽस्य देवते'स्यधिकारे विहितः अण्प्रत्ययरूपस्तद्धित एव देवतायुक्तमामिक्षारूपं द्रव्यविशेषमभिदधाति । न्वेवं तद्धितेनैवाऽऽमिक्षोक्तौ आमिक्षपदवैयर्थ्यामिकि तदत्राऽऽह – आमिक्षापदेति । तस्य सन्निहितार्थविशेषवाचित्वेन विहितस्य तद्धितस्य देवतायुक्तमिक्षारूपद्रव्यसमर्पकापेक्षायां आमिक्षापदेन तत्समर्पणं क्रियत इति ॥

विद्यमानत्वेनाऽग्निहोत्रशब्दः कर्मनामधेय इति यावत् । एवमाधारादिशब्दानामपि । 'श्येनेनाऽभिचरन् यजेत' 'गवाऽभिचर्यमाणो यजेते'त्यत्र श्येनगोशब्दयोः कर्मनामधेयत्वं तद्यपदेशात्। तेन व्यपदेशः उपमानं तदन्यथानुपपत्त्येति यावत् । एवं 'सन्दंशेनाऽभिचरन् यजेते'त्यत्र सन्दंशशब्दस्याऽपि । तत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वम् । उत्पत्तिशिष्टगुणबलयिस्त्वमपि पञ्चमं नामधेयत्वे निमित्तं केचिदाहुः – 'वैश्वदेवेन यजेते'त्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्वं उत्पत्तिशिष्टगुणबलीयस्त्वात् । उक्तमत्वर्थलक्षणादिप्रकारचतुष्टयासम्भवात् ।

तदेवं संक्षेपेण निरूपितं मत्वर्थलक्षणादिप्रकारचतुष्टयनिरूपणेन नामधेयानां विधेयार्थापरिच्छेदकतयाऽर्थवत्वम् । प्रयोजनं तु तेषां सर्वत्रव्यवहार एव । न ह्यन्तरेण नामधेयं ऋत्विग्वरणादिषु 'अनेनाऽहं यक्ष्य' इत्याख्यानोपायो लघुः कश्चिदस्तीति दिक् ।

एवं पञ्चविधो वेदः प्रामाण्येनैव संस्थितः ।
चोदनासचिवस्साङ्गस्तेन धर्मो जयत्यलम् ॥१॥

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥२॥

श्रुतिस्स्मृतिस्सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिति स्थितम् ॥३॥

वेदमेव सदाऽभ्यस्येत्तपस्तप्यन् द्विजोत्तमः ।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥४॥

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥५॥

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ॥६॥

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चाधा ॥७॥

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः ॥८॥

स्थाणुरयं भारहारः किलाऽभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥९॥

यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलिकं शृणोति न हि प्र वेद सुकृतस्य पन्थाम् ॥१०॥

''तस्मात्स्वाध्यायोऽध्येतव्यः,'', ''ब्राह्मणेन निष्कारणो धर्मष्षडङ्गे । वेदोऽध्येयो ज्ञेयश्च'', ''न हिंस्यात्सर्वा भूतानि'', ''अग्नीषोमीयं पशुमालभेत'', ''श्येनाजिराभ्यामभिचरन् यजेत''

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥१॥

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।
विपर्ययस्तु दोषस्स्यादुभयोरेष निर्णयः ॥२॥

इत्येवमादिवाक्यैश्च प्रमाणैर्धर्मतत्परैः ।
उत्थापितमिदं शास्त्रं सन्दिग्धस्वार्थाविनिर्णये ॥३॥

वेद एव प्रमाणं स्याद्धर्मेऽधर्मे यथा तथा ।
तद्विचार इदं शास्त्रं निश्चितं वेदवित्तमैः ॥४॥



ॐ श्रीदवयनमः । ॐ श्रीदवयनमः । ॐ श्रीदवयनमः । ॐ श्रीदवयनमः ।

सर्दविः ह्रीं स सर्दविः ह्रीं स सर्दविः ह्रीं स सर्दविः ह्रीं स सर्दविः ह्रीं स सर्दविः ह्रीं स